THE VEDĀNTASĀRA

Of Sadānanda, together with the Commentaries

OF

NṚSIṂHASARASVATĪ AND RĀMATĪRTHA.



EDITED WITH NOTES AND INDICES

BY

Colonel G. A. Jacob,

INDIAN ARMY.

Author of "Concordance to Principal Upaniṣads";

"Manual of Hindu Pantheism" &c.

Fifth Edition, Revised.

PUBLISHED

BY

PĀNDURANG JĀWAJĪ,

PROPRIETOR OF THE 'NIRṆAYA-SĀGAR' PRESS,

BOMBAY.

1934.

[All rights reserved by the publisher.]

Publisher:-Pandurang Jawaji, } 'Nirnaya-sagar' Press,
Printer:-Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.

TO THE MEMORY OF

EDWARD BYLES COWELL

AT ONCE

THE MOST LEARNED AND MOST SELFLESS

OF THE

ENGLISH ORIENTALISTS OF HIS DAY

PREFACE TO SECOND EDITION.

The first edition, published seventeen years ago, has been out of print for some time; but as the demand for it continues we decided to re-issue it.

The text was so carefully prepared on the former occasion that I have seen no reason to alter it except in one or two places, but the Notes have undergone thorough revision. The "Maxims" so often referred to are my First, Second and Third *Handful of Popular Maxims current in Sanskrit literature* (published by the Nirṇaya-sāgar Press) each of which is now in a second edition. The adoption, on this occasion, of somewhat smaller type has reduced the size of the book by 30 pages; but the changed pagination which this necessarily involved has given me a great deal of extra work. However, the list of quotations has been adapted to the present edition, but I was compelled to abandon the index to the Words. Had I been a *guru* I could have entrusted to a *s'iṣya* the troublesome task of re-writting it; but, being only a solitary worker, no such aid was available. I am thankful to have lived long enough to bring the work up to date myself, and no further revision should be needed for many a day, if ever.

Redhill,-Surrey,
20 June 1911.

G. A. JACOB.

PREFACE TO FIRST EDITION.

I.

This is, so far as I know, the first attempt to publish a critical edition of Sadānanda's work in conjunction with its two Commentaries. Dr. Ballantyne brought out an edition of the text; accompanied by an excellent English translation in 1850; but that has long been out of print. A greatly improved text, with German translation, formed part of Dr. Boehtlingk's *Chrestomathie* published in 1877. But the only edition of Nṛisiṁhasarasvatī's commentary that I have seen is that appended to Paṇḍit Jīvānanda's edition of the text, dated 1875. Rāmatīrtha's commentary was printed in Calcutta in 1828, and in Benares (in *The Paṇḍit*) in 1873. In the latter instance it formed a mere appendage to the English translation, was put together with very little regard to typography, and looks as if it had been prepared from a single manuscript of pronounced inaccuracy!

The present edition is the outcome of a careful collation of fifteen manuscripts, a process which brought to light numerous misreadings which had been adopted more or less fully by previous editors. These have been removed; but, possibly, whilst thus avoiding Scylla I may have fallen into Charybdis! Of this, scholars must be the judge. A special feature of this volume is that here, for the first time, the quotations are plainly marked and their sources indicated. The fact that the three works contain in the aggregate 579 citations from other authors, and that all but 25 of them have been traced and verified, will show the importance of this addition. But only quotation-hunters will rightly appreciate the immense labour and research which it implies! I would here acknowledge my indebtedness to Prof. Bühler

for two references, and to Prof. Cowell, Prof. Venis, and Mr. Kās'ināth B. Pāṭhak, for one each. A special acknowledgment is made in each case in a foot-note or in the Notes at the end. I have appended an Index to the quotations (exclusive of those from Upaniṣads and the Gītā which can always be obtained from my Concordance), and a second one to all the technical and useful terms. The latter list includes twelve *nyāyas*, or maxims, all of which are explained in the Notes. It is much to be wished that editors of *Sūtras*, of philosophical poems, and of metrical law books, would give us full Indices thereto; for in these degenerate times of uncultivated memories, such aids would be invaluable. Yet, to this day, we have no printed index to the Nyāya or Vais'eṣika Sūtras, and it was only in 1889 and 1891 that Dr. Garbe and Mr. M. C. Apṭé gave us those to the Sāṅkhya and Vedānta aphorisms respectively. It is matter for congratulation that Mr. Apṭé is adding an Index to the Ānandās'rama edition of Sures'vara's bulky work the *Bṛihadāraṇyakavārtika*. This will increase its value immensely.

In a third appendix will be found a list of the works cited by our three authors, so as to exhibit at a glance the authorities on which they chiefly relied. Rāmatīrtha, it will be seen, made large use of writings of the highest class; and his commentary, which contains no less than 428 extracts, is a much more scholarly production than that of Nṛisiṁhasarasvatī. In some parts, however, it is wearisomely prolix. In the valuable preface to his edition of the *Vaṁs'abrāhmaṇa*, Dr. Burnell says—"Many (if not most) of Sāyaṇa's quotations are what may be called traditional, and have been taken by him from the works of predecessors, not from original texts, and even in cases where he might have referred to the original." This is true, to some extent, of Rāmatīrtha also; and, in the Notes, I have pointed out the probable sources of not a few of his quotations. Besides the present work he is the author of a commentary on S'ankara's *Upades'asāhasrī*, and also of one on the *Saṅkṣepa-*

s'ārīraka of Sarvajnātmamuni, a writer who is said by Mr. K. B. Pāṭhak (in his excellent pamphlet on Bhartṛihari and Kumārila) to have been a pupil of Sures'vara. From the latter work Rāmatīrtha gives us nine extracts, invariably ushered in with the words "तदुक्तमभियुक्तैः."

Another feature of this edition is its division into convenient section. In this I have generally followed my manuscript D, but have redivided some of its sections and reduced the whole number from 40 to 38.

In the Notes occasional reference will be found to a work styled *Rational Refutation*. Its full title is *A Rational Refutation of the Hindu Philosophical Systems*, and it is a translation, by Dr. Fitzedward Hall, of a work in Hindi by the learned Nīlakaṇṭha S'āstrī Gore, (now a Missionary in Poona), published in Calcutta in 1862. It is an admirable summary of the chief tenets of the six Indian schools. The references to my *Manual of Hindu Pantheism* are to the third edition published in Trübner's Oriental Series in 1891. Some portions of it have now to be modified in view of the discovery which I have since made of the source of the line "ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः," in regard to which see the notes to a page 67 of the present volume. The *Vāchaspatyam*, so often quoted from, is the fine Lexicon compiled, under the patronage of Government by the late Paṇḍit Tārānāth Tarkavāchaspati, a scholar of great repute in Bengal. The work consists of 5442 quarto pages; but whilst 4174 are devoted to the letters—अ—न, the rest of the alphabet is only allowed 1268. Yet, according to all analogy, the latter portion should at least have equalled the former; and it is therefore, as might be expected, decidedly inferior to it. In some instances, notably in that of म, the work is little better than a mere vocabulary. It is especially strong in philosophy, and in the literature of the Purāṇas and Tantras; but the treatment of the verbs is altogether unworthy of a work of such magnitude. Its

usefulness is a good deal impaired by the wearisome uniformity of type in the lengthy articles, and by the absence of subdivisions and other aids to the eye invariably to be found in large European Lexicons. There are a great many quotations, but very frequently no clue is given to their source; and, even when it is indicated, the absence of a key to the obscure abbreviations employed sometimes deprives it of all value. Its numerous lists, of maxims (s. v. न्याय), of festivals, religious rites &c. (s. v. व्रत), and of other series of things, are extremely valuable and constitute a distinct feature of the work.

II.

The Vedāntasāra is a summary statement of the doctrines of the *advaitavādins* as set forth by S'ankara in his *Brahmasūtrabhāṣya*. In a few particulars, duly indicated in the Notes, it departs from his teaching and exhibits an apparent admixture of Sāṅkhya doctrine. The chief peculiarity of this school is its tenet of the unreality of all phenomena, technically termed *māyāvāda;* but scholars have long been divided on the question as to whether this formed part of the original Vedānta or not. A very valuable contribution to the literature of this subject has been made by Dr. Thibaüt in the Introduction to the first volume of his translation of the Vedānta sūtras and bhāṣya. It seems to me impossible to resist the conclusion at which he arrives, namely that the old Upaniṣads and the Sūtras do not propound it,—that is to say, "they do not set forth the distinction of a higher and lower knowledge of Brahman; they do not acknowledge the distinction of Brahman and Īs'vara in S'ankara's sense; they do not hold the doctrine of the unreality of the world; and they do not, with S'ankara, proclaim the absolute identity of the individual and the highest Self" (p. 100). There are, however, a few passages of which the *māyāvāda* may be a development; and it may also be admitted that if

the impossible task of reconciling the contradictions of the Upaniṣads and reducing them to a harmonious and consistent whole is to be attempted at all, S'ankara's system is about the only one that could do it! But more than this it would seem impossible to concede.

It is essential, however, to ascertain the sense in which S'ankara uses the term *māyā* in his commentary. Is it with him an equivalent of *avidyā*, or does it denote the illusory universe itself? In summarizing the teaching of the *bhāṣya*, Dr. Thibaüt seems to take the former view, for he says (on page xxv)—"Brahman is associated with a certain power called *māyā* or avidyā to which the appearance of this entire world is due. This power cannot be called 'being' (sat), for 'being' is only Brahman; nor can it be called 'non-being' (asat) in the strict sense, for it at any rate produces the appearance of this world. It is in fact a principle of illusion; the undefinable cause owing to which there seems to exist a material world comprehending distinct individual existences. Being associated with this principle of illusion, Brahman is enabled to project the appearances of the world in the same way as a magician is enabled by his incomprehensible megical power to produce illusory appearances of animate and inanimate beings. Māyā thus constitutes the *upādāna*, the material cause of the world."

After a very careful perusal of the entire *bhāṣya* with this point in view, I have come to the conclusion that the above description of māyā is incorrect,—that the word *māyā* is nowhere used by S'ankara as a synonym of *avidyā*, but is expressly said to be produced by it,—and that in no sense whatsoever does he regard it as the *cause* of the world. Now for the proof of this. In the opening part of Book II, in 2. 1. 9, 2. 1. 21 and 2. 2. 29 we read as follows:—"प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणं मृत्सुवर्णादय इव घटरुचकादीनाम्। उत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणं मायावीव मायायाः॥" "यथा स्वयम्प्रसारितया मायया मायावी त्रिष्वपि कालेषु न

संस्पृश्यते अवस्तुत्वात्, एवं परमात्मापि संसारमायया न संस्पृश्यते इति ॥" "यथा च मायावी स्वयम्प्रसारितां मायामिच्छयानायासेनैवोपसंहरति &c." ॥ "बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य । मिथ्या मयोपलब्धो महाजनसमागम इति न ह्यस्ति मम महाजनसमागमो निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रान्तिरुद्भूवेति । एवं मायादिष्वपि भवति यथायथं बाधः" ॥ In all these passages, and also in 3. 2. 3–6 where the creations of a dream are declared to be nothing but *māyā*, the word *māyā* has without doubt the sense of an *illusory appearance*, produced and withdrawn at will; but where, in the whole range of Vedāntic literature, is there any such thing predicated of *avidyā*?

In an important description of Īs'vara in 2.1.14, we read:— "सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्यते । ताभ्यामन्यः सर्वज्ञ ईश्वरः..... । एवमविद्याकृतनामरूपोपाध्यानुरोधीश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि ।" Taking मायाशक्तिः as a compound[1] term, in accordance with the Ānandās'rama edition, we read here that name and form, products of *avidyā*, are Īs'vara's illusion-producing-power; and the phrases अविद्याकल्पित, अविद्याकृत, अविद्याध्यस्त, अविद्याध्यारोपित, अविद्यानिमित्त, and अविद्याप्रत्युपस्थापित literally swarm in the *bhāṣya*, whilst such compounds as मायाकल्पित &c. are nowhere to be found. I think, therefore, that it is quite clear from the *bhāṣya* itself that *māyā* is not used there as a synonym of *avidyā*, but is regarded as an illusory appearance produced by it; and to the passages to this effect, already quoted, may be added one met within 2. 2. 2, namely "अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेन &c." The only exceptions to this signification that I have met with in the *bhāṣya* are in 1.3.19 and 1.4.3. In the former we read "एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया मायया मायाविवदनेकधा विभाव्यते" where the working of *avidyā* is compared with that of the magician's *māyā*, or magic-power, the old use

1 Dr. Thibaüt, in his translation, separates the two words.

of the word; and in the latter the word is given as one of the equivalents of *avyakta* in *Kaṭha* 3. 11. In this latter passage we also have the adjective मायामय where the word *māyā* retains its usual sense of illusion. It reads thus:—"अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया माया-मयी महासुषिर्यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः।" When however, we come down a few centuries to the time of Sāyaṇa we find *māyā* used very differently; and, in his *Pañchadas'ī* I. 14-17, it is regarded as the associate of Īs'vara, whilst *avidyā* is that of Jīva. This view now prevails everywhere and would seem to have been in Dr. Thibaüt's mind when he wrote the above.

III.

As already pointed out, the Māyāvādins insist upon the unreality of all phenomena, and even of God and individual souls as distinct entities, Brahma being the only existent thing. On account, however, of the apparent separate existence of deity and humanity, writers of this school employ the epithets *para*, *mukhya*, and *nirguṇa* to designate pure unassociated Brahma, and *apara*, *amukhya*, and *saguṇa* to distinguish that portion of Brahma which, through association with *avidyā*, is looked upon as God. The latter is also called *paramātman* and *parames'vara*. This distinction is not recognized by Rāmānuja who seems to have based his system on the teaching of schoolmen older than S'ankara; and the extraordinary way in which even S'ankara again and again ignores the distinction propounded by himself is an additional proof, to my mind, that his system was a departure from the then-existing one from which he found it difficult to free himself. Let me demonstrate this by examples. In 1. 1. 11, 1. 2. 14, and 4. 3. 14, we read as follows:—"द्विरूपं हि ब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिविवर्जितम्। .....एवमेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते"। "निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यते"। "तत्र

परापरब्रह्मविवेकानवधारणेनापरस्मिन्ब्रह्मणि वर्तमाना गतिश्रुतयः परस्मिन्ब्रह्मण्यारोप्यन्ते। किं द्वे ब्रह्मणी परमपरं चेति। बाढम् द्वे। 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार' इत्यादिदर्शनात्। किं पुनः परं ब्रह्म किमपरमिति। उच्यते। यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधादस्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परम्। तदेव यत्र नामरूपादिविशेषेण केनचिद्विशिष्टमुपासनायोपदिश्यते 'मनोमयः प्राणशरीरो भारूप' इत्यादिशब्दैस्तदपरम्"। Here then we have the difference between परं निर्गुणं ब्रह्म and अपरं सगुणं ब्रह्म clearly laid down in axiomatic form, and illustrated by scripture passages. Now for the inconsistencies!

In 1. 1. 12 we have a discussion as to the application of the term आनन्दमयः in *Tait.* 2. 5. Does it apply to परं ब्रह्म or to some other? The pūrvapakṣin says that the reference is to अमुख्य आत्मा and concludes with the words तस्मात्संसार्येवानन्दमय आत्मेति." The reply to this is as follows:—"एवं प्राप्त इदमुच्यत 'आनन्दमयोऽभ्यासात्'। पर एवात्मा आनन्दमयो भवितुमर्हति। कुतः। 'अभ्यासात्'। परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुकृत्वोऽभ्यस्यते"। Now here the alternative lay between परं ब्रह्म and another, and the latter being finally rejected the former is of course accepted, as in all similar cases. Therefore the expression पर आत्मा must be used by the siddhāntin as the equivalent of परं ब्रह्म. In 1. 1. 11 however we find that परमात्मा is only ईश्वर, for it is said there "एक एव तु परमात्मेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो यद्यपि भवति तथापि यथागुणोपासनमेव फलानि भिद्यन्ते"। This is conclusively established, too, from 1. 1. 16 where the discussion is continued as follows:—"इतश्चानन्दमयः पर एवात्मा। 'नेतरः'। इतर ईश्वरादन्यः संसारी जीव इत्यर्थः। न जीव आनन्दमयशब्देनाभिधीयते"। According to this the choice lay between ईश्वर and जीव, the former term being used as the equivalent of परं ब्रह्म the expression employed in the opening part of the *adhikaraṇa.* So then परं ब्रह्म is used by S'ankara himself as the equivalent of ईश्वर in direct opposition to his own axioms.

But here is a still more glaring instance! In 1. 2. 1 there is a discussion as to the meaning of *Chhā.* 3. 14. 1, 2.

1. *Bri.* 3. 8. 8. 2. *Chhā.* 3. 14. 2

The Pūrvapakṣin says, "किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यत आहोस्वित्परं ब्रह्मेति। किं तावत्प्राप्तम्। शारीर इति। कुतः। तस्य हि कार्यकारणाधिपतेः प्रसिद्धो मनआदिभिः सम्बन्धो न परस्य ब्रह्मणः"। To this the siddhāntin replies "एवं प्राप्ते ब्रूमः। परमेव ब्रह्म मनोमयत्वादिभिर्धर्मैरुपास्यम्। कुतः। सर्वत्र प्रसिद्धोपदेशात्। यत्सर्वेषु वेदान्तेषु प्रसिद्धं ब्रह्मशब्दस्यालम्बनं दगत्कारणं इह च 'सर्वं खल्विदं ब्रह्म' इति वाक्योपक्रमे श्रुतं, तदेव मनोमयत्वादिधर्मैर्विशिष्टमुपदिश्यत इति युक्तम्। एवं च प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः" ॥ The first thing to be noticed here is the statement that *Chhā.* 3. 14. 1, 2 refers to परं ब्रह्म, whereas in the definition given above of the distinction between परं ब्रह्म and अपरं ब्रह्म, the very same Scripture is declared to relate to the latter! Again, in the discussion now before us परं ब्रह्म is identified with the जगत्कारणं, or, in other words, with ईश्वर,—for we read in 3. 2. 41 "सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते," and in 4. 4. 17 "जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य। कुतः। तस्य तत्र प्रकृतत्वात् 'असन्निहितत्वाच्च' इतरेषाम्। पर एव हीश्वरो जगद्व्यापारेऽधिकृतः"। Therefore, according to S'ankara's own showing, the terms परं ब्रह्म, अपरं ब्रह्म, पर ईश्वरः and ईश्वरः are all exactly synonymous, and there is no difference after all between his views and those of Rāmānuja in this respect!

The same remarkable interchange of terms, the fundamental difference between which forms one of the pillars of the system, occurs again and again; but I will merely refer briefly to two further instances. In 1. 3. 1 the द्युभ्वाद्यायतनं is said to be परं ब्रह्म, whilst in 1. 3. 7 it is ईश्वरः; and in 1. 3. 10-12 the अक्षरं of *Bṛih.* 3. 8. 8 is said to be पर आत्मा, परमेश्वरः, and परं ब्रह्म. To me, therefore, it seems impossible to come to any other conclusion than that the *vis'iṣṭādvaitavādins* or some similar school, were in possession of the field in S'ankara's time, and that his own mind was so saturated with their doctrines as to be unable to shake them off even when propounding an antagonistic system.

IV.

The manuscripts and editions on which this volume is based are as under:—

A. No. 2833, India office. Text only. Belonged to Sir C. Wilkins. Well written, but omits several passages in latter part.

B. No. 2773, India office. Text. From College of Fort William. An excellent manuscript; very accurate and well written.

C. No. 884, India office. Presented by Colebrooke. Nṛisiṁhasarasvatī's commentary in which the whole text is incorporated. Beautifully written and fairly correct.

D. No. 2371, India office. Text. [Presented by the ?] Gaikwāḍ. Well written and very accurate.

E. No. 2082, India office. Gaikwāḍ. Nṛisiṁhasarasvatī's commentary. Written in very small hand, but clear and accurate.

F. No. 1645, India office. Presented by Colebrooke. Commentary as above. In a very bold hand. Fairly accurate; less so towards the end.

G. No. 423, Vis'rāmbāg collection, Poona. Text only. For the most part very good.

H. No. 664 of 1882–83, Poona. Text. Fairly correct.

J. No. 265 of 1882–83, Poona. Nṛisiṁhasarasvatī's Com. Very well written. Numerous Gujarāti notes in margin.

K. No. 321 of 1880-81, Poona. Text and Nṛisiṁhasarasvatī's Com. Very good. Consulted occasionally.

L. A manuscript of text and commentary from Ānandās'rama, Poona. Fairly accurate.

M. No. 122 of 1881–82, Poona. A fine manuscript of Rāmatīrtha, carefully corrected. Not quite so trustworthy towards the end.

N. No. 129 of 1883-84 (A), Poona. A beautiful manuscript of Rāmatīrtha, very carefully corrected throughout.

P. An edition of Rāmatīrtha, published in *The Paṇḍit* of

1872-73, at the foot of a translation. Most inaccurate and wholly unreliable.

Q. A manuscript of Rāmatīrtha, from Ānandās'rama, Poona. Fairly accurate, but most perversely corrected (?) by some Paṇḍit according to his own ideas!

R. No. 1128, India office. A splendid manuscript of Rāmatīrtha.

Besides the above, I referred frequently to Paṇḍit Jīvānanda's edition of text and Nṛisiṁhasarasvatī's Com. published in 1875.

This edition was prepared with a view to its publication in the Bombay Sanskrit Series; but when offered to the Director of Public Instruction, it was refused a place in that valuable Series on the ground that no more Sanskrit books were to be printed by the Department. As I was then on the eve of leaving India, and was anxious that the labor of years should not be thrown away, I offered the manuscript to Mr. Jāwaji Dādāji, the enterprizing Proprietor of the Nirṇaya-Sāgar Press, who at once accepted it. He alas! passed away not many months afterwards, but the work has been brought out in a style worthy of the splendid Press which he founded. My great distance from Bombay has of course been a drawback in many ways, and I must apologize for the somewhat lengthy list of Addenda and Corrigenda. The unfortunate omission on page forty is due to the fact that the same expression occurred three times on the page which I was copying, and my eye wandered from one to the other, thus leaving out the lines that came between them. As the first 72 pages were set up before a proof was sent to me, it was of course impossible to insert the omitted portion in its proper place.

I must not conclude these prefatory remarks without a word to my Hindu friends for whom this edition is chiefly intended. No one can have a higher regard for India and its people than myself, or be a greater admirer of its ancient

language. Bharatakhaṇḍa has produced men who would have been an ornament to any society, and it has been pre-eminently a land of thinkers. It is intensely interesting to see the efforts made by its great men, centuries ago, to reach the truth; yet with all their keenness of mental vision, what result did they arrive at? The Vedānta philosophy, of which this volume is an outline, is supposed to be the finest outcome of Indian thought; yet it abolishes God, as an unreality, and substitutes an impersonal. It with no consciousness, whilst its highest notion of bliss is the annihilation of personality! Yet if any men could, by searching, find out the living and true God, they would assuredly have succeeded. Is it not clear, then, that God must give us a revelation of Himself, or we shall never know Him? And I think that any really earnest and candid mind will see that the Bible is just the revelation we need; and, like the sacred books of all the other great religions of the world, it came to us from Asia. Do not look upon it, therefore, as a product of European thought,—or indeed of any merely human thought,—though it has brought light and life into Europe wherever it has been allowed to circulate freely. Just one word as to the annihilation of our personality. I look upon humanity as capable, under improved conditions, of attaining to heights grand beyond all our present conceptions; and the idea of merging our personality in another Being is as horrible as it is unsound. No, there are far greater things than that in store for that portion of the human race that is willing to unite under the headship of "the second[1] Man"! and such will after all see the declaration "Ye[2] shall become as gods" more than fulfilled, false as it was when uttered.

REDHILL, SURREY;
September 1893.

G. A. JACOB.

1. 1 *Corinthians* xv. 47. 2. *Genesis* iii. 5.

वेदान्तसारः

सुबोधिनीसहितः ।



अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥

कृष्णानन्दं गुरुं नत्वा परमानन्दमद्वयम् ।
वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीम् ॥

इह खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनां चिन्मात्राश्रयतद्रूपाद्वयानन्दविषयानाद्यनिर्वचनीयभावरूपाज्ञानविलसितानन्तभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नेश्वराणामिष्टिकाचूर्णादिसंघर्षितादर्शतलवदतिनिर्मलाशयानां नलिनीदलगतजलबिन्दुवद्धिरण्यगर्भादिस्तम्बपर्यन्तं जीवजातं स्वात्मवन्मृत्योरास्यान्तर्गतं क्षणभङ्गुरं तापत्रयाग्निसन्दह्यमानमनिशमात्मन्यनुपश्यतामतिविवेकिनामत एवैहिकस्रक्चन्दनादिविषयभोगेभ्य आमुष्मिकहैरण्यगर्भाद्यमृतभोगेभ्यश्च वान्ताशन इवातिनिर्विण्णमानसानां शमादिसाधनसम्पन्नानामापाततोऽधिगताखिलवेदार्थत्वादहंग्राह्यहङ्कारपर्यन्तं जडपदार्थतद्विलक्षणस्वप्रकाशस्वरूपे प्रत्यगात्मनि ब्रह्मानन्दत्वे संशयापन्नानां तज्जिज्ञासूनामल्पश्रवणेन मूलाज्ञाननिवृत्तिपरमानन्दावाप्तिसिद्धये प्रकरणमारभमाणः समाप्तिप्रचयगमनादिफलकशिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारलक्षणमङ्गलाचरणस्यावश्यकर्तव्यतां प्रदर्शयँल्लक्षणयानुबन्धचतुष्टयं निरूपयन् परमात्मानं नमस्करुतेऽखण्डमित्यादिना । अभीष्टस्य निःश्रेयसस्य सिद्धये प्राप्त्यर्थम् । आत्मानमाश्रये । एकत्वेन प्रतिपद्य इत्यर्थः । नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशङ्क्याह अखिलाधारमिति । अखिलस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन कारणत्वाक्रान्तं ब्रह्मैव प्रतिपद्ये न तु शुद्धमित्यर्थः । नन्वेवं च सति प्रतिपत्तिविषयत्वेन दृश्यत्वापत्तिमाशङ्क्याह

---

1. See Notes on this verse.

---

१. For this simile see *Bhāmatī* 1. 1. 4 (p. 95 Bib. Ind.).

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २ ॥

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रा-

अवाङ्मनसगोचरमिति । "यतो वाचो निवर्तन्त" इत्यादिश्रुतिभिरविषयत्वप्रतिपादनात् । प्रतिपत्तिविषयत्वं कारणत्वोपलक्षितब्रह्मविषयत्वेनौपचारिकमिति भावः । नन्वेवमपि कारणत्वे मृत्पिण्डवदनित्यत्वशङ्कामपहरन्नाह सदिति । नाशाभावोपलक्षितस्वरूपं "सदेव सौम्य" इत्यादिश्रुतेः । ननु तथापि जडत्वापत्तिमाशङ्क्याह चिदिति । स्वप्रकाशचैतन्यस्वरूपमिति यावत् । ननु तथाप्यपुरुषार्थत्वात्किमित्याश्रयणीयमित्यत आह आनन्दमिति । परमानन्दस्वरूपमित्यर्थः । ननु "भक्षितेऽपि लशुने न शान्तो व्याधिः" इति न्यायेन प्रपञ्चस्याधिष्ठानव्यतिरिक्ततया प्रतीयमानत्वात्कथमद्वैतसिद्धिरित्याशङ्क्य तृणीकुर्वन्नाह अखण्डमिति । सजातीयविजातीयस्वगतभेदशून्यमित्यर्थः । अत्र सच्चिदानन्दमिति प्रयोजनमखण्डमिति विषयः शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धस्तत्कामोऽधिकारीत्यनुबन्धचतुष्टयमर्थादुक्तं भवति ॥ १ ॥

किञ्च "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन" इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्राङ्गत्वप्रतिपादनात्तन्नमस्कारोऽपि पृथक्त्वेन कार्य इति तन्नतिपूर्वकमभिधेयग्रन्थं प्रतिजानीते अर्थतोऽपीति । अपिशब्देन न केवलं शब्दतो डित्थादिवत्संज्ञामात्रं व्यवस्थितमपित्वर्थतः शब्दतश्चेति । अद्वयानन्दान् गुरूनाराध्य वेदान्तसारं यथामति वक्ष्य इत्यन्वयः । अद्वयाश्च ते आनन्दाश्चाद्वयानन्दास्तानद्वयानन्दान् । तत्र हेतुमाह अतीतद्वैतभानत इति । अतीतं गतं द्वैतभानं यतस्तस्मादतीतद्वैतभानतः । निरस्तसमस्तभेदज्ञानत्वादित्यर्थः । तान् गुरूनाराध्य कायवाङ्मनोभिर्नमस्कारगोचरीकृत्य । वेदान्तसारं वेदान्तानामुपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धान्तरहस्यं यस्मिन् ज्ञाते पुनर्ज्ञातव्यं नावशिष्यते तं वेदान्तसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्य इत्यर्थः ॥ २ ॥

इदानीं सर्वस्यापि वस्तुविचारोद्देशपूर्वकत्वात्प्रतिज्ञातं वेदान्तं नामतो निर्दिशति वेदान्तो नामेति । उपनिषद एव प्रमाणमुपनिषत्प्रमाणम् । उपनिषदो यत्र प्रमाणमिति वा । तदुपकारीणि वेदान्तवाक्यसङ्ग्राहकाणि

---

१. *Tait.* 2. 4. 1. २. *Chhā.* 6. 2. 1. ३. See *Maxims* i (2nd. edn.). ४. *Śwet.* vi. 23.

दीनि च। अस्य वेदान्तप्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्बुत्तासिद्धेर्न ते पृथगालोचनीयाः। तत्रानुबन्धो नामाधिकारिविषयसम्बन्धप्रयोजनानि ॥ ३ ॥

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः

शारीरकसूत्रादीनि "अथातो ब्रह्मजिज्ञासा"[1] इत्यादीनि सूत्राणि। आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते तेषामप्युपनिषच्छब्दवाच्यत्वादिति भावः। ननु यद्यप्यवान्तरानुबन्धचतुष्टयमापद्येतेति निर्दिष्टं तथापि परमानुबन्धचतुष्टयस्यानिरूपितत्वादत्र प्रेक्षावतां प्रवृत्तिर्न स्यादित्यत आह अस्य वेदान्तेति। अस्य वेदान्तसारस्येत्यर्थः। ननु वेदान्तशास्त्रस्यापि किमनुबन्धचतुष्टयं येनास्यापि तद्बुत्तासिद्धिरित्याशङ्क्य मूलशास्त्रस्यानुबन्धचतुष्टयमाविष्करोति तत्रानुबन्ध इति। अनुबन्धचतुष्टयमेवाह अधिकारीत्यादिना ॥ ३ ॥

यथोद्देशमधिकारिणं लक्षयति अधिकारी त्विति। "स्वाध्यायोऽध्येतव्य"[2] इति वचनात्त्रैवर्णिकानामुपनीतानामध्ययनं नियमेन विधीयते। अध्ययनविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयुक्तम्। तथा चाधीतो वेदो वेदाङ्गानि च शिक्षाकल्पव्याकरणछन्दोज्योतिर्निरुक्ताख्यानि यतस्तेनापाततोऽधिगताखिलवेदार्थः। अत्र सर्ववेदार्थरहस्ये ज्ञाते सत्युत्तरग्रन्थवैयर्थ्यपरिहाराय आपातत इत्युक्तम्। नन्वनधीतवेदानामपि विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनादध्ययनतत्प्रयुक्तकर्मानुष्ठानवैयर्थ्यमाशङ्क्योत्तरमाह जन्मान्तर इति। तेषामाधुनिकाध्ययनाद्यभावेऽपि जन्मान्तरीयाध्ययनादिना चित्तपरिपाकवतामस्मिन् जन्मनि विनाप्यध्ययनादिना ज्ञानोत्पत्तौ बाधकाभावान्नाध्ययनादिवैयर्थ्यमिति भावः। काम्येति। काम्यस्यापि कर्मणो धर्मसाधनत्वेऽपि यातायातसम्पादकत्वेन बन्धकत्वान्निषिद्धवत्तद्वर्जनपुरःसरमित्युक्तम्। तथा च नित्यादिकर्मानुष्ठानेन निर्गतनिखिलकल्मषतया निःशेषनिरस्तसकलकल्मषत्वेन। अत्र निखिलपदं काम्यनिषिद्धजनितसु-

---

१. *Brahmasūtra* 1. 1. 1. २. *Tait. Āranyaka* 2. 15. 7.

प्रमाता । काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि । नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि । नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि । प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि[1] । उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि । एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनमुपासनानां तु चित्तैकाग्र्यं "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादिश्रुतेः[2] "तपसा कल्मषं हन्ति" इत्यादिस्मृतेश्च[3] । नित्यनैमित्तिकप्रायश्चित्तोपासनानां त्ववान्तरफलं पितृलोकसत्यलोकप्राप्तिः "कर्मणा पितृलोको विद्यया देवलोक" इत्यादिश्रुतेः[4] । साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसम्पत्तिमुमुक्षुत्वानि[5][6][7] । नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया[8]

कृतदुष्कृतपरम् । तेन नितान्तनिर्मलस्वान्तः । नितान्तमत्यन्तं निर्मलं स्वच्छं स्वान्तमन्तःकरणं यस्य स तथोक्तो वक्ष्यमाणसाधनचतुष्टयसम्पन्नः प्रमाता । अन्तःकरणे प्रतिबिम्बितं चैतन्यमित्यर्थः । एतदेव स्पष्टं व्याकरोति काम्यानीत्यादिना । तत्र शमं लक्षयति शमस्तावदिति । यथा तीव्रायां बुभुक्षायां भोजनादन्यो व्यापारो मनसो न रोचते भोजने विलम्बं च न सहते तथा स्रक्चन्दनादिविषयेष्वत्यन्तमरुचिस्तत्त्वज्ञानसाधनेषु श्रवणमननादिष्वत्यन्तमभिरुचिर्जायते । तदा पूर्ववासनाबलाच्छ्रवणादिसाधनेभ्य

---

1. ABDJL. prefix कृच्छ्र. 2. *Bṛih.* 4. 4. 22. 3. *Manu* xii. 104; BDGH. add the other half of the line. 4. So ABCEFJKL; but Rāmatīrtha, with DGH, excludes प्रायश्चित्त as having no other known result than that of the removal of guilt. 5. *Bṛih.* 1. 5. 16. 6. °सम्पत् AD. 7. °त्वादीनि AC. 8. अनित्यत्वात् BCGJ.

तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः । शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः । शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः । दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् । निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिरथवा विहितानां कर्मणां विधिना परित्यागः । तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता । निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् । गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा । मुमुक्षुत्वं मोक्षेच्छा । एवम्भूतः प्रमाताधिकारी "शान्तो दान्त" इत्यादिश्रुतेः । उक्तं च—

उद्धीय स्वक्चन्दनादिविषयेषु गम्यमानं मनो येनान्तःकरणवृत्तिविशेषेण निगृह्यते स वृत्तिविशेषः शम इत्यर्थः । इदानीं दमस्य लक्षणमाह दम इत्यादि । ज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्त्यन्ते स दम इत्यर्थः । इदानीमुपरतेर्लक्षणमाह निवर्तितानामिति । निगृहीतानामेव तेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छन्ति तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः । उपरतेर्लक्षणान्तरमाह अथवा विहितानामिति । विहितानां नित्यादिकर्मणां विधिना चतुर्थाश्रमस्वीकारेण परित्यागः । नाहं कर्तेत्यवस्थानमुपरतिरित्यर्थः । तितिक्षाया लक्षणमाह तितिक्षेति । शरीरधर्मस्य शीतोष्णादेस्तज्जन्यसुखदुःखादेश्च शरीरस्य त्यक्तुमशक्यत्वात्स्वप्रकाशचिद्रूपे स्वात्मनि च शीतोष्णादेरत्यन्ताभावादिति विवेकदीपेन मिथ्याभूतस्य शीतोष्णादेर्द्वन्द्वस्य यत्सहनं सा तितिक्षेत्यर्थः । इदानीं समाधानलक्षणमाह निगृहीतस्येति । शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेष्वमानित्वादिसाधनविषयेषु समाधिनैरन्तर्येण तच्चिन्तनं समाधानमित्यर्थः । श्रद्धादयः स्पष्टार्थाः । तथा च पूर्वोक्तसकलविशेषणविशिष्टः प्रमाताधिकारीत्यर्थः । अस्मिन्नर्थे श्रुतिं प्रमाणयति शान्त इत्यादि ।

---

1. See Notes. 2. *Bṛih.* 4. 4. 23. 3. *Upades'asāhasrī* 324 (xvi. 72).

---

१. °भानस्य KL.

"प्रशान्तचित्ताय जितेन्द्रियाय च
प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत्सततं मुमुक्षव" इति ॥

विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां तात्पर्यात् । सम्बन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः । प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च "तरति शोकमात्मवित्" इत्यादिश्रुतेः "ब्रह्मविद्ब्रह्मैव भवति" इत्यादिश्रुतेश्च ॥ ४ ॥

अयमधिकारी जननमरणादिसंसारानलसन्तप्तो प्रदीप्तशिरा

यथोद्देशं विषयं निरूपयति विषय इति । अविद्याध्यारोपितसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टं शुद्धं चैतन्यं ज्ञेयस्वरूपमेव सर्वेषां वेदान्तवाक्यानां विषय इत्यर्थः। क्रमप्राप्तं सम्बन्धं लक्षयति सम्बन्धस्त्विति । बोध्यबोधकभाव इति । बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य वेदान्तशास्त्रस्य च बोध्यबोधकभाव एव सम्बन्ध इत्यर्थः । अवशिष्टं प्रयोजनमाह प्रयोजनं त्विति । ब्रह्मात्मैकत्वलक्षणचिन्मात्रगताज्ञानतत्कार्यसकलप्रपञ्चनिवृत्तिः पुनरुत्पत्त्यभावरूपा स्वस्वरूपाखण्डानन्दप्राप्तिः फलमित्यर्थः । ननु लोकेऽप्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टमत्र तु नित्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात्कथं फलत्वमिति चेन्न तस्यैव पुरुषार्थत्वनियमाभावात् । यथा लोके कस्यचिद्विस्मृतकण्ठमणेस्तत्प्रयुक्तशोकाग्निसन्दह्यमानस्याप्तोपदेशोत्तरकालं स्वकण्ठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फलत्वं दृष्टमेवमत्रापि नित्यप्राप्तस्यात्मनोऽज्ञानमोहान्धकारावृतत्वेन विस्मृतस्वस्वरूपस्य पुरुषस्य गुरुश्रुतिवाक्यश्रवणानन्तरमज्ञानमोहान्धकारनिवृत्तौ सत्यां स्वयम्प्रकाशमानचिद्रूपस्य सिद्धस्यैवात्मनः फलत्वमुपचर्यत इति भावः । उक्तेऽर्थे श्रुतिं प्रमाणयति तरतीति ॥ ४ ॥

अधुना शास्त्रारम्भनिमित्ताधिकार्यादिनिरूपणानन्तरं शास्त्रारम्भं प्रस्तौत्यथवा लक्षितस्याधिकारिणः कर्तव्यं दर्शयति अयमधिकारीति । उक्तलक्षण-

---

1. सकलं CEF. 2. *Chhā.* 7. 1. 3. 3. *Mund.* 3. 2. 9, modified.

---

१. See कण्ठचामीकरन्याय in *Maxims* ii (2nd. edn.).

जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति "समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं" इत्यादिश्रुतेः[1]। स परमकृपयाऽध्यारोपापवादन्यायेनैनमुपदिशति "तस्मै स विद्वानुपसन्नाय प्राह[3]" इत्यादिश्रुतेः[4] ॥ ५ ॥

असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः।

लक्षितो बुद्धिसन्निहितोऽधिकारी गुरुमुपसरतीत्यर्थः। ननु संसारासक्तचित्तस्य विषयलोलुपस्यार्तिरहितस्य गुरूपसर्पणमयुक्तमित्याशङ्क्याह संसारानलसन्तप्त इति। सन्तापे हेतुमाह जननेति। आदिशब्देन व्याध्यादयो गृह्यन्ते। आतपाग्निदग्धमस्तको दाहनिवृत्तिकामो यथा शीतलं जलराशिमनुसरति तथा संसारतापत्रयदन्दह्यमानस्तन्निवृत्तिकामः स्वस्वरूपजिज्ञासुः संसारनिवर्तकं श्रोत्रियं ब्रह्मनिष्ठं करतलामलकवत्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुसमीपं गत्वानुसरति मनोवाक्कायकर्मभिः सेवत इत्यर्थः। अस्मिन्नर्थे श्रुतिमुदाहरति समित्पाणिरिति। अथ गुरुकृत्यमाह स इति। स पूर्वोक्तो गुरुरेनं शिष्यमुपदिशतीत्यन्वयः। परमरहस्यमपि ब्रह्मस्वरूपं कस्मादुपदिशतीत्यत आह कृपयेति। कृपाव्यतिरेकेण साधनान्तराभावादित्यर्थः। नन्वखण्डस्य ब्रह्मस्वरूपस्यागोचरत्वेनोपदेष्टुमशक्यत्वात्कथमुपदिशतीत्यत आह अध्यारोपेति। अखण्डब्रह्मस्वरूपस्यागोचरत्वेन विधिमुखत्वेनोपदेष्टुमशक्यत्वेऽपि "नेह नानास्ति किञ्चन" इत्यादिश्रुतिमनुसृत्याविद्यारोपितमिथ्यानानापदार्थनिषेधमुखेनोपलक्षितमखण्डचैतन्यमेव पुनः "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनाप्युपदिशतीति भावः। तत्र श्रुतिमाह तस्मा इति ॥ ५ ॥

अस्मिन्नर्थे लौकिकदृष्टान्तमाह असर्पभूतायां इति। व्यावहारिकवस्तुत्वेनाभिमतायां रज्जौ अवस्तुभूतसर्पारोपो नाम रज्ववच्छिन्नचैतन्यस्याविद्या सर्पज्ञानाभासाकारेण परिणममाना सर्पाकारेण विवर्तते स विवर्तो रज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः किन्तु रज्जुरिति विशेषदर्शनोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारेण रज्वज्ञाननिवृत्तौ सर्पभ्रान्तिर्निवर्तत इत्यर्थः।

---

1. *Mund.* 1. 2. 12. 2. See Notes. 3. So all the Mss; BJ. insert आत्मतत्त्वं before प्राह. 4. *Mund.* 1. 2. 13.

---

१. See करविन्यस्तबिल्वन्याय in *Maxims* ii (2nd. edn.). २. *Brih.* 4. 4. 19. ३. पदार्थापवाद० EK. ४. *Tait.* 2. 1. ५. व्यावहारिके ECL.

वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म । अज्ञानादिसकलजडसमूहोऽवस्तु । अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतेश्च ॥ ६ ॥

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते । तथाहि । यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्व-

---

उक्तमर्थं दार्ष्टान्तिके योजयति वस्त्विति । कालत्रयानपाय्यात्मैव वस्तुशब्दार्थः । तत्रावस्तुस्वरूपमाह अज्ञानादीति । अज्ञानतज्जन्यव्योमादेर्मिथ्यात्वाद्दृश्यत्वात्सावयवत्वाद्विकारित्वात्सापेक्षसिद्धिकत्वादित्यादिहेतुभिरवस्तुत्वमित्यर्थः । एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं तावदाह अज्ञानं त्विति । किमिदमज्ञानं सद्रूपमसद्रूपं वा । नाद्यस्तस्य शशविषाणतुल्यत्वेन तुच्छत्वात् । नापि द्वितीयोऽसतः कारणत्वानुपपत्तेरित्यादिहेतुभिः सत्त्वेनासत्त्वेन वा निरूपयितुं न शक्यत इत्याह अनिर्वचनीयमिति । नन्वज्ञानस्यानिर्वचनीयत्वे सर्वथा ज्ञातुमशक्यत्वात्तद्भावप्रसङ्गमाशङ्क्याह त्रिगुणात्मकमिति । "अजामेकां" इत्यादिश्रुतिभिः सत्त्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः । नन्वेवमजस्याज्ञानस्य श्रुतिप्रसिद्धस्य व्योमादिरूपेण विततस्य सत्यवद्भासमानत्वेन संसाराविवृत्तिमाशङ्क्याह ज्ञानविरोधीति । एतादृशमप्यज्ञानमात्मसाक्षात्कारेण निवर्तत इत्यर्थः । तदुक्तं भगवता—"दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति । ज्ञानाभाव एवाज्ञानमिति तार्किकमतं निराकरोति भावरूपमिति । त्रिगुणात्मकभावरूपत्वेऽपीदमित्थमेवेति पिण्डीकृत्य प्रदर्शयितुं न शक्यत इत्याह यत्किञ्चिदिति । किमप्यघटितघटनापटीय इत्यर्थः । अनिर्वचनीयानादिभावरूपाज्ञानसद्भावेऽनुभवमेवोदाहृत्य दर्शयति अहमज्ञ इति । अहमज्ञो मामहं न जानामीत्यपरोक्षावभास एव प्रमाणमित्यर्थः । तस्यैवोपष्टम्भकत्वेन श्रुतिमुदाहरति देवात्मशक्तिमिति ॥ ६ ॥

अज्ञानं विभजत इदमिति । वस्तुतोऽज्ञानस्यैकत्वेऽपि समष्ट्यभिप्रायेणैकमिति व्यवह्रियते व्यष्ट्यभिप्रायेणानेकमित्यर्थः । एतदेव प्रपञ्चयितुं प्रतिजानीते तथाहीति । यथा बहूनां वृक्षाणां समुदायविवक्षया वनमित्ये-

---

1. ACGJ. omit अनन्त. 2. See Notes. 3. *S'vet.* 1. 3.

---

१. *S'vet.* 4. 5. २. *Gītā* vii. 14.

व्यपदेशो यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशो"ऽजामेकां" इत्यादिश्रुतेः[1]। इयं समष्टिरुत्कृष्टोपाधितया[2] विशुद्धसत्त्वप्रधाना । एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी[3] जगत्कारणमीश्वर[4] इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् । "यः सर्वज्ञः सर्ववित्" इति श्रुतेः[5] । ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिरत एव

कत्वव्यपदेशो यथा वा बहुनद्यादिजलानां समुदायविवक्षया जलाशय इत्येकत्वव्यपदेशस्तथान्तःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायविवक्षयाज्ञानमित्येकत्वव्यपदेश इत्यर्थः । अस्मिन्नर्थे श्रुतिं प्रमाणयति अजामिति । नानाजीवगतनिकृष्टान्तःकरणव्यष्ट्युपाध्यपेक्षया समष्ट्युपाधेरस्य वैलक्षण्यं दर्शयति इयं समष्टिरिति । विगतरागादिदोषसकलकार्यप्रपञ्चस्य जगत्कारणभूतस्याज्ञानस्य समष्टिभूतोत्कृष्टोपाधित्वेन विशुद्धसत्त्वप्राधान्यमिति भावः । एतत्समष्ट्युपाधिद्वारेणेश्वरचैतन्यं लक्षयति एतदुपहितमिति । एतत्समष्ट्यज्ञानोपलक्षितं चैतन्यं सर्वस्य चराचरात्मकप्रपञ्चस्य साक्षित्वेन सर्वज्ञ इत्युच्यते । सर्वेषां जीवानां कर्मानुरूपेप्सितफलदातृत्वेनेश्वर इत्युच्यते । तथा सर्वेषां जीवानामन्तर्हृदये स्थित्वा बुद्धिनियामकत्वेनान्तर्यामीत्युच्यते । सर्वस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन जगत्कारणत्वमिति व्यपदिश्यत इत्यर्थः । उक्तेऽर्थे युक्तिमाह सकलेति । अत्र प्रमाणमाह यः सर्वज्ञ इति । इदानीं तस्यैवेश्वरस्य समुदायोपाधिरेव कारणशरीरत्वमानन्दमयकोशत्वं सुषुप्त्यवस्थावैशिष्ट्यं च लभत इत्याह ईश्वरस्येति । कारणशरीरत्वे हेतुमाह अखिलेति । आनन्दमयत्वे हेतुमाह आनन्दप्रचुरत्वादिति । कारणत्वावस्थायां प्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलसूक्ष्मकार्यप्रपञ्चस्यैवाभावादानन्दबाहुल्यमिति । कोशत्वे युक्तिमाह आच्छादकत्वादिति । शरीराच्छादकचर्मवदात्माच्छादकत्वादज्ञानस्य कोश इति व्यवहार इत्यर्थः । ननु तथापि कारणत्वोपाधेरज्ञानस्य सुषुप्तित्वं कुत

---

1. *S'wet.* 4. 5. 2. See Notes. 3. °गुणकं सदव्य° DGH. 4. See Notes. 5. *Mund.* 1. 1. 9.

स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते । यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशो यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेश "इन्द्रो मायाभिः पुरुरूप ईयत" इत्यादिश्रुतेः[1] । अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः । इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यमल्पज्ञत्वा[2]नीश्वरत्वादिगुणकं प्राज्ञ[3] इत्युच्यत एकाज्ञानावभा-

---

इत्यत आह सर्वोपरमत्वादिति । सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात्सुषुप्तित्वमित्यर्थः । ननु स्थूलसूक्ष्मप्रपञ्चलयस्थानस्य कथं सुषुप्तित्वमित्याशङ्क्य संज्ञाभेदो न वस्तुभेद इत्याह अत एव स्थूलेति । यतः कारणात्सुषुप्तित्वमत एव पञ्चीकृतभूतकार्यस्य स्थूलप्रपञ्चस्य जाग्रदवस्थाविशिष्टस्यापञ्चीकृतभूतकार्यस्य सूक्ष्मस्वाप्नप्रपञ्चस्य च लयस्थानमित्यपि व्यवह्रियत इत्यर्थः । समष्टिरूपाज्ञानं सप्रपञ्चं निरूप्येदानीं व्यष्टिभूतमज्ञानं सप्रपञ्चं निरूपयितुं दृष्टान्तौ तावद्दर्शयति यथा वनस्येति । यथा बहुवृक्षसमुदायस्य वनत्वेन रूपेणैकत्वव्यवहारेऽपि प्रत्येकवृक्षविवक्षया चूतादयो बहवो वृक्षास्तिष्ठन्तीति बहुत्वव्यवहारो यथा वा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारेऽपि प्रत्येकं वाप्यादिविवक्षया बहूनि जलानि तिष्ठन्तीति बहुत्वव्यवहारस्तथा सकलप्रपञ्चकारणस्याज्ञानस्य समुदायरूपेणैकत्वेऽप्यहङ्कारादिकारणीभूतानां जीवगताज्ञानानां प्रत्येकविवक्षया बहुत्वव्यवहार इत्यर्थः । अस्मिन्नर्थे श्रुतिं प्रमाणयति इन्द्र इति । ननु तथाप्येकस्यैवाज्ञानस्य तदवच्छिन्नचैतन्यस्य वा व्यष्टिसमष्टिता कुत इत्यत आह अत्र व्यस्तेति । भेदविवक्षया व्यष्टित्वं मृद्घटादिवत् । अभेदविवक्षया च समष्टित्वं मृत्पिण्डवदित्यर्थः । तत्र महाप्रलयकालीनसमष्टिभूतविशुद्धसत्त्वप्रधानाया मूलप्रकृतेः सकाशाद्दैनन्दिनप्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रकृतेर्भेदं दर्शयति इयं व्यष्टिरिति । इयं जीवगता सुषुप्त्यवस्थापन्नाहङ्कारादिविक्षेपसंस्कारादिरूपा निकृष्टोपाधित्वेन मलिनसत्त्वप्रधानेत्यर्थः । अनेनोपाधिना प्राज्ञचैतन्यं लक्षयति एतदुपहितमिति । अत्रोपपत्तिमाह एकाज्ञानेति । ईश्वरगतमूलाज्ञानस्य जीवगताहङ्कारादिविक्षेपसंस्कारादिरूपाज्ञानस्य च वस्तुत एकत्वेन तदवभासकेश्वरजीवचैतन्ययोरप्येकत्वमित्यर्थः । सौषुप्तजीव-

---

1. *Rigveda* 6. 47. 18. 2. 'त्वाद' BCDEFJK. 3. See Notes.

सकत्वात्। अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात् अस्यापीयमहङ्कारादिकारणत्वात्कारणशरीरमानन्दप्रचुरत्वात्[1]कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानमिति चोच्यते ॥ ७ ॥

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवत "आनन्दभुक् चेतोमुखः प्राज्ञ" इति

चैतन्यस्य प्राज्ञत्वं साधयति अस्य प्राज्ञत्वमिति । संस्काररूपास्पष्टोपाधितया तदावृतत्वेनातिप्रकाशकत्वाभावात्प्राज्ञत्वमस्येत्यर्थः । यथा जगत्कारणेश्वरोपाधेः कारणशरीरत्वमानन्दप्रचुरत्वेन चानन्दमयत्वं कोशदृष्टान्तेन च कोशत्वं तथैतत्सर्वं तारतम्येन प्राज्ञचैतन्येऽप्यतिदिशति अहङ्कारादीति । प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वरमूलप्रकृतिवत्सुषुप्तिकालेऽहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वमिन्द्रियतद्विषयाभावेन व्यासङ्गाभावादानन्दबाहुल्यादानन्दमयत्वमात्माच्छादकत्वात्कोशत्वं च युक्तमिति भावः । ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्ववत्संज्ञाभेदो न वस्तुभेद इति वक्तुं तत्र युक्तिमाह सर्वोपरमत्वादिति । पञ्चीकृतस्थूलशरीरस्य व्यावहारिकस्यापञ्चीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविलापितत्वात्तस्यापि प्रातिभासिकस्य स्वाग्रप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात्सर्वोपरतिरित्यर्थः । तथा चोक्तम्[2]—"लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरङ्गके । तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा । व्यावहारिकजीवस्य लयः स्यात्प्रातिभासिके । तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणी"ति ॥ ७ ॥

ननु प्रलयकाले सुषुप्तिकाले चान्तःकरणतद्वृत्त्यभावेनानन्दग्राहकाभावादानन्दप्राचुर्यसद्भावे प्रमाणाभावमाशङ्क्य परिहरति तदानीमिति । यथा स्वच्छत्वेनान्तःकरणस्य वृत्तिरङ्गीक्रियते तथा चैतन्यप्रदीप्ताज्ञानस्यापि सूक्ष्मा वृत्तयः स्वीक्रियन्ते । तथा चेश्वरः स्वकीयाज्ञानवृत्तिभिः स्वात्मानन्दबाहुल्यं तारतम्येनानुभवतीति भावः । अत्रैवोपष्टम्भकत्वेन श्रुतिमवतारयति आनन्द-

---

1. Rāmatīrtha reads °प्रचुरत्वादेव.

---

१. *Vākyasudhā*. 46, 47.

श्रुतेः[1] सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च । अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाभेदः । एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वाभेद "एष सर्वेश्वर" इत्यादिश्रुतेः[2] ॥ ८ ॥

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते "शिवमद्वैतं

भुगिति । उत्तरकालीनसुखपरामर्शोपपत्तिरपि पूर्वानुभूतसुखबाहुल्यानुभवसद्भावे प्रमाणमित्याह सुखमिति । सुखमहमस्वाप्समित्यानन्दपरामर्शः । न किञ्चिदवेदिषमित्यज्ञानपरामर्शः । तथाच सुषुप्तिदशायां प्रलयकाले च प्राज्ञेश्वरावज्ञानवृत्तिभिरानन्दमनुभवत एवेत्यर्थः । इदानीमीश्वरगतमूलाज्ञानस्य जीवगतसंस्कारमात्रावशिष्टाज्ञानस्य च समष्टिव्यष्ट्यभिप्रायेण भेदभानेऽपि वस्तुभेदो नास्तीत्येतत्सदृष्टान्तमाह अनयोरिति । उक्तोपाधिद्वयद्वारेणेश्वरप्राज्ञयोरप्यभेदं दृष्टान्तमुखेन दर्शयति एतदुपहितयोरिति । ईश्वरस्य वनावच्छिन्नाकाशवत्प्राज्ञस्य वृक्षावच्छिन्नाकाशवच्च तथा स्थूलजलाशयोपाध्यवच्छिन्नाकाशवत्तद्गतप्रतिबिम्बाकाशवच्च कारणोपाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञस्य च वस्तुतोऽभेद एवेत्यर्थः । तत्र प्रमाणमाह एष इति । तथा चोक्तमाचार्यैः—"कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः । कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यत" इति ॥ ८ ॥

उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ सम्प्रपञ्च्य निरूप्येदानीमनवच्छिन्नं तुर्यं यच्चैतन्यं तल्लक्षयति वनवृक्षेति । यथा स्थूलवनोपाध्यवच्छिन्नाकाशापेक्षया सूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य तदुभयाधारतयानवच्छिन्नत्वाच्च तुरीयत्वं तथा कार्यकारणोपाधितदवच्छिन्नचैतन्यद्वयापेक्षया तदाधारभूतं यदनवच्छिन्नं सर्वव्यापि चैतन्यं विशुद्धं तुरीयमुच्यत इत्यर्थः ।

---

1. *Māṇḍū.* 5. 2. *Māṇḍū.* 6. 3. "जलगत" ABCEFJK. 4. See Notes.

---

१. So C. only; EFJKL. "परामर्शानुप०". २. *Anubhūtiprakāśa* x. 61.

चतुर्थं मन्यन्त" इत्यादिश्रुतेः[1] । इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तत्तायःपिण्डवद्विविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ॥ ९ ॥

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम्[2] । आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम् । तदुक्तम्[3]—

अस्य चैतन्यस्य तुरीयत्वं वक्ष्यमाणविश्वाद्यपेक्षयेति द्रष्टव्यम् । अस्मिन्नर्थे श्रुतिं संवादयति शिवमिति । आदिपदात् "त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव" इत्यादिश्रुत्यन्तरसङ्ग्रहः । एतदेव विशुद्धचैतन्यं तदेव पूर्वोक्तचैतन्यद्वयेन सहैकत्वविवक्षायां महावाक्यस्य वाच्यत्वं लभते भेदविवक्षायां च लक्ष्यत्वं लभत इत्याह इदमेवेति । त्रयाणां चैतन्यानां चैतन्येन रूपेणैकत्वेऽप्यवच्छिन्नावच्छिन्नत्वेन रूपेण वाच्यलक्ष्यत्वे सम्भवत इत्यर्थः ॥ ९ ॥

अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुण्ठितप्रकाशत्वं कथं वासङ्गोदासीनस्यात्मन आकाशादिप्रपञ्चजनकत्वमित्येतन्महाविरोधपरिहारायाज्ञानस्य शक्तिद्वयं निरूप्यते अस्याज्ञानस्येति । ते एव नामतो निर्दिशति आवरणेति । सच्चिदानन्दस्वरूपमावृणोतीत्यावरणशक्तिः । ब्रह्मादिस्थावरान्तं जगज्जलबुद्बुदवन्नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः । नन्वपरिच्छिन्नस्य प्रकाशचिद्रूपाखण्डपरिपूर्णस्वरूपस्यात्मनः परिच्छिन्नेनानित्येन जडतमोरूपेणाव्यापकेनाज्ञानशक्तिविशेषेण कथमावरणमित्याशङ्क्य वस्तुतोऽज्ञानस्यात्माच्छादकत्वाभावेऽपि प्रमातृबुद्धिमात्राच्छादकत्वेनाज्ञानस्यात्माच्छादकत्वमुपचारादुच्यत इत्याह आवरणेति । यथात्यल्पोऽपि मेघोऽनेकयोजनविस्तीर्णमादित्यमण्डलमवलोकयितृपुरुषदृष्टिमात्राच्छादकत्वेनाच्छादयतीत्युपच-

---

1. *Māṇḍū.* 7. 2. See Notes. 3. *Hastāmalaka,* 10.

---

१. This sentence in JK. only. २. This clause in JKL. only. It was probably taken from Rāmatīrtha's commentary. ३. *Kaivalya.* 18.

"घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवज्ज्ञाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा" इति ॥

अनयैवावरणशक्त्यावच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसंसारभावनापि सम्भाव्यते यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना । विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम् । तदुक्तम्[1]—

"विक्षेपशक्तिर्लिङ्गादि
ब्रह्माण्डान्तं जगत्सृजेदि"ति ॥ १० ॥

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं

र्यते तथातितुच्छं परिच्छिन्नमप्यज्ञानं प्रमातृबुद्धिमात्राच्छादकत्वेनात्मानमाच्छादयतीत्युपचारादुच्यत इत्यर्थः । अस्मिन्नर्थे वृद्धसम्मतिमाह तदुक्तमिति । इयमेवावरणशक्तिरात्मनो भेदबुद्धिजनकत्वेन संसारहेतुरिति भावः । अत्रानुरूपं दृष्टान्तमाह यथेति । यदुक्तमसङ्गोदासीनस्यात्मनः कथं जगत्कारणत्वमिति तन्निराकर्तुं विक्षेपशक्तिस्वरूपमाह विक्षेपेति । यथा रज्जुविषयकमज्ञानं सर्पमुत्पादयति तथात्मविषयकमज्ञानमपि स्वावच्छिन्न आत्मनि विक्षेपशक्तिप्रभावेनाकाशादिप्रपञ्चमुद्भावयत्युत्पादयतीत्यर्थः । अस्मिन्नर्थे ग्रन्थान्तरसम्मतिं दर्शयति तदुक्तमिति ॥ १० ॥

ननु किमात्मा चराचरात्मकप्रपञ्चस्य निमित्तकारणमुपादानकारणं वा । नाद्यो दण्डादिवत्स्वकार्यव्यापित्वं न स्यादात्मनः "तत्सृष्ट्वा तदेवानुप्राविशत्"[1] इतिश्रुत्या स्वकार्यव्यापित्वश्रवणात् । न द्वितीयोऽचेतनस्य जडस्य प्रपञ्चस्य चैतन्योपादानकत्वासम्भवात् । उपादानत्वेन च कार्यकारणयोरभेदेन प्रपञ्चस्यापि चैतन्यरूपत्वप्रसङ्गादनित्यत्वं न स्यादित्याशङ्क्य जडप्रपञ्चं प्रत्यात्मनश्चैतन्य-

---

1. *Vākyasudhā*, 13.

---

१. *Tait.* 2. 6. 1.

स्वोपाधिप्रधानतयोपादानं च भवति । यथा लूता[1] तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति ॥ ११ ॥

प्राधान्येन निमित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं च सम्भवतीत्याह शक्तिद्वयवदिति । यथायस्कान्तसन्निधाने जडमयं लोहं चेष्टते तथा चैतन्यसन्निधाने जडमयमज्ञानं चेष्टत इत्यज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वम् । जडाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविन ईश्वरस्यापि परम्परयोपचारादुपादानत्वं न विरुध्यत इत्यर्थः । यदुक्तं चैतन्यस्य निमित्तकारणत्वे कार्यानुप्रवेशो न स्यादिति तन्न । कारणस्य कार्यानुप्रवेशनियमस्योपादानकारणविषयत्वेन निमित्तकारणविषयत्वाभावात् । "तत्सृष्ट्वा"[2] इत्यादिश्रुतेरप्युपादानकारणपरत्वात् । यद्यप्युक्तमात्मन उपादानकारणत्वे प्रपञ्चस्यानित्यत्वं न स्यादिति तदपि न तस्य परिणामविषयत्वेन विवर्तविषयत्वाभावात्प्रपञ्चस्य ब्रह्मविवर्तत्वाद्विवर्तत्वं च स्वस्वरूपापरित्यागेन स्वरूपान्तरप्रदर्शकत्वम् । यथा रज्जवच्छिन्नचैतन्यनिष्ठाज्ञानस्य रज्जुस्वरूपापरित्यागेन सर्पादिस्वरूपान्तरप्रदर्शकत्वं तथेश्वरचैतन्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्वरूपापरित्यागेनाकाशादिस्वरूपान्तराकारेण प्रदर्शकत्वम् । एतावताकाशादिप्रपञ्चस्य नित्यत्वं न सम्भवत्यज्ञानस्य मिथ्यारूपत्वेन तज्जन्याकाशादिप्रपञ्चस्यापि मिथ्यात्वात् । न चैवमज्ञानस्य मिथ्यात्वे तत्प्रयुक्तबन्धमोक्षयोरपि मिथ्यात्वप्रसङ्ग इति वाच्यमिष्टापत्तेः । तदुक्तं भागवते[3]—"बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्" । इत्यलमतिविस्तरेण । एवंस्वात्मनो निमित्तोपादानकारणत्वे दृष्टान्तमाह यथा लूतेति । यथा लूता[1] स्वोत्पाद्यमानं तन्तुलक्षणं कार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं चैतन्यसन्निधानव्यतिरेकेण जडस्य देहस्य मृतशरीरवत्तन्तुजनकत्वासम्भवात्स्वशरीरप्राधान्येनोपादानं च भवति । अशरीरस्य साक्षात्तन्तुजनकत्वासम्भवाच्छरीरस्य साक्षात्तन्तूपादानत्वेन तदवच्छिन्नचैतन्यस्याप्युपादानत्वेनोपचारात् । एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपादानत्वं च भवतीत्यर्थः ॥ ११ ॥

---

1. लूतातन्तुः स्वकार्यं CEFJK. and originally B.

---

१. *Tait.* 2. 6. 1. २. xi. 11. 1. ३. The Mss. add तन्तुः after लूता. The Calc. edition inserts जन्तुः.

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इत्यादिश्रुतेः[1]। तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ॥ १२ ॥

इदानीं विक्षेपशक्तिकृत्यमाह तमःप्रधानेति। आकाशादेर्जडत्वात्तमोगुणप्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्नचैतन्यस्यैवाकाशादिप्रपञ्चजनकत्वमिति भावः । अस्मिन्नर्थे श्रुतिं प्रमाणयति एतस्मादिति । एतेनार्थात्सांख्यनैयायिकपक्षौ निरस्तौ । शक्तेरज्ञानस्य शक्तिमत्परतन्त्रत्वात् । स्वतन्त्रस्य तस्य केवलस्य जडस्याज्ञानस्य जगत्कारणत्वानुपपत्तेः । "ईक्षतेर्नाशब्दम्", "रचनानुपपत्तेश्च नानुमानम्" इत्यादिन्यायनिरस्तत्वाच्च । परमाणोरप्युक्तदोषप्रासत्रासानपायात्। अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति", "सदेव सोम्येदमग्र आसीत्", "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च", "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते", "बीजं मां सर्वभूतानाम्" इत्यादिश्रुतिस्मृतिभिरीश्वरस्यैव जगत्कारणत्वप्रतिपादनात्। नन्वाकाशादिप्रपञ्चोत्पादकचैतन्यावच्छेदकाज्ञाने कुतस्तमःप्राधान्यमित्याशङ्क्याह तेषु जाड्येति । "कारणगुणा हि कार्यगुणानारभन्त" इति न्यायादिति भावः । ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणमात्रप्राधान्येनाकाशादिजनकत्वमित्याशङ्क्याह— तदानीमिति। तदानीमुत्पत्तिवेलायां सत्त्वादयस्त्रयोऽपि गुणास्तारतम्येन कारणगुणप्रक्रमन्यायेन तेष्वाकाशादिषु पञ्चभूतेषूत्तरोत्तराधिक्येन जायन्त इत्यर्थः । इमान्येव सूक्ष्मशरीरादिकारणभूतान्यपञ्चीकृतानि सूक्ष्मरूपपञ्चभूततन्मात्राणीत्युच्यन्त इत्याह एतानीति । तदुक्तम्—"पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वि-

---

1. *Tait.* 2. 1. 1.

---

१. See Notes. २. *Brahmasūtra* 1. 1. 5. ३. *Idem.* 2. 2. 1. ४. *Tait.* 3. 1. 1. ५. *Chhā.* 6. 2. 1. ६. *Muṇḍ.* 2. 1. 3. ७. *Gītā.* x. 8. ८. *Gītā.* vii. 10. ९. *Tarkabhāṣā* (Benares, 1901) p. 114. See Notes. १०. See Notes. ११. S'ankara's *Ātmabodha*, 12.

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि । एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते । बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः । मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः । अनयोरेव चित्ताहङ्कारयोरन्तर्भावः । एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् । इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति । अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभि-

---

तम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" । इति वचनादप्यपञ्चीकृतभूतेभ्योऽपञ्चीकृतसूक्ष्मशरीराणि पञ्चीकृतस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यन्त इत्याह एतेभ्य इति ॥ १२ ॥

सूक्ष्मशरीरस्वरूपभूतानवयवानाह अवयवास्त्विति । सात्त्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते सात्त्विकांशाद्वायोस्त्वगिन्द्रियं सात्त्विकांशात्तेजसश्चक्षुः सात्त्विकांशाज्जलाज्जिह्वा सात्त्विकांशायाः पृथिव्याः सकाशाद् घ्राणेन्द्रियं चेति क्रमेणोत्पद्यन्त इत्याह एतानीति । बुद्धेर्लक्षणमाह बुद्धिर्नामेति । ब्रह्मैवाहमिति निश्चयात्मिकान्तःकरणवृत्तिरेव बुद्धिरित्यर्थः । मनसो लक्षणमाह मनो नामेति । अहं चिद्रूपो देहो वेति संशयात्मिकान्तःकरणवृत्तिरेव मन इत्यर्थः । स्मरणात्मकचित्तस्य गर्वात्मकाहङ्कारस्य च बुद्धिमनसोरन्तर्भाव इत्याह अनयोरेवेति । यद्यप्यन्तःकरणत्वेन चतुर्णामेकत्वं तथाप्येकस्यैव पुरुषस्य पाचकः पाठक इत्यादिवृत्तिभेदाद्भेदवदेकस्याप्यन्तःकरणस्य निश्चयसंशयस्मरणाहङ्कारविषयभेदैर्बुद्ध्यादिभेद इत्यर्थः । बुद्ध्यादीनामुत्पत्तिप्रकारं दर्शयति एते पुनरिति । एतेषां चतुर्णां सात्त्विकांशेभ्यो भूतेभ्य उत्पत्तौ निमित्तमाह एतेषामिति । बुद्ध्यादीनां प्रकाशात्मकत्वात्सात्त्विकांशभूतकार्यत्वमित्यर्थः । बुद्धेर्विज्ञानमयकोशत्वं दर्शयति इयं बुद्धिरिति । बुद्धेः सत्त्वकार्यत्वाज्ज्ञानेन्द्रियसाहित्येन प्रकाशाधिक्याद्विज्ञानमयत्वम् । आत्माच्छादकत्वाच्च कोशत्वमित्यर्थः । विशुद्धबुद्धिप्रतिबिम्बितचिदात्मनो जीवत्वं दर्शयति अयं कर्तृत्वेति । तप्तायःपिण्डवद्बुद्ध्यारोपितं चैतन्यं वस्तुतोऽकर्तृभोक्तृनित्यानन्दापरिच्छिन्नमक्रियमपि भोक्तृत्वकर्तृत्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलोकान्तरगामित्वं व्यावहारिक-

मानत्वेनेहलोकपरलोकगामी व्यावहारिको जीव[1] इत्युच्यते । मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति । कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि । एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते । वायवः प्राणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती । अपानो नामावाग्गमनवान्पायवादिस्थानवर्ती । व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती । उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः । समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः

जीवत्वं च लभत इत्यर्थः । मनोमयकोशं निरूपयति मनस्त्विति । सत्त्वगुणप्रधानं मनः सत्त्वगुणांशेभ्यो जातं श्रोत्रादिज्ञानेन्द्रियैरेव सहितं सन्मनोमयकोश इत्यर्थः । अत्र तु मनसः सत्त्वोपहितरजोविकारेच्छारूपत्वात्सङ्कल्पविकल्पात्मकत्वेन बुद्ध्यपेक्षया जाड्याधिक्यान्मनोमयत्वमात्माच्छादकत्वात्कोशत्वमिति भावः । कर्मेन्द्रियाण्युद्दिशति कर्मेन्द्रियाणीति । एतेषामुत्पत्तौ साधनापेक्षायामाह एतानीति । भूतानां त्रिगुणत्वेऽपि रजोगुणबहुलेभ्यो भूतेभ्यो वागादीनि पृथक्पृथक् क्रमेण जायन्ते । रजोगुणप्रधानादाकाशाद्वागुत्पद्यते रजोगुणप्रधानाद्वायोः पाणीन्द्रियं रजोगुणप्रधानादग्नेः पादेन्द्रियं रजोगुणप्रधानाज्जलात्पायिन्द्रियं रजोगुणप्रधानायाः पृथिव्या गुह्येन्द्रियमुत्पद्यत इत्यर्थः । वायूनुद्दिशति वायव इति । यथोद्देशं प्राणस्य लक्षणमाह प्राणो नामेति । ऊर्ध्वगमनशीलो नासाग्रस्थायी वायुः प्राण इत्यर्थः । अपानस्य लक्षणमाह अपानो नामेति । अधोगमनशीलः पायवादिस्थायी वायुरपान इत्यर्थः । व्यानस्य लक्षणमाह व्यानो नामेति । सर्वनाडीगमनशीलोऽखिलशरीरस्थायी वायुर्व्यान इत्यर्थः । उदानस्य लक्षणमाह उदानो नामेति । ऊर्ध्वमुत्क्रमणशीलः कण्ठस्थायी वायुरुदान इत्यर्थः । समानस्य लक्षणमाह समानो नामेति । शरीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः । प्राणादीनां वायुत्वेन रूपेणैकत्वेऽपि क्रियाभेदेन भेद

---

1. See Notes.

---

१. So all the Mss.; but the Calcutta edition वागादिकर्मे.

सन्तीति वदन्ति । तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकलः क्षुत्करः । देवदत्तो जृम्भणकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात्प्राणादयः पञ्चैवेति केचित् । एतत्प्राणादिपञ्चकमाकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति । अस्य क्रियात्मकत्वेन रजोंशकार्यत्वम् । एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्यरूपः । योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति । एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते ॥ १३ ॥

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशय-

इत्यर्थः । कापिलमतानुसारिणः क्रियाभेदेनान्येऽपि पञ्च वायवः सन्तीति वदन्तीत्याह केचित्त्विति । तान्येव नामानि निर्दिशति नाग इत्यादि । तथा चोक्तम्—"उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः । कृकलस्तु क्षुति ज्ञेयो देवदत्तो विजृम्भणे । न जहाति मृतं चापि सर्वव्यापी धनंजय" इति । वेदान्तिनस्तु नागादीनां प्राणादिष्वन्तर्भावं वदन्तीत्याह एतेषामिति । प्राणादिवायूनामुत्पत्तौ कारणापेक्षायामाह एतत्प्राणादीति । अपञ्चीकृतपञ्चमहाभूतेभ्यो रजःप्रधानेभ्यः प्राणादयो जायन्त इत्यर्थः । एतेषां प्राणादीनां प्राणप्रचुरत्वात्प्राणमयत्वमात्मनाच्छादकत्वात्कोशत्वं च भवतीत्याह इदं प्राणादीति । प्राणादीनां रजःप्रधानभूतकार्यत्वे निमित्तमाह अस्येति । प्राणादीनां क्रियात्मकत्वाद्रजःकार्यत्वमित्यर्थः । एतेषु पञ्चसु कोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्तृकरणक्रियारूपत्वं दर्शयति एतेष्विति । तत्र हेतुमाह योग्यत्वादिति । इदमेव कोशत्रयं सूक्ष्मशरीरमिति व्यवह्रियत इत्याह एतत्कोशेति ॥ १३ ॥

अस्य समष्टित्वे हेतुमाह अत्रापीति । एकबुद्धीति । चराचरप्राणि-

---

1. उद्गीर० CDEFHJK.

---

१. *Goraksas'ataka* 35, 36.

वद्वा समष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च । अस्यैषा समष्टिः । स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते । एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् । अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलशरीरलयस्थानमिति चोच्यते । एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः "प्रविविक्तभुक्तैजस"

मात्रस्य यावन्त्यनन्तानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन स्वीयैकबुद्ध्या विषयीकृतत्वात्समष्टित्वमित्यर्थः । तत्र दृष्टान्तमाह वनवदित्यादि । अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्शयति अनेकेति । अनेकेषां जीवानां प्रत्येकं स्वस्वलिङ्गशरीरस्य स्वस्वबुद्धिविषयत्वेनानेकबुद्धिविषयतया व्यष्टित्वमित्यर्थः । तत्र दृष्टान्तमाह वृक्षवदित्यादि । उक्तसमष्ट्यवच्छिन्नचैतन्यस्य सूत्रात्मत्वादिसंज्ञां दर्शयति एतत्समष्टीति । तत्र हेतुमाह सर्वत्रेति । हेत्वन्तरमाह ज्ञानेति । ज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः । विज्ञानमयादिकोशत्रयस्य सूक्ष्मशरीरतां दर्शयति अस्यैषेति । अस्य सूत्रात्मकहिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरमस्य स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वादित्यर्थः । अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाह जाग्रदिति । विराड्रूपेणानुभूतस्थूलप्रपञ्चविषयकवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः । अत एवेति । यतः स्वप्नत्वं सूक्ष्मत्वं चात एव स्थूलप्रपञ्चलयस्थानमित्युच्यत इत्यर्थः । विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिरण्यगर्भत्वं प्रतिपाद्येदानीं तद्व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति एतद्व्यष्टीति । व्यष्टिरूपं विज्ञानमयादिकोशत्रयं तैजसस्यापि सूक्ष्मशरीरमिति दर्शयति अस्यापीति । सूक्ष्मशरीरत्वे हेतुमाह स्थूलेति । अस्यापि स्वप्नत्वे हेतुमाह जाग्रदिति । विश्वचैतन्येनानुभूतस्थूलशरीरविषयकवासनामयत्वात्स्वप्नत्वमित्यर्थः । अस्यैव सूक्ष्मशरीरस्य स्थूलशरीरलयस्थानत्वे युक्ति-

इत्यादिश्रुतेः[1] । अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवच्चद्गतप्रतिबिम्बाकाशवच्चाभेदः । एवं सूक्ष्मशरीरोत्पत्तिः ॥ १४ ॥

स्थूलभूतानि तु पञ्चीकृतानि । पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पञ्च भागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम् । तदुक्तम्[2]—

माह अत एवेति । यथा पूर्वं प्राज्ञेश्वरावज्ञानवृत्तिभिः सुषुप्त्यवस्थायामानन्दमनुभवतस्तथा हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान् शब्दादिविषयाननुभवत इति दर्शयति एतावितिं । अस्मिन्नर्थे श्रुतिमुदाहरति प्रविविक्तेति । इहापि विज्ञानमयादिकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदवच्छिन्नतैजसचैतन्यस्य च वनवृक्षादितदवच्छिन्नाकाशादिदृष्टान्तमुखेनाभेदं दर्शयति अत्रापीति । समष्टिव्यष्ट्युपाध्योर्वनवृक्षवज्जलाशयजलवच्चाभेद उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिम्बाकाशवच्चाभेद इत्यर्थः । सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति एवं सूक्ष्मेति ॥ १४ ॥

अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितुमुपक्रमते स्थूलेति । तुशब्दः पूर्वस्माद्वैषम्यं द्योतयति पञ्चीकृतानीति । अपञ्चीकृतसूक्ष्मभूतापेक्षया स्थूलभूतानि पञ्चीकृतानीत्यर्थः । पञ्चीकरणमेव प्रतिपादयितुं प्रतिजानीते पञ्चीकरणं त्विति । पञ्चीकरणप्रकारमेवाह आकाशेति । अयमर्थः । सृष्टिकाले सकलप्राण्यदृष्टवशादीश्वरप्रेरणयाकाशवायुतेजोबन्नान्यविद्यासहायभूतात्परमात्मनः सकाशादनुक्रमजातानि तान्यपञ्चीकृतानि सूक्ष्माणि व्यवहारासमर्थानीति कृत्वा तदीयस्थौल्यापेक्षायां व्यवहर्तृप्राणिजातधर्माधर्मापेक्षयैव तान्येव भूतानि पञ्चीकृतानि भवन्ति । तानि च प्रत्येकं द्वैविध्यमापद्यन्ते । तेष्वाकाशादिषु दशसु भागेषु प्राथमिकान्पञ्चभागान्प्रत्येकं चतुर्धा समं विभज्य स्वार्धपरित्यागेन चतुर्णां प्रत्येकं भागान्तरेषु सन्निवेशेन पञ्चीकृतानि स्थूलानि

---

1. *Māṇḍū.* 3. 2. *Pañchadasī* i. 27.

"द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्चपञ्च ते" इति ॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च "वैशेष्यात्[1]तद्वादस्तद्वाद" इति[2]न्यायेनाकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावग्नौ शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ॥ १५ ॥

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरिविद्यमानानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधोविद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति । चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि । जरायुजानि जरायुभ्यो

भवन्तीति । अस्मिन्नर्थे वृद्धसम्मतिमाह तदुक्तमिति । पञ्चीकरणस्य त्रिवृत्करणप्रतिपादकश्रुत्यन्तरविरोधमाशङ्क्य परिहरति अस्येति । भूतत्रयसृष्टिश्रुतौ सृष्टिपरिपूर्त्यर्थमन्यत्राश्रुतमपि भूतद्वयमाश्रित्य भूतपञ्चकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनादविरोध इत्यर्थः । आकाशादिपञ्चभूतेषु चतुर्धा विभक्तानामन्येषां पञ्चभूतानां प्रत्येकानुप्रवेशेन पञ्चीकृतानामाकाशादीनां पञ्चात्मकत्वाविशेषादाकाशादिव्यपदेशो न स्यादित्याशङ्क्य परिहरति पञ्चानामिति । आकाशादीनां पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु पञ्चभूतेषु तद्विशेषानुप्रवेशात्तन्नामभिर्व्यवहारः सम्भवतीत्यर्थः । तदानीमिति । यदा पञ्चीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वस्वकार्योत्पादनसमर्थत्वादाकाशेऽव्यक्तरूपेण स्थितः शब्दोऽभिव्यज्यते व्यक्तो भवतीत्यर्थः ॥ १५ ॥

उक्तेभ्यो भूतेभ्यश्चतुर्दशभुवनोत्पत्तिप्रकारं दर्शयति एतेभ्य इति । एतेभ्यो भूतेभ्यः समुत्पन्नब्रह्माण्डस्य चतुर्विधशरीराणां च तद्योग्यान्नपानादीनां

---

1. See Notes. 2. *Brahmasūtra.* 2. 4. 22.

---

१. F. only; CJKL. read °त्र.

जातानि मनुष्यपश्वादीनि । अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि कक्षवृक्षादीनि । स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि ॥ १६ ॥

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च । अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते । एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् । अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते । तदानीमेतौ विश्ववैश्वानरौ

चोत्पत्तिर्भवतीत्यर्थः । चतुर्विधशरीराण्युद्दिशति चतुर्विधेति । तानि च यथोद्देशं विवृणोति जरायुजानीति ॥ १६ ॥

पूर्ववदत्रापि समष्टिव्यष्टिभेदं दर्शयति अत्रापीति । चतुर्विधशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टित्वं प्रत्येकं तच्छरीरविषयतयानेकबुद्धिविषयत्वाद्व्यष्टित्वं च लभत इत्यर्थः । अधुना भूरादिचतुर्दशभुवनान्तर्गतचतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यस्य वैश्वानरत्वापरपर्यायं वैराजत्वं दर्शयति एतत्समष्टीति । तत्र युक्तिमाह सर्वेति । सर्वप्राणिनिकायेष्वहमित्यभिमानवत्त्वाद्वैश्वानरत्वं विविधं नानाप्रकारेण प्रकाशमानत्वाच्च वैराजत्वं लभत इत्यर्थः । अस्यैषेति । अस्य विराट्चैतन्यस्यैषा पूर्वोक्ता या ब्रह्माण्डान्तर्गतचतुर्विधस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः । अन्नविकारेति । अन्नविकारबाहुल्यादन्नमयत्वमात्माच्छादकत्वात्कोशत्वं स्थूलशरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरीरत्वमिन्द्रियैरर्थोपलब्धेश्च जाग्रदवस्थात्वं च घटत इत्यर्थः । चतुर्विधस्थूलशरीरसमष्ट्युपहितं चैतन्यं सप्रपञ्चमभिधायेदानीं तद्व्यष्ट्युपहितं चैतन्यमभिधत्ते एतद्व्यष्टीति । एतेषां चतु-

---

1. So ABCEFJK. 2. See Notes. 3. DG. omit च स्थूलशरीरं. 4. AEGHJK. read परित्यज्य. 5. ABCDH. insert स्थूलभोगायतनत्वात् whilst the other six omit it.

दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण[1] क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतो "जागरितस्थानो बहिःप्रज्ञ" इत्यादिश्रुतेः[2] । अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः । एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ॥ १७ ॥

एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान्प्र-

र्विधशरीराणां या व्यष्टिस्तत्तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं विश्व इत्युच्यत इत्यर्थः । तत्र हेतुमाह सूक्ष्मेति । सूक्ष्मलिङ्गशरीराभिमानमपरित्यज्य स्थूलशरीरेषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकमहमहमित्यभिमानवत्त्वाद्विश्वत्वमित्यर्थः । अस्यापीति । अस्य चैतन्यस्याप्येषा तत्तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिः सैव स्थूलशरीरमित्यर्थः । अत्राप्यन्नविकारबाहुल्यादन्नमयत्वं चैतन्याच्छादकत्वात्कोशत्वमिन्द्रियैरर्थोपलम्भाज्जाग्रत्वं च क्रमेण दर्शयति अन्नविकारेति । अधुना जाग्रदवस्थायां विश्ववैश्वानरयोस्तत्तद्देवताधिष्ठितश्रोत्रादिभिश्चतुर्दशभिः करणैः शब्दादिविषयग्रहणप्रकारं दर्शयति तदानीमेतावितिं । अस्मिन्नर्थे श्रुतिं संवादयति जागरितेति । अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्नाकाशदृष्टान्तेन जलाशयजलगतप्रतिबिम्बाकाशदृष्टान्तेन च पूर्ववदभेदं साधयति अत्राप्यनयोरिति । स्थूलप्रपञ्चोत्पत्तिमुपसंहरति एवं पञ्चीकृतेति ॥ १७ ॥

स्थूलसूक्ष्मकारणप्रपञ्चानां व्यष्टिभूतानां प्रत्येकविवक्षयावान्तरप्रपञ्चत्वमभिधायेदानीं तेषां समष्टेरेव महाप्रपञ्चत्वं दर्शयति एतेषामिति । तत्र दृष्टा-

---

1. See Notes. 2. *Māṇḍū.* 3.

---

१. CF. only; EJKL. 'नं परि०; Rāmatīrtha adopts the former.

पञ्चो भवति यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वावान्तरजलाशयानां समष्टिरेको महान् जलाशयः । एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चैकमेव । आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सदनुपहितं चैतन्यं "सर्वं खल्विदं ब्रह्म" इति वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति । एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ॥ १८ ॥

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते । अतिप्राकृतस्तु "आत्मा वै जायते पुत्र" इत्यादि-

---

न्तमाह यथावान्तरेति । यथा धवखदिरपलाशाद्यवान्तरवनानां समष्टिः समुदायविवक्षयैकं महद्वनं भवति यथा च वापीकूपतडागाद्यवान्तरजलाशयानां समुदायविवक्षयैको महान् जलाशयो भवति तथा स्थूलसूक्ष्मकारणावान्तरप्रपञ्चानां समुदाय एको महान्प्रपञ्चो भवतीत्यर्थः । एतदेवावान्तरमहाप्रपञ्चोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भाव्याकृतानां चावान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चाभेद इत्याह एतदुपहितमिति । चैतन्यप्रपञ्चयोर्भेदे "सर्वं खल्विदं ब्रह्म" इति श्रुत्या विरोधमाशङ्क्य परिहरति आभ्यामिति । उक्तमहत्प्रपञ्चतदवच्छिन्नचैतन्याभ्यां तप्तायःपिण्डवदन्योन्यतादात्म्याध्यासापन्नं यद्वस्तु श्रुतं तदवच्छिन्नं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवत्यन्योन्यतादात्म्याध्यासेन विविक्तं सल्लक्ष्यं भवतीत्यर्थः । अध्यारोपप्रकरणमुपसंहरति एवं वस्तुनीति ॥ १८ ॥

ईश्वरचैतन्ये सामान्यतो महाप्रपञ्चाध्यारोपप्रकारं सप्रपञ्चमभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोपप्रकारं दर्शयितुमुपक्रमते इदानीमित्यादिना । अध्यारोपमेवाह इदमिति । प्रत्यक्षादिसन्निहितस्यापत्यादिधर्मिण इदमिदमिति निर्देशः क्रियते । इदमिदमित्यादेर्वीप्सा । अतिस्थूलबुद्धिस्तु इदमपत्यादिकमेवाहमयं पुत्र एवाहमित्यत्यन्तबाह्यधर्मानविशेषेणात्मन्यध्यारोपयतीत्यर्थः ।

---

1. *Chhā.* 3. 14. 1. 2. Not in BEFHJK. 3. I cannot trace this. Rāmatīrtha, with D, reads "आत्मा वै पुत्रनामासि" (*Kaushī.* 2. 11.).

---

१. °त्यादेर्वीप्सा E. F.

श्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमय" इत्यादिश्रुतेः[1] प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति। अपरश्चार्वाकः[2] "ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः" इत्यादिश्रुतेः[3] इन्द्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति। अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणमय" इत्यादिश्रुतेः[4] प्राणाभाव इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति। अन्यस्तु चार्वाकः "अन्योऽन्तर आत्मा मनोमय" इत्यादिश्रुतेर्[5] मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति। बौद्धस्तु "अन्योऽन्तर आत्मा विज्ञानमय" इत्यादिश्रुतेः[6] कर्तुरभावे करणस्य शक्त्य-

---

अत्र श्रुतिमाह आत्मेति। तत्र युक्तिमाह स्वस्मिन्निवेति। यथा स्वशरीरे प्रेमदर्शनादात्मत्वभ्रम एवं स्वपुत्रादिशरीरेऽपि प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः। अत्रानुरूपमनुभवमाचष्टे पुत्र इति। एतदपेक्षया विशिष्टबुद्धिरन्यः कश्चिदधिकारी स्वदेहमेवात्मानं मन्यत इत्याह चार्वाक इति। अत्रापि श्रुतिमाह स वा इति। पुत्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन्पूर्वोक्ताधिकारिणः सकाशात्स्वस्य वैलक्षण्यं दर्शयति प्रदीप्तेति। देहस्यात्मत्वेऽनुभवं च प्रमाणयति—स्थूलोऽहमिति। ततोऽप्युत्कृष्टः कोऽप्यधिकारी श्रुतियुक्त्यनुभवेभ्य इन्द्रियाण्यात्मेति वदतीत्याह अपर इति। ततोऽप्युत्तमोऽधिकारी कश्चिच्छ्रुतिप्रमाणानुभवबलात्प्राण एवात्मेत्याह अपर इति। ततो विशिष्टोऽधिकारी कश्चित्स्वमतानुकूलश्रुत्यादिबलान्मन एवात्मेत्याह अन्यस्त्विति। उक्तेभ्यः पञ्चभ्यो विलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेत्याह

---

1. *Tait.* 2. 1. 1. See Note on Chārvākas. 2. अपरश्चार्वाकस्त्विह प्राणाः ACFJK. 3. *Chhā.* 5. 1. 7. 4. *Tait.* 2. 2. 1. 5. *Idem.* 2. 3. 1. 6. *Idem.* 2. 4. 1. See Note on Bauddhas.

भावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। प्राभाकरतार्किकौ तु "अन्योऽन्तर आत्मानन्दमय" इत्यादि-श्रुतेर्[1]बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञ[2]नीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः। भाट्टस्तु "प्रज्ञानघन एवानन्दमय" इत्यादि[3]श्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति। अपरो बौद्धः "असदेवेदमग्र आसीत्" इत्यादि[4]श्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ १९ ॥

एतेषां पुत्रा[5]दीनामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शना-

---

बौद्धस्त्विति। उक्तेभ्योऽतिरिक्तौ प्राभाकरतार्किकौ स्वमतोपयोगिश्रुत्यादिबलादज्ञानमात्मेति वदत इत्याह प्राभाकरेति। अज्ञानावच्छिन्नं चैतन्यमात्मेत्याह प्रज्ञानघन इति। बौद्धैकदेशी कश्चिच्छ्रुत्यादिभिः शून्यमात्मेति वदति अपरो बौद्ध इति ॥ १९ ॥

अधुना पुत्रादिशून्यपर्यन्तानामात्मत्वप्रतिपादकश्रुत्यादेराभासत्वात्पूर्वपूर्वमतस्योत्तरोत्तरमतबाध्यत्वाच्च दृश्यत्वजडत्वादिहेतुकदम्बकैश्चानात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते एतेषामिति। पुत्राद्यात्मत्ववादिनामतिमन्दाधिकारित्वात्तत्प्रतिपादितश्रुत्यादेरपि पूर्वपूर्वस्योत्तरोत्तरबाध्यत्वाच्च पुत्रादिशून्यान्तानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति एतैरिति। ननु पुत्रादिशून्यपर्यन्तानामनात्मत्वे सिद्धे कस्तर्ह्यहम्प्रत्ययविषय आत्मेत्याशङ्क्यास्थूलादिनिषेधवाक्यजातबोधितं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिविधिवाक्यकोटिबोधितं यत्सत्यज्ञानानन्तानन्दाद्वयं ब्रह्म तदेवाहमालम्बनमिति

---

1. *Tait.* 2. 5. 1. 2. Thus eight Mss.; but अहं ज्ञानी BGH. and Rāmatīrtha. 3. *Māṇḍū.* 5. 4. *Chhā.* 6. 2. 1. 5. Some of the Mss. read पुत्रादीनां शून्यपर्यन्तानां.

---

१. *Tait.* 2. 1. 1.

त्पुत्रादीनामनात्मत्वं स्पष्टमेव । किञ्च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुति-

---

प्रबलश्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह किञ्चेति । अस्थूलादिप्रबलश्रुतिवाक्यैः पुत्रादिशून्यपर्यन्तात्मातिरिक्तात्मस्वरूपप्रतिपादनात्पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थः । अस्मिन्नर्थे प्रबलविद्वदनुभवं प्रमाणयति अहं ब्रह्मेति । पुत्रादिश्रुत्यादीनां दौर्बल्यं दर्शयति तत्तदिति । यतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमतः पुत्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्त्वित्यर्थः । ननिवदं विरुद्धं यत्पुत्रादीनामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यमस्थूलादिश्रुतीनां प्रामाण्यमिति। न हि वेदवाक्येषु केषाञ्चिदप्रामाण्यं केषाञ्चित्प्रामाण्यमिति वा शक्यं प्रतिपादयितुम् । एवं चेत्पुत्रादिश्रुतीनां प्रामाण्यमस्थूलादिवाक्यानामप्रामाण्यमिति वैपरीत्यं किं न स्याद्वेदवाक्याविशेषात् । किं[1] केषाञ्चिद्वेदान्तवाक्यानामप्रामाण्यप्रतिपादनार्थमिदं प्रकरणमारब्धमतः कथं निर्णय इति चेदत्रोच्यते । पुत्रादिश्रुतीनां सर्वथैव प्रामाण्यं नास्तीति न निषिध्यते किन्त्वस्थूलादिप्रबलश्रुतिस्मृतिन्यायविरोधात्स्वार्थे तात्पर्याभावात्तेषां स्थूलारुन्धतीन्यायेन[2] पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तूपदेशे तात्पर्यमित्येतावदेव प्रतिपाद्यते । तथाहि "ध्रुवमरुन्धतीं च दर्शयति" इति विधिबलाद्वरवध्वोरुन्धतीदर्शने प्राप्ते परमसूक्ष्माया अरुन्धत्याः प्रथमकक्षायामेव प्रतिपत्तुमशक्यत्वात्प्रथमं चन्द्रज्योतीरूपारुन्धतीत्युच्यते ततश्चन्द्रभिन्ना तारकारुन्धतीत्युच्यते ततश्चेतरतारकाभिन्ना सप्ततारकात्मिकारुन्धतीत्युच्यते तदनन्तरमितरतारकाचतुष्टयभिन्ना तारकात्रितयात्मिकेत्युच्यते ततस्तन्मध्यतारकेत्युच्यते ततस्तत्समीपवर्तिनी परमसूक्ष्मारुन्धतीत्युच्यते । न चैतावतैतेषां पञ्चानां वाक्यानां परस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यं शक्यं प्रतिपादयितुं किन्तु प्रतिपत्तृबुद्ध्यनुसारेण सोपानैक्रमवत्पूर्वपूर्वनिराकरणद्वारा सूक्ष्मा-

---

1. For the passages here referred to, see Rāmatīrtha's commentary.

---

१. *Bṛih.* 1. 4. 10. २. CJ. insert च. ३. See Notes. ४. Cf. *Gobhilīya-Gṛihyasūtra* 2. 3. 8. 10; *Pāraskara-Gṛihyasūtra* 1. 8. 19; and *As'valāyana-Gṛihyasūtra* 1. 7. 22. ५. See सोपानारोहणन्याय in *Maxims* ii (2nd edn.).

युक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव । अतस्तच्छ्रासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः । एवमध्यारोपः ॥ २० ॥

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्ब्रह्मविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । तदुक्तम्[1]—

"सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरित" इति ॥

रुन्धतीप्रतिपादने तात्पर्यात् । तद्वदन्नाप्यन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमय आत्मा "ब्रह्म पुच्छं प्रतिष्ठा" इति पुच्छब्रह्मपर्यवसितानां पञ्चकोशवाक्यानामपि परस्परविरुद्धार्थप्रतिपादकत्वेऽपि प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत्पूर्वपूर्वनिराकरणद्वारा परमसूक्ष्मपुच्छब्रह्मप्रतिपादने तात्पर्यात् । तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परम्परया वाद्वितीयवस्तुप्रतिपादने तात्पर्यात्प्रामाण्यविरोध इति संक्षेपः । विशेषाध्यारोपप्रकरणमुपसंहरति एवमिति ॥ २० ॥

आत्मवस्तुनि मिथ्याप्रपञ्चस्य सामान्यतो विशेषतश्चाध्यारोपप्रकारं सप्रपञ्चमभिधायेदानीं तदपवादप्रकारं वस्तुमारभते अपवाद इति । असङ्गोदासीने परमात्मवस्तुनि तद्विवर्तभूताज्ञानादिमिथ्याप्रपञ्चस्य चिद्वस्तुमात्रावशेषतयावस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकं दृष्टान्तमाह रज्जुविवर्तस्येति । रज्जुस्वरूपापरित्यागेन सर्पाकारेण भासमानस्य रज्जुविवर्तस्यापवादो नाशो नामाधिष्ठानरज्जुमात्रतयावस्थानवच्चिद्विवर्तस्याज्ञानादिप्रपञ्चस्य नाशो नाम चिन्मात्रत्वेनावस्थानमित्यर्थः । अत्र यथास्वरूपेणावस्थितस्य वस्तुनोऽन्यथाभावो द्विधा भवति परिणामभावो विवर्तभावश्चेति । तत्र परिणामभावो नाम वस्तुनो यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपान्तरापत्तिर्यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणमते । विवर्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिर्यथा रज्जुः स्वस्वरूपापरि-

---

1. So ABEFJK.; °तत्त्वमिति DGHIL. 2. I cannot trace this quotation. It is not in BDGH. See *Kalpataruparimala*, p. 248, line 5, and *Siddhāntales'a*, p. 10, line 5.

---

१. *Tait.* 2. 5. 1. २. See Notes.

तथाहि । एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनान्येतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति । एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति । एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति । एतदज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ॥ २१ ॥

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं

त्यागेन सर्पाकारेण मिथ्या प्रतिभासते । अत्र वेदान्ते ब्रह्मणि प्रपञ्चभानस्य परिणामभावो नाङ्गीक्रियते दुग्धादिवद्ब्रह्मणो विकारित्वप्रसङ्गादनित्यत्वादिदोषापत्तेः । विवर्तभावाङ्गीकारे तु नायं दोषो ब्रह्मणि प्रपञ्चभानस्य मिथ्यात्वेन विकारित्वाभावात् । तदुक्तम्—"अधिष्ठानावशेषो हि नाशः कल्पितवस्तुन" इति । तस्माच्चिद्विवर्तस्य प्रपञ्चस्य चिन्मात्रावस्थानमेवापवाद इति भावः । अस्मिन्नर्थे ग्रन्थान्तरसंवादं दर्शयति तदुक्तमिति । सामान्यतो दर्शितामपवादप्रक्रियां विस्तरेण प्रतिपादयितुं प्रतिजानीते तथाहीति । स्थूलसूक्ष्मकारणप्रपञ्चानामुत्पत्तिवैपरीत्येन तत्तत्कारणरूपेणावस्थानमेवापवाद इत्याह एतद्भोगायतनमिति । एतत्स्थूलशरीरं स्वाश्रयब्रह्माण्डसहितं स्वकारणभूतपञ्चीकृतेषु पञ्चमहाभूतेषु लीनं सत्तन्मात्रतयावतिष्ठते । तानि च पञ्चीकृतानि भूतानि शब्दादिसहकृतानि सप्तदशावयवात्मकलिङ्गशरीराणि स्वकारणेष्वपञ्चीकृतभूतेषु लीनानि भवन्ति । तान्यपञ्चीकृतानि सत्त्वादिगुणसहितानि स्वकारणाज्ञानोपहितचैतन्ये लीनानि भवन्ति । तच्चाज्ञानं तदुपहितचैतन्यं सर्वज्ञत्वादिगुणविशिष्टं च स्वाधारभूतानुपहितचैतन्ये लीनं भवति । चैतन्यमेवावशिष्यत इत्यर्थः ॥ २१ ॥

फलितमाह आभ्यामिति । तत्त्वम्पदार्थशोधनप्रकारं प्रतिजानीते तथा-

---

1. चतुर्विधं HJL. 2. In all but AG. 3. आश्रय DGHL. आश्रय CDGHL.

---

१. *Sūtasamhitā* 4. 2. 8. See Notes.

भवति । तथाहि । अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत्त्रयं तत्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति । अज्ञानादिव्यष्टिरेतदुपहिता[1]ल्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतत्त्रयं तत्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ॥ २२ ॥

अथ महावा[2]क्यार्थो वर्ण्यते । इदं तत्त्व[3]मसीतिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्ष[4]णयोर्लक्ष्यलक्षणभावश्चेति । तदु[5]क्तम्—

हीति । अज्ञानं तदवच्छिन्नेश्वरचैतन्यं तदनुपहितचैतन्यं चैतत्त्रयं तत्तायःपिण्डवदन्योन्यतादात्म्याध्यासेनैकत्वेन प्रतीयमानं सत्तत्पदवाच्यार्थो भवतीत्यर्थः । तत्पदलक्ष्यार्थमाह एतदिति । अज्ञानावच्छिन्नेश्वरचैतन्यस्याधारभूतं यदनुपहितचैतन्यं तत्ताभ्यां विविक्तं सच्चेदविवक्षया तत्पदलक्ष्यार्थो भवतीत्यर्थः । त्वम्पदवाच्यार्थमाह अज्ञानादीति । व्यष्टिभूतमज्ञानं यदन्तःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितं चैतन्यं चेत्येतत्त्रयं तत्तायःपिण्डवत्परस्परतादात्म्याध्यासेनाभेदविवक्षया त्वम्पदवाच्यार्थो भवतीत्यर्थः । त्वम्पदलक्ष्यार्थमाह एतदिति । अन्तःकरणोपहितचैतन्यत्रयस्याधारभूतं यदनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवतीत्यर्थः ॥ २२ ॥

पदार्थमभिधाय वाक्यार्थमाह अथेति । ननु जीवेश्वरयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यन्तविलक्षणयोस्तत्त्वमस्यादिमहावाक्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखण्डैकरसं ब्रह्म प्रतिपादयन्तीत्याशङ्क्य साक्षादैक्यप्रतिपादकत्वाभावेऽपि लक्षणया सम्बन्धत्रयेणाखण्डैकार्थं प्रतिपादयन्ती-

---

1. So ABDG.; the rest vary. 2. See Notes. 3. *Chhā.* 6. 8. 7. 4. So *all* the Mss.; but the printed editions प्रत्यगात्मपदार्थयोः. 5. *Naiṣkarmyasiddhi* iii. 3.

---

१. व्यष्टिभूताज्ञानान्तः° K. २. So CKL.; FJ. omit त्रय.

"सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्" इति ॥

सामानाधिकरण्यसम्बन्धस्तावद्यथा सोऽयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्पर्यसम्बन्धः । तथा च तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्प-

---

त्याह इदमिति । सम्बन्धत्रयस्वरूपमाह सम्बन्धेति । पदार्थप्रत्यगात्मनां सम्बन्धत्रयसद्भावे वृद्धसम्मतिमाह तदुक्तमिति । पदयोः सामानाधिकरण्यमुदाहरणनिष्ठं कृत्वा प्रदर्शयति सामानाधिकरण्येति । भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः[1] सामानाधिकरण्यम् । तच्च सोऽयं देवदत्त इति वाक्ये स इति तत्पदस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तम् । एतत्कालैतद्देशवैशिष्ट्यमयंशब्दस्य प्रवृत्तिनिमित्तम् । तथा च भिन्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन्देवदत्तपिण्डे तात्पर्यसम्बन्धः सामानाधिकरण्यमित्यर्थः । उक्तमर्थं दार्ष्टान्तिके योजयति तथा चेति । तथा च तत्त्वमसीति वाक्येऽपि परोक्षत्वसर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तम् । अपरोक्षत्वकिञ्चिज्ज्ञत्वादिवैशिष्ट्यं त्वम्पदप्रवृत्तिनिमित्तम् । तथा च भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वम्पदयोरेकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः सामानाधिकरण्यमित्यर्थः । विशेषणविशेष्यभावसम्बन्धस्वरूपमाह विशेषणेति । व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यम् । तथा च सोऽयं देवदत्त इति वाक्य एवायंशब्दवाच्यो योऽसावेतत्कालैतद्देशसम्बन्धविशिष्टो देवदत्तपिण्डोऽयं स इति तच्छब्दवाच्यात्तत्कालतद्देशविशिष्टदेवदत्तपिण्डाद्भिन्नो नेति यदा प्रतीयते तदा तच्छब्दार्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वमयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम् । तथा च स इति तच्छब्दवाच्यस्तत्कालतद्देशविशिष्टो देवदत्तपिण्डः सोऽयमितीदंशब्दवाच्यादेतत्कालैतद्देशसम्बन्धविशिष्टादस्माद्देवदत्तपिण्डान्न भिद्यत इति यदा प्रतीयते तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं तच्छब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम् । तथा चायमेव स स एवायमित्यन्योन्यभेदव्यावर्तकतया सोऽयंशब्दार्थयोः परस्परं विशेषणविशेष्यभाव इत्यर्थः । उक्तं विशेषणविशेष्यभावं दार्ष्टान्तिके योजयति तथात्रापीति । इहापि तत्त्वमसिवाक्येऽपि त्वम्पदवाच्यं यदपरोक्षत्व-

---

१. CL. omit प्र.

दस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः । विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः । तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादि-

---

किञ्चिज्ज्ञत्वादिविशिष्टं चैतन्यं तत्तत्पदवाच्यात्सर्वज्ञत्वादिविशिष्टचैतन्याच्च भिद्यत इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वम्पदार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं त्वम्पदार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम् । तथा च तत्पदवाच्यं यत्सर्वज्ञत्वादिविशिष्टचैतन्यं तत्त्वम्पदवाच्यात्किञ्चिज्ज्ञत्वादिविशिष्टचैतन्याच्च भिद्यत इति यदा प्रतीयते तदा त्वम्पदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन विशेषणत्वं तत्पदार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम् । तथा च त्वं तदसि तत्त्वमसीति तत्त्वम्पदार्थयोः परस्परं भेदव्यावर्तकत्वेन परस्परं विशेषणविशेष्यभाव इत्यर्थः । क्रमप्राप्तं लक्ष्यलक्षणभावसम्बन्धस्वरूपं निरूपयितुमाह लक्ष्येति । असाधारणधर्मप्रतिपादकं वाक्यं लक्षणवाक्यं तत्प्रतिपाद्यमवशिष्टं वस्तु लक्ष्यम् । तथा च सोऽयं देवदत्त इत्यस्मिन्नेव वाक्ये सोऽयंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालतद्देशविशिष्टैतत्कालैतद्देशविशिष्टत्वपरिहारेणाविरुद्धदेवदत्तत्वविशिष्टदेवदत्तपिण्डेन सह देवदत्तविशिष्टदेवदत्तवाचकशब्दस्य लक्ष्यलक्षणभावसम्बन्ध इत्यर्थः । उक्तमर्थं दार्ष्टान्तिके योजयति तथात्रापीति । इहापि तत्त्वम्पदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेन तत्त्वम्पदाभ्यां लक्ष्याविरुद्धचैतन्येन सह तत्त्वम्पदयोर्लक्ष्यलक्षणभावः[1] सम्बन्धः । अत्र तत्त्वम्पदयोस्तदर्थयोश्च त्यक्तविरुद्धांशयोर्लक्षणत्वमखण्डचैतन्यस्य लक्ष्यत्वमिति भावः । ननु तत्त्वमस्यादिवाक्यानां लक्ष्यलक्षणभावसम्बन्धपुरस्कारेण चैतन्यबोधकत्वमुक्तमन्यत्र तु शास्त्रे तेषां वाक्यानां भागलक्षणयैव चैतन्यबोधकत्वं प्रतिपाद्यते । तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणेत्यादिविरोधमाशङ्क्य

---

1. CK. omit *visarga*.

विशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः । इयमेव भागलक्षणेत्युच्यते ॥ २३ ॥

अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते । तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात्तद्वाक्यार्थः सङ्गच्छते । अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य [1]च वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते । तदुक्तम्[2]—

संज्ञाभेदो न वस्तुभेद इत्याह इयमेवेति । तत्त्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्षणेत्युच्यत इत्यर्थः ॥२३॥

ननु यथा नीलोत्पलमिति वाक्ये नीलत्वविशिष्टनीलगुणस्योत्पलत्वविशिष्टोत्पलद्रव्यस्य च स्वव्यतिरिक्तशुक्लादिगुणान्तरपटादिद्रव्यान्तरव्यावर्तकत्वेन विशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गस्य नीलगुणवैशिष्ट्यस्य वाक्यार्थत्वं तथेहापि तत्त्वमस्यादिवाक्ये तत्पदार्थस्य परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य त्वम्पदार्थस्यापरोक्षत्वादिविशिष्टजीवचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभूतसर्वज्ञत्वकिञ्चिज्ज्ञत्वोभयनिरूपितसंसर्गो वा सर्वज्ञत्वादिविशिष्टस्य किञ्चिज्ज्ञत्वादिविशिष्टेन सहैक्यं वाक्यार्थो भवत्वित्याशङ्क्य दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यान्नैवमित्याह अस्मिन्नित्यादिना । अस्मिंस्तत्त्वमसीतिवाक्ये नीलोत्पलमित्यादिवाक्यवत्संसर्गो वा विशिष्टो वा वाक्यार्थो न सङ्गच्छत इत्यर्थः । नीलोत्पलमितिवाक्यस्य संसर्गवैशिष्ट्यार्थप्रतिपादकत्वकल्पने विरोधाभावं दर्शयति तत्र त्विति । नीलोत्पलपदार्थयोर्गुणगुणिनो-

---

1. DGH. वा. 2. *Pañchadas'ī.* vii. 75. In the text of BK. All the commentaries give the entire text in detached portions; and, in them all, this follows the preceding portion of text without any other words intervening. See Notes.

---

१. See Notes. २. CK. insert वा.

"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मत" इति ॥ २४ ॥

अत्र गङ्गायां घोषः प्रतिवसतीतिवाक्यवज्जहल्लक्षणापि न सङ्गच्छते । तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते । अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि [1]परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा

विशेषविशेष्यभावसंसर्गस्य नीलगुणविशिष्टोत्पलयोरैक्यस्य वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाभावात्तत्र तथा सङ्गच्छत इति भावः । तत्त्वमसीतिवाक्ये तु तत्त्वम्पदार्थयोः सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविशिष्टयोः सर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्य किञ्चिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य वा तदुभयविशिष्टचैतन्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधात्पूर्वस्माद्वैषम्यं दर्शयति अत्र त्विति ॥ २४ ॥

ननु तत्त्वमस्यादिवाक्यमखण्डार्थं कथं बोधयति जहल्लक्षणया वा किमजहल्लक्षणयाहोस्विज्जहदजहल्लक्षणयेति त्रिधा विकल्पः । आद्ये दूषणमाह अत्रेति । अत्र तत्त्वमसीतिवाक्ये जहल्लक्षणा न सङ्गच्छत इत्यन्वयः । तदेव दर्शयितुं जहल्लक्षणाया उदाहरणं तावदाह गङ्गायामिति । "मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे । मुख्यार्थेनाविनाभूते प्रवृत्तिर्लक्षणेष्यत" इति [2]वचनाद्गङ्गायां घोषवसनासम्भवाद्गङ्गायां घोष इति वाक्यस्य मुख्यार्थविरोधे सति मुख्यार्थं परित्यज्य लक्षणया वृत्त्या तत्सम्बन्धिनि तीरे घोषावस्थानप्रतिपादनात्तत्र जहल्लक्षणाङ्गीकारो युज्यत इत्याह तत्र त्विति । आधाराधेयभावलक्षणं सर्वथा परित्यज्येत्यर्थः । तत्त्वमसीतिवाक्ये प्राक्प्रतिज्ञातं जहल्लक्षणासम्भवमाविष्करोति अत्र त्विति । तुशब्दः पूर्वस्माद्वैषम्यं द्योतयति । तत्त्वमसीतिवाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य विरोधाभावात्परोक्षत्वापरोक्षत्वप्रतिपादकत्वांशे विरोधाच्चैतन्यैकत्वे विरोधाभावाद्गङ्गाघोषादिवाक्यवत्सर्वात्मना मुख्यार्थपरित्यागासम्भवाज्जहल्लक्षणा न सम्भ-

---

1. D. omits अपि and reads अपरि°, and so editions; but see Notes.

---

१. So FJ.; but CKL. स्य. २. *Vākyavṛitti*, 49.

न सङ्गच्छते । न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वम्पदं वा स्वार्थपरित्यागेन त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कुतो जहल्लक्षणा न सङ्गच्छत इति वाच्यम् । तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात् ॥ २५ ॥

अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणापि न सम्भवति । तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादज-

---

वतीत्यर्थः । तत्र हेतुमाह भागान्तरमपीति । विरुद्धयोः परोक्षत्वापरोक्षत्वयोरेकत्वासम्भवेन तत्परित्यागेऽपि चैतन्यभागस्यैकत्वे विरोधाभावात्त्यागो न युज्यत इत्यर्थः । ननु यथा गङ्गायां घोषः प्रतिवसतीतिवाक्ये गङ्गापदं प्रवाहलक्षणं स्वार्थं परित्यज्य स्वसम्बन्धितीरपदार्थं लक्षयति तथा तत्त्वमसीतिवाक्ये तत्पदं स्वार्थं परोक्षत्वादिविशिष्टं परित्यज्य जीवचैतन्यं लक्षयत्वेवं त्वम्पदमपि स्वार्थं किञ्चिज्ज्ञत्वादिविशिष्टं परित्यज्येश्वरचैतन्यं वा लक्षयतु तस्माज्जहल्लक्षणैव भवत्वित्याशङ्क्य निराकरोति न चेति । निराकरणप्रकारमेवाह तत्रेत्यादिना । श्रुतवाक्यस्य मुख्यार्थविरोधे मुख्यार्थसम्बन्धिन्यश्रुतपदार्थे लक्षणेति सर्वजनसिद्धम् । तथा च गङ्गायां घोष इत्यत्र श्रुतवाक्यार्थस्य गङ्गाघोषयोराधाराधेयभावसम्बन्धस्य विरोधे सति श्रूयमाणं गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं लक्षयतीति युक्तं गङ्गापदार्थस्य तीरपदार्थप्रतीतिसापेक्षत्वात् । इह तु श्रूयमाणतत्त्वम्पदयोर्मुख्यतयैव तदर्थसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वम्पदार्थप्रतीत्यपेक्षाभावात्त्वम्पदेन तत्पदार्थप्रतीत्यपेक्षाभावाच्च मुख्यार्थे सम्भवति लक्षणाया अन्याय्यत्वाज्जहल्लक्षणापि न सम्भवति ॥ २५ ॥

अत्र शोण इति । अत्र तत्त्वमसीतिवाक्येऽजहल्लक्षणापि न सम्भवतीत्यन्वयः । कुत इत्यत आह तत्र शोणगुणेति । तत्र शोणो धावतीत्यादिवाक्ये शोणगुणस्य गमनासम्भवेन वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणशोणपदं स्वार्थापरित्यागेन स्वाश्रयमश्वादिकं लक्षयतीति युक्तम् । अत्र तु तत्त्वमस्या-

---

1. वाच्यार्थ० L., and editions.

हल्लक्षणा सम्भवति । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्यकस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवादजहल्लक्षणा न सम्भवत्येव । न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम् । एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च ॥ २६ ॥

तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं

दिवाक्ये तत्त्वम्पदार्थस्य परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्धत्वात्परोक्षत्वापरोक्षत्वापरित्यागेन तद्विशिष्टचैतन्यलक्षणार्थस्य लक्षितत्वेऽपि तद्विरोधपरिहाराभावादजहल्लक्षणा न सम्भवतीत्यर्थः । ननु तत्पदं स्वार्थं विरुद्धपरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन त्वम्पदार्थं किञ्चिज्ज्ञत्वादिविशिष्टं जीवचैतन्यं लक्षयतु त्वम्पदं वा स्वार्थं विरुद्धापरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन तत्पदार्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्षयतु किं भागलक्षणाङ्गीकारेणेत्याशङ्क्य निराकरोति न च तत्पदमिति । एकेन तत्पदेन त्वम्पदेन वा स्वार्थांशापरित्यागेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवादित्यर्थः । अजहल्लक्षणासम्भवे हेत्वन्तरमाह पदान्तरेणेति । तत्पदेन त्वम्पदेन वा तत्तदर्थप्रतीतौ सत्यां लक्षणया पुनरन्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्यर्थः ॥ २६ ॥

अतः परिशेषात्तृतीयपक्ष एवाङ्गीकर्तव्य इत्युपसंहरति तस्मादिति । यस्मात्तत्त्वमस्यादिवाक्ये जहल्लक्षणाजहल्लक्षणयोरसम्भवस्तस्माज्जहदजहल्लक्षणया विरुद्धांशं परित्यज्याविरुद्धाखण्डचैतन्यमात्रं लक्षयतीति योजना । तत्र दृष्टान्तमाह यथेति । यथा सोऽयं देवदत्त इति वाक्ये प्रागुक्तजहल्लक्षणाजह-

---

1. तद्विरोधापरिहारात् GHJL. and editions.

लक्षयति तथा तत्त्वमसीतिवाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ॥ २७ ॥

अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो[1] वर्ण्यते । एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तस-

---

लक्षणयोरसम्भवेन तदर्थस्य तत्कालतद्देशविशिष्टस्यैतत्कालैतद्देशविशिष्टस्य देवदत्तलक्षणवाक्यार्थस्यैकस्मिन्नंशे तत्कालैतत्कालवैशिष्ट्यभागे विरोधदर्शनात्तत्परित्यागेनाविरुद्धदेवदत्तपिण्डमात्रं लक्षयतीत्यर्थः । "मानान्तरविरोध" इत्युक्तन्यायेनेत्यर्थः । उक्तमर्थं दार्ष्टान्तिके योजयति तथेति । तथा तत्त्वमस्यादिवाक्यस्यापि परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणमुख्यार्थप्रतिपादकत्वासम्भवाज्जहदजहल्लक्षणया विरुद्धपरोक्षत्वापरोक्षत्वादिवैशिष्ट्यांशपरित्यागेनाविरुद्धाखण्डचैतन्यमात्रप्रतिपादकत्वं तस्येत्यर्थः ॥ २७ ॥

अखण्डचैतन्यप्रतिपादकस्य तत्त्वमसीतिवाक्यस्यार्थं सप्रपञ्चमभिधायेदानीं यजुर्वेदानुभववाक्यार्थो[2] वर्ण्यत इत्याह अथाधुनेति । गुरुमुखान्नवकृत्वस्तत्त्वमस्यादिवाक्यश्रवणादेहाद्यहङ्कारान्तजडपदार्थसकलदृश्यविलक्षणप्रत्यगात्मनः-शुद्धेन परमात्मना सहैकत्वबोधानन्तरं कश्चिदधिकारी लब्धावसरं सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दैकरसमनुभवेन जिज्ञासुराचार्योपदिष्टमहं ब्रह्मास्मीति वाक्यार्थमनुस्मरन् स्वात्मानन्दमनुभवतीत्यर्थः । तत्प्रकारमेवाह एवमित्यादिना । एवं संक्षेपेण वक्ष्यमाणप्रकारेणाधिकारिणश्चित्तवृत्तिरुदेतीति सम्बन्धः । कदेत्यपेक्षायामाह आचार्येणेति । आचार्येणाविषयेऽसङ्गे निष्कलचैतन्ये शशशृङ्गायमानाविद्ययाहङ्कारादिशरीरान्तमिथ्यापदार्थमध्यारोपतदपवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा तत्त्वमसीतिवाक्येन जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाखण्डार्थचैतन्ये ज्ञाते सतीत्यर्थः । किंविषयिणी चित्तवृत्तिरुदेतीत्यसत्त्वशङ्कां निवारयति अहमिति । अहं प्रत्यगात्मा परं ब्रह्मास्मीत्यन्वयः । ब्रह्मानित्यत्वशङ्कां निराकरोति नित्येति । शुद्धपदेनाविद्यादि-

---

1. *Bṛih.* 1. 4. 10.

---

१. See page 35. २. यजुर्वेद्यनु° Calc. edition.

त्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता-चित्तवृत्तिरुदेति[1] । सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति । तत्र प्रतिबिम्बितं

दोषराहित्यम् । बुद्धपदेन स्वप्रकाशस्वरूपत्वेन जाड्यादिकं व्यवच्छिद्यते । मुक्तपदेन सर्वोपाधिराहित्यम् । सत्यमित्यविनाशिस्वभावत्वम् । परमानन्दपदेन वैषयिकमनुष्यानन्दादिचतुर्मुखब्रह्मानन्दपर्यन्तानां कर्मजन्यत्वेन सातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात्तेभ्यो विलक्षणं निरतिशयानन्दस्वरूपत्वं प्रतिपाद्यते । अनन्तपदेन घटादिवत्परिच्छेदराहित्येन देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वं बोध्यते । अद्वयमिति नानात्वनिषेधेनैकत्वं बोध्यत इत्यर्थः । ननु यथा दीपप्रभादित्यमण्डलं न व्याप्नोति न च प्रयोजनमस्ति तथा नित्यशुद्धस्वप्रकाशमात्मानं जडा चित्तवृत्तिः कथं विषयीकृत्योदेति किं प्रयोजनं चेत्याशङ्क्याह सा त्विति । सा चित्तवृत्तिर्न शुद्धब्रह्मविषयिणी किन्त्वज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी । सा च चैतन्यप्रतिबिम्बसंवलिता सती चैतन्यगतमज्ञानं निवर्तयति । तस्माच्चैतन्यावरकाज्ञाननिवृत्तिरेव प्रयोजनमित्यर्थः । नन्वधिकारिणस्त्वमस्यादिवाक्यश्रवणोत्पन्नाखण्डचैतन्यवृत्त्या तदाश्रिताज्ञाने निवारितेऽपि तत्कार्यस्य सकलचराचरप्रपञ्चस्य प्रत्यक्षतया भासमानत्वात्कथमद्वैतसिद्धिरित्याशङ्क्य कारणाज्ञाननाशे तत्कार्यसकलप्रपञ्चनाशादद्वैतसिद्धिरित्येतत्सदृष्टान्तमाह तदा पटकारणेति । नन्वज्ञाननाशेन तत्कार्यप्रपञ्चस्य नाशोऽस्तु तथाप्यखण्डाकारवृत्तेरनिवृत्तेरद्वैतहानिरित्याशङ्क्याह तदन्तर्भूतेति । अखण्डाकारवृत्तेरप्यज्ञानतत्कार्यान्तर्भूतत्वात्तन्निवृत्त्या तन्निवृत्तेर्नाद्वैतहानिरित्यर्थः । ननु तथाप्यखण्डाकारवृत्तिप्रतिबिम्बितचैतन्याभासत्वात्कथमद्वैतसिद्धिरित्याशङ्क्याह तत्र प्रतिबिम्बितमिति । वृत्तिनिवृत्तौ तत्प्रतिबिम्बितचैतन्यस्य बिम्बावभासनासमर्थत्वाद्वृत्युपाधिबाधेन तत्प्रतिबिम्बितचैतन्यमपि चैतन्यमात्रतयावशिष्यते । दर्पणोपाधिविगमे तत्प्रतिबिम्बितमुखाभासस्य बिम्बभूतमुखमात्रतावशेषवदित्यर्थः । अयं भावः । शोधिततत्त्वम्पदार्थस्याधिकारिणस्तद्विजृम्भितगुरुशास्त्रादिभ्यस्तत्त्वमसीत्युपदेशेनाहं

---

1. See Notes.

चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत्स्वोपाधिभूताखण्डचित्तवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति ॥ २८ ॥

एवं च सति "मनसैवानुद्रष्टव्यं"[1], "यन्मनसा न मनुत"[2]

नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयाखण्डब्रह्मास्मीति चित्तवृत्तिरुदयमासादयति । तदानीमेव तस्याभिव्यक्ताखण्डचैतन्यबलेन तत्त्वपरिपीडिताज्ञाननाशो भवति । तदानीं तत्कार्यस्य सर्वस्य नाशादभिव्यक्तिरपि स्वयमेव कतकरजोवद्दारुमथनजनिताग्निवदुदरस्थदुष्टजलशान्त्यर्थपीततप्तजलवच्च नष्टा भवति । तदानीं तद्भासोऽपि स्वोपाधिभूतचित्तवृत्तिनाशात्स्वप्रकाशात्मावभासनासमर्थतया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठानमुखमात्रत्ववदधिष्ठानमात्रो भवतीति वेदान्तसिद्धान्तरहस्यमिति । अत्र तस्यानुभवः । "लोकाश्च भान्ति परमे मयि मोहजन्याः स्वप्नेन्द्रजालमरुनीरसमा विचित्राः । व्युत्थानकाल इह न स्युरलं विशुद्धप्रत्यक्सुखाब्धिपरमामृतचित्तवृत्तौ ॥ मत्तः परं न खलु विश्वमथापि भाति मध्ये च पूर्वमपरं नरशृङ्गतुल्यम् । मायोत्थशास्त्रगुरुवाक्यसमुत्थबोधभानुप्रभाविलसिते क्व गतं न जाने ॥ निरतिशयसुखाब्धिस्वप्रकाशे परेऽस्मिन्कथमिदमविवेकादुत्थितं स्वकफणीव । क्व नु गतमधुना तद्देशिको वा श्रुतिर्वा परमविमलबोधेऽभ्युत्थितेऽहं न जाने" इति ॥ तदेतत्सर्वं मनसि निधायोपसंहरति प्रत्यगभिन्नेति ॥ २८ ॥

ननु "मनसैवानुद्रष्टव्यम्", "मनसैवेदमाप्तव्यम्", "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः", "बुद्ध्यालोकनसाध्येऽस्मिन्वस्तुन्यस्तमिता यदि", "बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव" इत्यादिश्रुतिस्मृतीनां "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह", "यन्मनसा न मनुते",

---

1. *Brih.* 4. 4. 19. 2. *Kena* 1. 5.

---

१. See जलकतकरेणुन्याय in *Maxims* ii (2nd. edn.). २. Untraceable. ३. So KL.; मति EFJ.; C. corrupt. ४. *Katha.* 4. 11. ५. *Idem.* 3. 12. ६. *Gītā* xviii. 57. ७. *Tait.* 2. 9. 1.

इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् । तदुक्तम्—

"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता" इति ॥

"स्वयम्प्रकाशमानत्वान्नाभास उपयुज्यते" इति च ॥ जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति । तथाहि । अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य

"अन्यदेव तद्विदितादथो अविदितादधि", "अविज्ञातं विजानतां विज्ञातमविजानताम्", "अनाशिनोऽप्रमेयस्य", "यद्विज्ञातं त्वया विप्र यन्न विज्ञातमात्मना । ताभ्यामन्यत्परं विप्र यद्वेद्यं विद्धि तज्जडम्" इत्यादिश्रुतिस्मृतीनां च परस्परविरोधमाशङ्क्य परिहरति एवं च सतीति । एवमुक्तप्रकारेणाज्ञातचैतन्यस्य वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वे प्रतिषिद्धे सतीत्यर्थः । तदेवाह वृत्तिव्याप्यत्वेति । अन्तःकरणवृत्तिरावरणनिवृत्त्यर्थमज्ञानावच्छिन्नं चैतन्यं व्याप्नोतीत्येतद्वृत्तिव्याप्यत्वमङ्गीक्रियते । आवरणभङ्गानन्तरं स्वयम्प्रकाशमानं चैतन्यं फलचैतन्यमित्युच्यते तस्मिन्फलचैतन्ये निष्कलङ्के चित्तवृत्तिर्न व्याप्नोत्यावरणभङ्गस्य प्रागेव जातत्वेन प्रयोजनाभावादित्यर्थः । अस्मिन्नर्थे ग्रन्थान्तरं संवादयति तदुक्तमिति । वृत्तिप्रतिबिम्बितचैतन्याभासस्यापि फलचैतन्यप्रकाशकत्वं नेत्यत्रापि सम्मतिमाह स्वयम्प्रकाशेति । इदानीं जडपदार्थविषयकचित्तवृत्तेर्ब्रह्माकारवृत्त्यपेक्षया वैलक्षण्यं दर्शयितुमाह जडपदार्थेति । अहं ब्रह्मास्मीत्यज्ञानावच्छिन्नब्रह्माकारा वृत्तिस्तदावरकमज्ञानमात्रं निवर्तयति ब्रह्म तु स्वप्रकाशात्मत्वात्स्वयमेव प्रकाशते । न तु वृत्तिप्रतिबिम्बितचिदाभासेन चैतन्यं प्रकाश्यते तत्र तस्यासामर्थ्यात् । अयं घट इति घटाकाराकारितचित्तवृत्तिस्तु घटावच्छिन्नचैतन्यावरकाज्ञानं निवर्तयमाना स्वप्रतिबिम्बितचिदाभासेन जडं घटमपि प्रकाशयति । अतस्ततो विशेषोऽस्तीत्यर्थः । एतदेव प्रपञ्चयितुं प्रतिजानीते तथाहीति । जडपदार्थ-

---

1. *Pañchadas'ī* vii. 90, 92. Line one is the second half of verse 90. There the reading of line three is स्वयंस्फुरणरूपत्वात्.

---

१. *Kena* I. 3. २. *Idem.* 11. ३. *Gītā* ii. 18. ४. *Vāsiṣṭha-Lainga Upapurāṇa* xi (Kaivalyaratna, p. 101).

तद्वताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति । तदुक्तम्[1]—

"बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्" इति ॥

यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति ॥ २९ ॥

एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते । श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्याव-[2]

विषयिणीं चित्तवृत्तिमभिनीय दर्शयति अयमिति । वृत्तिसम्बन्धात्प्राग्घटस्याज्ञातत्वादज्ञातं घटं विषयीकृत्य प्रवृत्ता चित्तवृत्तिर्घटगताज्ञानं दूरीकुर्वाणा घटमपि भासयतीत्यर्थः । अस्मिन्नर्थे वृद्धसम्मतिमाह तदुक्तमिति । बुद्धिश्च तत्र बुद्धौ प्रतिबिम्बितचिदाभासश्च बुद्धितत्स्थचिदाभासौ द्वावेतौ बुद्धिचिदाभासौ घटं व्याप्नुतः । तत्र तयोर्मध्ये धिया वृत्त्या घटाज्ञानं नश्येच्चिदाभासेन तु घटः स्फुरेदित्यर्थः । अत्रानुरूपं दृष्टान्तमाह यथा दीपेति । यथान्धकारावस्थितं घटादिकं विषयीकृत्य प्रवर्तमानं दीपप्रभामण्डलं घटावरकान्धकारनिवृत्तिद्वारा स्वप्रभया घटादिकं प्रकाशयति तद्वदित्यर्थः ॥ २९ ॥

इयता ग्रन्थजालेन प्रतिपादितस्य प्रत्यगभिन्नपरमानन्दाखण्डचैतन्यस्य साक्षात्कारलक्षणमखण्डाकारान्तःकरणवृत्तिं प्रतिपिपादयिषुस्तत्साधनभूतश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणानि च क्रमेण दर्शयति एवम्भूतेत्यादिनाऽद्वैतं वस्तु भासत इत्यन्तेन । एवम्भूतस्योक्तश्रुतियुक्त्यनुभवैर्निरस्तसमस्तोपाधिप्रत्यगभिन्नपरमानन्दचिद्रूपस्य साक्षात्कारपर्यन्तं श्रवणादीन्यनुष्ठेयानीति प्रतिजानीते तेऽपीति । श्रवणादयोऽपीत्यर्थः । तत्र श्रवणस्य लक्षणमाह षड्विधेति । लीनमर्थं गमयतीति लिङ्गशब्दस्य व्युत्पत्तेर्ब्रह्मात्मैकत्वनिश्चायकैरुपक्रमोपसंहारादिषड्विधलिङ्गैः सर्वेषां वेदान्तवाक्यानामद्वितीये ब्रह्मणि

---

1. *Pañchadas'ī* vii. 91. 2. See an amusing passage in *Nyāyamañjarī* p. 552, lines 14 to 25.

---

१. So K. only; लिङ्ग° J.; नीत° CEF.

धारणम् । लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि । तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये[1] प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन "एकमेवाद्वितीयं"[2] इत्यादौ "ऐतदात्म्यमिदं सर्वं"[3] इत्यन्ते च प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः । यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् । प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता । यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् । फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र

तात्पर्यनिश्चयः श्रवणमित्यर्थः । तानि च लिङ्गानि क्रमेणोद्दिशति उपक्रमेति । तथा चोक्तम् । "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय" इति । उपक्रमोपसंहारौ तावद्दर्शयति तत्र प्रकरणप्रतिपाद्यस्येति । तदुदाहृत्य दर्शयति यथेति । एकमेवाद्वितीयमित्युपक्रम्यैतदात्म्यमिदं सर्वमिति प्रतिपादनमुपक्रमोपसंहाराविति्यर्थः । अभ्यासस्य लक्षणमाह पौनःपुन्येनेति । अत्रापि श्रुतिमुदाहरति यथेति । अपूर्वत्वस्य लक्षणमाह प्रमाणान्तरेति । "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः । अथवा ब्रह्मणः स्वप्रकाशत्वेन स्वव्यवहारिस्वातिरिक्तप्रमाणानपेक्षत्वाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः । क्रमप्राप्तस्य फलस्य लक्षणमाह फलं त्विति । अत्रानुरूपमुदाहरणमाह आचार्यवानित्यादि । श्रवणादिसाधनानां ब्रह्मात्मैकत्वविज्ञानं प्रयोजनं ब्रह्मणः ज्ञानस्य तु तत्प्राप्तिः फलं "ब्रह्मविद्ब्रह्मैव भवति"[4], "तरति शोकमात्मवित्"[5] इत्यादिश्रुतिभिरित्यर्थः । पञ्चमलिङ्गस्यार्थवादस्य लक्षणमाह प्रशंसनमिति । प्रकरणप्रतिपाद्याद्वितीयब्रह्मस्वरूपस्तावकवाक्यमर्थवाद इत्यर्थः । अत्रापि

1. षष्ठे प्रपाठके DGH. 2. *Chhā.* 6. 2. 1. 3. *Idem.* 6. 8. 7. 4. वस्तुनः in DH. only.

१. Quoted in the *Sarvadars'anasaṁgraha* (Pūrṇaprajnadars'ana) and ascribed to the *Bṛihatsaṁhitā*. See Notes. २. *Bṛih.* 3. 9. 26. ३. *Muṇḍ* 3. 2. 9. Here the reading is ब्रह्म वेद. ४. *Chhā.* 7. 1. 3.

तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र "आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते । प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथा तत्रैव "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं" इत्यद्वितीयवस्तुप्रशंसनम् । प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथा तत्र "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते । मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम् । विजातीयदेहादिप्रत्ययरहितादद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो

श्रुतिमाह "उत तमादेशं" इत्यादि । "येनाश्रुतं श्रुतं भवति" इति । येन सकलप्रपञ्चाधिष्ठानब्रह्मस्वरूपश्रवणेनाश्रुतं प्रपञ्चजातमपि श्रुतं भवति । येन ब्रह्मज्ञानेनाज्ञातं सर्वं जगज्ज्ञातं भवति । येन ब्रह्मसाक्षात्कारेण साक्षात्कृतं भवति ब्रह्मणः सर्वतः सम्प्लुतोदकस्थानीयत्वादित्यर्थः । अवशिष्टाया उपपत्तेर्लक्षणमाह युक्तिरिति । तामुदाहरति यथेति । मृद्विकारेषु घटादिषु विकारनामधेययोर्वाचारम्भणमात्रत्वेन यथा मृत्त्वमेवावशिष्यते नान्यत्तथा चिद्विवर्तस्य प्रपञ्चस्य गिरिनदीसमुद्रात्मकविकारनामधेययोर्वाचारम्भणमात्रत्वाच्चिन्मात्रमेवावशिष्यते रज्जुविवर्तस्य सर्पस्य रज्जुमात्रावशेषवदित्यर्थः । श्रवणनिरूपणानन्तरं तदुत्तराङ्गस्य मननस्य लक्षणमाह मननं त्विति । षड्विधलिङ्गतात्पर्यपूर्वकं श्रुतस्याद्वितीयब्रह्मणो वेदान्तविरोधिनीभिर्युक्तिभिर्निरन्तर्येणानुचिन्तनं मननमित्यर्थः । निदिध्यासनलक्षणमाह विजातीयेति । विजातीयदेहादिबुद्ध्यन्तजडपदार्थनिराकरणेन सजातीयाद्वितीयवस्तुविषयकप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः । व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावे सति चित्तस्यैकाग्रतापरिणामः समाधिः । स च द्विविधं

---

1. *Chhā.* 6. 14. 2. 2. HK. omit *visarga*. 3. *Idem.* 6. 1. 3. 4. °प्राक्षो CBGL. 5. *Idem.* 6. 1. 4. 6. BCDGHL. insert उपपत्तिः here. 7. See Notes.

निदिध्यासनम् । समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् । तदा मृन्मयगजादिभानेऽपि मृद्भानवद्द्वैतभानेऽप्यद्वैतं वस्तु भासते । तदुक्तम्—

"दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षरम् ।

इत्याह सविकल्पको निर्विकल्पकश्च । तस्य लक्षणमाह तत्रेति । तत्र तयोः सविकल्पकनिर्विकल्पकयोर्मध्ये सविकल्पकोऽपि द्विविधः । अहं ब्रह्मास्मीति शब्दानुविद्धतयाद्वितीये वस्तुनि चित्तवृत्तेरवस्थानमित्येकः । द्वितीयस्तु ज्ञातृज्ञानज्ञेयत्रिपुटीविलयानपेक्षयाहं ब्रह्मास्मीति शब्दानुविद्धतयाद्वितीये वस्तुन्यविच्छेदेन चित्तवृत्तेरवस्थानमित्यर्थः । ननु "भक्षितेऽपि लशुने न शान्तो व्याधिः" इतिन्यायेनोक्तसविकल्पकसमाध्योः सकलभेदनिराकरणाय प्रवर्तनात्तयोरपि ज्ञात्रादिभेदविषयत्वेन नाद्वैतवस्तुमात्रभानं तत्रेत्याशङ्क्योत्तरमाह तदेति । तदा सविकल्पकसमाध्यनुभवकाले ज्ञात्रादिभेदप्रतीतावप्यद्वैतं वस्तु भासत एव । सुवर्णमयकुण्डलादिभाने सुवर्णभानवन्मृन्मयगजादिभाने मृद्भानवच्च गजादिभानस्य वाचारम्भणमात्रत्ववज्ज्ञात्रादिभानस्यापि वाचारम्भणमात्रत्वादद्वैतमेव वस्तु भासत इत्यर्थः । यद्वा सर्वं खल्विदं ब्रह्मैतदात्म्यमिदं सर्वमित्यादिश्रुतिबलात्सर्वमहमिति गिरिनदीसमुद्रात्मकं सर्वं जगत्स्वाभिन्नसच्चिदानन्दब्रह्मत्वेनानुभूय तस्य दग्धपटन्यायेन प्रपञ्चभानेऽप्यद्वैतं सच्चिदानन्दलक्षणं वस्तु भासत एवेत्यर्थः । तदुक्तं भगवता—"वासुदेवः सर्वमिति स महात्मा सुदुर्लभ" इति । मूलकारोऽप्यस्मिन्नर्थे ग्रन्थान्तरसम्मतिं दर्शयति तदुक्तमिति । ओमिति यत्परं ब्रह्म तदेवाहमित्यन्वयः । किं तदित्याह दृशिस्वरूपमिति । दृशिर्दृष्टिस्तस्याः स्वरूपं दृष्टत्वं तद्यस्य परमात्मस्वरूपस्य तद्दृशिस्वरूपं साक्षिस्वरूपमित्यर्थः । तदुक्तं

---

1. ABDHK. insert भेद after विकल्प. 2. *Upades'asāhasrī.* 73 (x. 1.). The reading of the editions, तदुक्तमभियुक्तैः has no support from my Mss. Rāmatīrtha explains तदुक्तमभिनीय which is also the reading of D.

---

१. See *Maxims* i (2nd. edn.). २. Ditto. ३. *Gītā* vii. 19. ४. *Idem.* xiii. 22.

अलेपकं सर्वगतं यदद्वयं
तदेव चाहं सततं विमुक्तमोम्[1]" इति ॥

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्[2]। तदा

भगवता—"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः पर" इति । पुनः किंरूपं तत् । गगनोपमम् । गगनमुपमा दृष्टान्तो यस्य तद्गगनोपमं गगनवन्निर्लेपस्वरूपमित्यर्थः । तथा च भगवद्वचनम्[3]—"यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यत" इति । यद्वा गगनोपमं गगनवदमूर्तस्वरूपमित्यर्थः । "आकाशशरीरं ब्रह्म[4]" इति श्रुतेः । पुनः किंभूतम् । सकृद्विभातम् । सकृदेकदैव विभातं सर्वदैकस्वरूपेण भासमानं चन्द्रादिप्रकाशवन्न वृद्धिक्षयशीलमित्यर्थः । पुनः किंरूपम् । अजं जन्मरहितम् । एकं निरस्तसर्वोपाधिभेदम् । अक्षरं विनाशधर्मराहित्येन कूटस्थस्वरूपमित्यर्थः । तथा च भगवानाह[5]—"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यत" इति । अलेपकमसङ्गत्वादविद्यादिदोषरहितमित्यर्थः । "असङ्गो ह्ययं पुरुष" इति श्रुतेः । सर्वगतं सर्वत्र ब्रह्मादिस्थावरान्तेषु भूतेषु गतं व्याप्तम् । अद्वयं सजातीयविजातीयभेदराहित्येन द्वितीयरहितम् । सततं विमुक्तमिति सर्वदा कार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततैकरूपमित्यर्थः । तथा च भागवते[6]—"बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुत" इति । तथा चैतादृशं निरतिशयानन्दं यत्परं ब्रह्म तदेवाहमिति भावयतो निषेधप्रतियोगित्वेन तत्तदुपाधिभानात्तत्प्रयुक्तभेदभानेऽप्यद्वैतं भासत एवेत्यर्थः । निर्विकल्पकसमाधिस्वरूपमाह निर्विकल्पकस्त्विति । अयं च द्विविधः । चिरकालाभ्यस्तयदुत्तरसविकल्पकसमाध्यनुभवजनितसंस्कारसहकृतायाश्चित्तवृत्तेर्ज्ञात्रादित्रिपुटीलयपूर्वकमद्वैते वस्तु-

---

1. विमुक्तः EFGHJK. but see commentary. Rāmatīrtha explains विमुक्तः। 2. BCDH. insert here भेद and G. विभेद.

---

१. *Gītā* xiii. 32. २. *Tait.* 1. 6. 2. ३. *Gītā* xv. 16. ४. *Bṛih.* 4. 3. 15. ५. *Bhāg. Purāṇa* 11. 11. 1. ६. तदुत्तर K.; पटुतर FJ.

तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवद्द्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते । ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ ३० ॥

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः[1] । तत्र "[2]अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" । "[3]शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" । कर-

---

न्येकभावनात्मकः प्रथमः । एतन्निर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादित्रिपुटीलयपूर्वकमखण्डाकाराकारितायाश्चित्तवृत्तेर्विनापि स्वस्फूर्तिं केवलचिदानन्दात्मनावस्थानात्मको द्वितीयः । तत्र द्वितीयं पक्षमभिप्रेत्याह ज्ञातृज्ञानादीति । नन्वेवं समाधिसुषुप्त्योर्विक्षेपाभावेन वृत्त्यभानादभेदमाशङ्क्य परिहरति ततश्चेति । तत्र युक्तिमाह उभयत्रेति । समाधिसुषुप्त्योरित्यर्थः । तत्सद्भावेति । समाधावज्ञायमानवृत्तिसद्भावात्सुषुप्तौ वृत्त्यभावाच्च तयोर्भेदोपपत्तेरित्यर्थः ॥ ३० ॥

उक्तसमाधेः साधनापेक्षायामाह अस्याङ्गानीति । तानि च साधनानि क्रमेणोद्दिशति यमेति । यमाद्यष्टाङ्गानि समाधेरन्तरङ्गसाधनानीत्यर्थः । प्रथमं यमस्य लक्षणमाह तत्रेति । तेषु यमाद्यष्टाङ्गेषु मध्येऽहिंसादयः पञ्च यमा अवश्यानुष्ठेया इत्यर्थः । तदनन्तरं नियमानाह शौचेति । शौचादयः पञ्च नियमा इत्यर्थः । आसनं लक्षयति करेति । प्राणायामलक्षणमाह रेचकेति । "इडया पूरयेद्वायुं मुञ्चेद्दक्षिणयानिलम् । यावच्छ्वासं समासीनः कुम्भयेत्तं सुषुम्णया" । यदा योगी पद्मासन उपविश्य योगमभ्यसति तदा गुल्फाभ्यां गुदमूलं निष्पीड्य खेचरीमुद्रासाहाय्येन प्राणधारणया सुषुम्णामार्गेण मूलाधारात्कुण्डलिनीमुत्थाप्य स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञानिर्वाणाख्यषट्[3]चक्रभेदक्रमेण सहस्रदलकमलकर्णिकायां विद्यमानपरमात्मना सह संयोज्य तत्रैव चित्तं निर्वातदीपवदचलं कृत्वा स्वात्मानन्दरसं पिबतीत्येतत्प्राणायामफलम् । स च द्विविधोऽगर्भः सगर्भश्चेति । "मुञ्चेद्दक्षिणया वायुं मात्राहीन-

---

1. As to *Samādhi* being ancillary to itself, see Trans. of *Sarvadars'ana.*, p. 243. 2. *Yogasūtra* ii. 30. 3. *Idem.* ii. 32.

---

१. See Notes. २. Ditto. ३. Ditto.

चरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि[1] ।
रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ।

मनन्यधीः । पूरयेद्वामया तद्वत्कुम्भयेच्च सुषुम्णया । यावच्छ्वासं जितश्वासो भवेन्मासाज्जितेन्द्रिय" इति । प्रणवोच्चारराहित्येनोक्तरेचकपूरककुम्भककमेण प्राणनिरोधोऽगर्भप्राणायामः । "रेचयेत्षोडशेनैव तद्द्विगुण्येन पूरयेत् । कुम्भयेच्च चतुःषष्ट्या प्रणवार्थमनुस्मरन्" इति वचनात्षोडशसंख्याकं प्रणवं मनसा जपन्दक्षिणया वायुं विरेच्य द्वात्रिंशत्संख्याकं प्रणवं मनसा समुच्चरन्वामया वायुमापूर्य चतुःषष्टिसंख्याकं प्रणवं मनसा जपंस्तदर्थं चाकारोकारमकारार्धमात्रात्मकसार्धत्रिवलयाकारं कुण्डलिनीरूपं चिदानन्दकन्दं च मूलादिब्रह्मरन्ध्रान्तमनुसन्दधत्सुषुम्णया चित्तमपि तदेकप्रवणं कुर्वन्यावच्छ्वासं कुम्भयेत् । तदुक्तमाचार्यैः—"षोडशतद्विगुणचतुःषष्टि च मात्राणि तानि च क्रमशः । रेचकपूरककुम्भकभेदैस्त्रिविधः प्रभञ्जनायाम" इति प्राणायामप्रकारः । क्रमप्राप्तं प्रत्याहारं निरूपयति इन्द्रियाणामिति । श्रोत्रादीनामिन्द्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशात्पाषाणोपरिप्रयुक्तः शरसंघातस्तद्वत्प्रत्यावर्तनं प्रत्याहारः । नन्विन्द्रियाणां स्वस्वविषयेभ्यो निवर्तनं प्रत्याहार इत्युक्तं तन्न सम्भवति शब्दादिविषयाणां सुखसाधनत्वेन वैषयिकसुखव्यतिरिक्तनिरतिशयानन्दसद्भावे प्रमाणाभावाद्धैरण्यगर्भाद्यमृतभोगस्येश्वरेणापि त्यक्तुमशक्यत्वादिति चेन्न मूढैः कर्मजडैर्विषयलम्पटैस्त्यक्तुमशक्यत्वेऽपि शुद्धान्तःकरणेन संसाराविद्यकत्वदर्शिना विषयदोषदर्शनेन तुच्छीकृतशब्दादिविषयप्रपञ्चेन पुरुषोत्तमेन त्यक्तुं शक्यत्वात् । अन्यथा संसार एव लोलुप्येत । "तस्माच्छ्यासमेषां तपसामतिरिक्तमाहुः", "एतमेव लोकमीप्सन्तः प्रव्राजिनः प्रव्रजन्ति", "एतत्सर्वं भूःस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत्", "त्यागेनैके अमृतत्वमानशुः", "ब्रह्मचर्यादेव प्रव्रजेत्", "यदहरेव विरजेत्तदहरेव प्रव्रजेद्गृहाद्वा", "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज", "संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया । प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः । प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः । ब्रह्मावाप्त्यै श्रुतत्यागमीप्सन्तीति श्रुतेर्बलात्", इत्यादिश्रुतिस्मृतिभिस्तथा "आनन्दो ब्रह्मेति व्यजानात्", "एतस्यैवानन्दस्या-

---

1. पद्मक all but DEK.

---

१. *Mahānāra.* 24. 1. २. *Brih.* 4. 4. 22 (Mādhyandina). ३. *Jābāla.* 6. ४. *Mahānāra.* 10. 5. ५. *Jābāla.* 4. ६. *Idem.* ७. *Gītā* xviii. 66. ८. See Notes. ९. *Tait.* 3. 6. 1. १०. *Brih.* 4. 3. 32.

इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः । अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा । तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रिय[1]वृत्तिप्रवाहो ध्यानम् । समाधिस्तूक्तः सविकल्पक एव ॥ ३१ ॥

एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि चित्तवृत्ते

न्यानि भूतानि मात्रामुपजीवन्ति", "[1]एषोऽस्य परमानन्दः", आत्मै[2]वानन्दः", "यदे[3]ष आकाश आनन्दो न स्यात्", "[4]आनन्दाद्ध्येव खल्विमानि भूतानि" इत्यादिश्रुतिभिश्च नित्यात्मसुखस्य प्रतिपादितत्वाच्छब्दादिवैषयिकसुखव्यतिरिक्तनिरतिशयानन्दसद्भावे प्रमाणाभावादित्येतदपि निरस्तं बोद्धव्यम् । सम्प्रति धारणां लक्षयति अद्वितीयेति । सर्वेषां बुद्धिसाक्षितया विद्यमानेऽद्वितीयवस्तुनि चित्तनिक्षेपणं धारणेत्यर्थः । धारणापाटवाभावेन चित्तस्थैर्याभावात् । अद्वितीयवस्तुनि विच्छिद्य विच्छिद्य चित्तवृत्तिप्रवाहीकरणं ध्यानमित्याह तत्राद्वितीयेति । समाधिरुक्त एव सविकल्पकः स्मर्तव्य इत्याह समाधिरिति ॥ ३१ ॥

उक्तयमाद्यष्टाङ्गसहितनिर्विकल्पकसमाधेर्निर्विघ्नानुष्ठानसिद्ध्यर्थं विघ्नज्ञानव्यतिरेकेण निवारणस्य कर्तुमशक्यत्वादस्य चतुरो विघ्नान्दर्शयति एवमस्येति । तत्राद्यं विघ्नं लक्षयति लय इति । लयो द्विविधः । चिरकालमुक्ताष्टाङ्गसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतलक्षिप्तजलबिन्दुवत्तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे चित्तवृत्तेर्लयः प्रथमः । द्वितीयस्तु मूर्च्छावस्थावदालस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहानादरे सति प्रत्यगात्मस्वरूपानवभासनाद्वृत्तेः स्तब्धीभावलक्षणनिद्रारूपः । तत्राद्यमङ्गीकृत्य द्वितीयस्य विघ्नत्वेन तत्त्यागाय तत्स्वरूपमाह अखण्डेति । द्वितीयं विघ्नमाह अखण्डेति । अखण्डवस्तुग्रहणायान्तर्मुखतया प्रवृत्तायाश्चित्तवृत्तेश्चिदनवलम्बनेन त्रस्त-

---

1. ABCEK. omit वृत्ति.

---

१. *Brih.* 4. 3. 32. २. Cf. *Tait.* 2. 5. 1. ३. *Idem.* 2. 7. 1. ४. *Idem.* 3. 6. 1. ५. See Notes.

रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनापि[1] चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः। समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा ॥ ३२ ॥

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते। तदुक्तम्[2]—

पक्षिवत्पुनर्बाह्यविषयग्रहणाय प्रवृत्तिर्विक्षेप इत्यर्थः। तृतीयं विघ्नमाह लयविक्षेपेति। रागादयस्त्रिविधा बाह्या आभ्यन्तरा वासनामात्ररूपाश्चेति। बाह्याः पुत्रादिविषयाः। आभ्यन्तरा मनोराज्यादयः। संस्काररूपा वासनामयाः। तत्रानेकजन्माभ्यस्तबाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चिच्छ्रवणादिसाधनेनान्तर्मुखमपि चैतन्यग्रहणसामर्थ्याभावान्मध्य एव स्तब्धीभवति। यथा राजदर्शनाय स्वगृहान्निर्गत्य राजमन्दिरं प्रविष्टस्य कस्यचित्पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावस्तथा परित्यक्तबाह्यविषयस्याखण्डवस्तुग्रहणाय प्रवृत्तस्योद्बुद्धरागादिसंस्कारैः स्तब्धीभावादखण्डवस्त्वग्रहणं कषाय इत्यर्थः। चतुर्थं विघ्नमाह अखण्डेति। उक्तसविकल्पकसमाध्योर्मध्ये द्वितीयः[1] शब्दानुविद्धखिपुटीविशिष्टस्तस्मिन्य आनन्दो बाह्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तो न तु चैतन्यप्रयुक्तः। यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्यावृतस्य निधिप्राप्त्यभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति तथा सविकल्पकसमाधावखण्डवस्त्वनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽप्यनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेणास्वादयति तद्रसास्वादनमित्यर्थः। लक्षणान्तरमाह समाध्यारम्भेति। निर्विकल्पकसमाध्यारम्भकालेऽनुभूयमानसविकल्पकानन्दत्यागासहिष्णुतया पुनस्तस्यैवास्वादनं रसास्वाद इत्यर्थः॥३२॥

प्रोक्तविघ्नचतुष्टयनिवृत्तेः फलमाह अनेनेति। लयादिविघ्नाभावसहितं चित्तं यदा निर्वातदीपवदचलमखण्डचैतन्यमात्रमवतिष्ठते तदा निर्विकल्पकसमाधिरित्यर्थः। लयादिविघ्नसद्भावे तन्निवृत्तिप्रकारे च वृद्धसम्मतिमाह

---

1. °लम्बनेऽपि GHL. 2. Gaudapāda's *Kārikās* iii. 44, 45.

---

१. °यो CEFJL. २. So CEF. and margin of J.; शब्दानु° KL.

"लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयाच्छमप्राप्तं न चालयेत् ॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति,

तदुक्तमिति । पूर्वोक्तनिद्रालक्षणे लये जाते सति तन्निवृत्त्यर्थं चित्तं सम्बोधयेच्चित्तगतजाड्यादिपरित्यागेन चित्तमुद्बोधयेत् । उक्तविक्षेपयुक्तं चित्तं यदा भवति तदा विषयवैराग्यादिना चित्तं शमयेद्बहिर्मुखतां परित्यज्यान्तर्मुखं कुर्यात् । उक्तरागादिकषायसहितं चित्तं यदा भवेत्तदा विजानीयादियं रागादिवासना बाह्यविषयप्रापिका न त्वखण्डवस्तुप्रापिकातो नेयं समीचीनेति विविच्य प्रत्यक्प्रवणवासनायाः सकाशादियं निकृष्टातस्त्याज्येयमिति जानीयादित्यर्थः । यद्वा सम्यग्वस्तुन्यप्राप्तं चित्तं यदा भवति तदा तच्चित्तं कषायसहितं जानीयात् । तच्चित्तं यावता कालेन रागादिवासनाक्षयसहितं भवति तावत्कालं तच्चित्तं स्वस्थानान्न चालयेदिति न कम्पयेत् । वासनाक्षयानन्तरं चित्तं स्वत एव प्रत्यक्प्रवणं भवतीत्यर्थः । नास्वादयेदिति पूर्वोक्तं सविकल्पकरसं विषयप्रपञ्चभारत्यागजन्यं नास्वादयेन्नानुभवेत् । तत्र युक्तिमाह निःसङ्ग इति । यतो निःसङ्गो वैषयिकसुखदुःखादिसङ्गरहितोऽतः प्रज्ञया युक्तो भवेत्स्थिरप्रज्ञो भवेदित्यर्थः । तदुक्तं भगवता[1]—"प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत" इति । तस्माल्लयादिविघ्नाभावविशिष्टचित्तस्य चिन्मात्रतयावस्थानं निर्विकल्पकसमाधिरित्यर्थः । तत्र भगवानाह यथा दीप इति ॥

अथ निर्विकल्पकसमाधौ स्वगुरूपदिष्टमार्गेण यथामति किञ्चिद्विचार्यते । पञ्चभूमिकोपेतस्य चित्तस्य भूमिकात्रयपरित्यागेनावशिष्टभूमिकाद्वयं समाधिरित्युच्यते । कास्ताः पञ्च[2] भूमिकाः । क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धं चेति पञ्च चित्तभूमिकाः । तत्रासुरसम्पल्लोकशास्त्रदेहवासनासु वर्तमानं क्षिप्तमित्युच्यते । निद्रातन्द्रादिग्रस्तं चित्तं मूढमित्युच्यते । कादाचित्कध्यानयुक्तं बहिर्गमनशीलमप्युक्तक्षिप्तादिविशिष्टतया विक्षिप्तं चित्तमित्युच्यते । तत्र क्षिप्तमूढयोः समाधित्वशङ्कैव नास्ति । विक्षिप्ते तु चेतसि विक्षेपान्तर्गततया दहनान्तर्गतबीजवच्चित्तस्य सद्य एव विनाशात्तदापि न समाधिः । एकाग्रतां पतञ्जलिः[3] सूत्रयति—"शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणाम" इति । अस्यार्थः । शान्तोऽतीतः । उदितो वर्तमानः । प्रत्यय-

---

१. *Gītā* ii. 55. २. See Bhojadeva on *Yogasūtra* i. 2.
३. *Yogasūtra* iii. 12.

"यथा[1] दीपो निवातस्थो नेङ्गते सोपमा स्मृता" इति च ॥३३॥

श्चित्तवृत्तिः । अतीतप्रत्ययो यं पदार्थं परिगृह्णात्युदितोऽपि तमेव चेद्गृह्णीयात्तदा तावुभौ तुल्यप्रत्ययौ भवतः । तादृश एव चित्तस्य परिणाम एकाग्रतेत्युच्यते । एकाग्रताभिवृद्धिलक्षणं समाधिं सूत्रयति "सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिः" इति । रजोगुणेन चाक्ष्यमानं चित्तं क्रमेण सर्वार्थान्पदार्थान्परिगृह्णाति तस्य रजोगुणस्य निरोधाय क्रियमाणेन प्रयत्नविशेषेण दिने दिने योगिनः सर्वार्थता क्षीयत एकाग्रता चोदेति तादृशश्चित्तस्य परिणामः समाधिरित्यर्थः । अस्य समाधेरष्टाङ्गेषु यमनियमासनप्राणायामप्रत्याहाराः पञ्च बहिरङ्गानि हिंसादिभ्यो निषिद्धेभ्यो[3] योगिनं कर्मभ्यो यमयन्ति निवर्तयन्तीत्यहिंसादयो यमाः । जन्महेतून् काम्यधर्मान्निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयन्ति प्रेरयन्तीति शौचादयो नियमाः । यमनियमयोरनुष्ठानवैलक्षण्यं स्फुर्यते[4] । "यमान्सेवेत सततं न नित्यं नियमान्बुधः । यमान्पतत्यकुर्वाणो नियमान् केवलान् भजन्" इति । बुद्ध्या यमनियमौ समीक्ष्य यमबहुलेषु प्रयत्नेषु बुद्धिमनुसन्दधीत । आसनप्राणायामप्रत्याहारा व्याख्याताः । ध्यानधारणासमाधित्रयं मनोविषयत्वात्सम्यक्प्रज्ञातसमाधेरन्तरङ्गं यमादिकं तु बहिरङ्गम् । तथा च केनापि पुण्येनान्तरङ्गे प्रथमं लब्धे सति बहिरङ्गलाभाय नातिप्रयासः कर्तव्यः । यद्यपि पतञ्जलिना भौतिकभूततन्मात्रेन्द्रियाहङ्कारविषयाः सम्प्रज्ञातसमाधयो बहुधा प्रपञ्चितास्तथापि तेषामन्तर्धानाकाशगमनादिसिद्धिहेतुतया मुक्तिहेतुसमाधिविरोधित्वान्नास्माभिस्तत्रादरः क्रियते । तथा चोक्तं वासिष्ठे[5]—"श्रीराम उवाच । जीवन्मुक्तशरीराणां कथमात्मविदां वर । शक्तयो नेह दृश्यन्त आकाशगमनादिकाः । श्रीवसिष्ठ उवाच । अनात्मविदमुक्तोऽपि सिद्धिजालानि वाञ्छति । द्रव्यमन्त्रक्रियाकालयुक्त्याप्नोत्येव राघव । नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मनात्मदृक् । आत्मनात्मनि सन्तुष्टो नाविद्यामनुधावति । ये केचन जगद्भावास्तानविद्यामयान्विदुः । कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति । द्रव्यमन्त्रक्रियाकालयुक्तयः साधुसिद्धिदाः । परमात्मपदप्राप्तौ नोपकुर्वन्ति काश्चन" इति । आत्मविषयस्तु सम्प्रज्ञात-

1. *Gītā* vi. 19.

१. *Yogasūtra* iii. 11. There the reading is समाधिपरिणामः. २. JK. omit पदार्थान्. ३. निषेधेभ्यः Mss. ४. *Manu* iv. 204. ५. CJ. read °दसम्प्र°. ६. *Yogavāsiṣṭha* 5. 89. 9, 12, 13, 14, 31, with modifications.

अथ जीवन्मुक्तलक्षणमुच्यते । जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" ॥

इत्यादिश्रुतेः ॥ ३४ ॥

समाधिर्वासनाक्षयस्य निरोधसमाधेश्च हेतुस्तस्मात्तत्रादरः कृतः । अथ पञ्चभूमिकारूपश्चित्तस्य निरोधलक्षणः समाधिर्निरूप्यते । तं च समाधिं सूत्रयति—"व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणाम" इति । व्युत्थानसंस्काराः समाधिविरोधिनस्ते च निषिद्धहेतुना योगिप्रयत्नेन प्रतिदिनं प्रतिक्षणं चाभिभूयन्ते तद्विरोधिनश्च संस्काराः प्रादुर्भवन्ति । तथा सति निरोध एकैकस्मिन् क्षणे चित्तमनुगच्छति सोऽयमीदृशश्चित्तस्य परिणामो भवति यदा तदासम्प्रज्ञातसमाधिरुच्यत इत्यर्थः ॥ ३३ ॥

एतत्समाधिद्वयं जीवन्मुक्तस्यैव सम्भवति नान्यस्येति मनसि निधाय प्रथमं जीवन्मुक्तस्वरूपं प्रतिपादयितुं प्रतिजानीते अथेति । तस्य लक्षणमाह जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यन्तेन । अत्राखिलबन्धरहितो ब्रह्मनिष्ठो जीवन्मुक्त इति तस्य लक्षणम् । जीवतः पुरुषस्य हि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणोऽखिलो यश्चित्तधर्मः स क्लेशरूपत्वाद्बन्धो भवति तेन रहितः परित्यक्तबन्धनो ब्रह्मणि निष्ठा तदेकपरता यस्य स ब्रह्मनिष्ठो जीवन्मुक्त इत्यर्थः । सकलबन्धराहित्ये हेतुमाह स्वस्वरूपेति । गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मैकत्वविज्ञानेन मूलाज्ञानतत्कार्यसञ्चितकर्मादीनामपि बाधितत्वात्सर्वबन्धराहित्यमुपपद्यते । तथा च श्रुतिः भिद्यत इति ॥ ३४ ॥

---

1. L. and Rāmatīrtha insert सति. 2. See Notes. 3. *Mund.* 2. 2. 8. Rāmatīrtha reads °श्रुतेश्च ।

---

१. °तन्ना° J, °त्तराना° L. २. *Yogasūtra* iii. 9. The reading there is as above, with which K. agrees. All the other Mss. and the Calcutta edition, read निरोधलक्षण° and निरोधः परिणामः. ३. योगीन्द्रयत्नेन J.

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणान्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेणाशनापिपासाशोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति । यथेन्द्रजालमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति । "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इत्यादिश्रुतेः । उक्तं च—

"सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं च पश्यन्नपि चाद्वयत्वतः ।
तथा च कुर्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चय" इति ॥ ३५ ॥

नन्वेतादृशस्य जीवन्मुक्तस्य देहेन्द्रियादिभानमस्ति न वेत्याशङ्क्य दग्धपटन्यायेनेन्द्रजालनिर्मितसौधसमुद्रादिवच्च बाधितानुवृत्त्या मिथ्यात्वेन भानेऽपि परमार्थतया भानं नेत्याह अयमित्यादिना न पश्यतीत्यन्तेन । अस्मिन्नर्थे श्रुतिमाह सचक्षुरिति । आचार्यवचनं प्रमाणयति उक्तं चेति । इह जगति स एवात्मविन्नान्य इति मे निश्चय इत्यन्वयः । स क इत्यपेक्षायामाह य इति । यः कोऽपि महापुरुषो ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः सुषुप्तावस्थायां यथा द्वैतं न पश्यति तथा ब्रह्मदृष्टिदार्ढ्येन जाग्रदवस्थायामपि द्वैतं न पश्यति तद्दृष्ट्या ब्रह्मव्यतिरिक्तजडपदार्थाभावात्स तथोक्तः । किञ्च कदाचिद्व्युत्थानदशायामाविद्यकसंस्कारलेशवशाद्भिक्षाटनादिव्यवहारेण द्वयं पश्यन्नपि समाध्यभ्याससामर्थ्यवशाद्द्वयत्वेन पश्यति स च तथोक्तः । यश्च लोकसङ्ग्रहार्थं नित्यादिकर्माणि कुर्वन्नप्यात्मनि कर्तृत्वाभावनिश्चयेन निष्क्रियः कर्मरहितो भवति कर्मफलेन न लिप्यते स जीवन्मुक्तो नात्र संशयः कर्तव्य इत्यर्थः ॥ ३५ ॥

---

1. So HKL.; the rest मौग्ध्य. 2. °द्धान्या° D. only. 3. *Upadesʻasāhasrī* 85 (x. 13).

---

१. *Maxims* i (2nd edn.). २. °लेशावेशात् all but L.

अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्ति-
वच्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा ।
तदुक्तम्[1]—

"बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षण" इति ॥
"ब्रह्मविद्[2]त्वं तथा मुक्त्वा स आत्मज्ञो न चेतर" इति ॥ ३६ ॥

नन्वस्य जीवन्मुक्तस्य योगीश्वरस्य मम पुण्यपापलेपो नास्तीत्यभिमान-
वशाद्यथेष्टाचरणप्रसङ्गमाशङ्क्य परिहरति अस्य ज्ञानादिति । अस्य पूर्वोक्त-
जीवन्मुक्तस्य ज्ञानात्प्रागेव शान्त्यादिगुणैरशुभवासनाया निवारितत्वात्संसार-
दशायामप्रयत्नेनाहारादिप्रवृत्तिवत्तत्त्वज्ञानोत्तरमपि शुभानामेव वासनाना-
मनुवृत्तिर्भवति नाशुभानामित्यर्थः । ननु शुभवासनानुवृत्तेरपि प्रयोजना-
भावात्किं तदनुवृत्त्येत्यत आह शुभाशुभयोरिति । तस्माज्जीवन्मुक्तस्य
यथेष्टाचरणप्रसङ्गो नास्तीति भावः । अस्मिन्नर्थे ग्रन्थान्तरं संवादयति
तदुक्तमिति । जीवन्मुक्तस्य ब्रह्मज्ञानित्वाभिमानो नास्तीत्यत्रापि सम्मतिमाह
ब्रह्मविद्[2]त्वमिति । ननु विदुषां यथेष्टाचरणप्रसङ्गो नास्तीत्युक्तं तदनुपपन्नं
"नैं[3] मातृवधेन न पितृवधेन", "यैस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते", "हैंयमेधशतसहस्राण्यथ कुरुते
ब्रह्मघातलक्षाणि । परमार्थविन्न पुण्यैर्न च पापैर्लिप्यते मनुजः", "अश्वैंमेध-
सहस्राणि ब्रह्महत्याशतानि च । कुर्वन्नपि न लिप्येत यद्येकत्वं प्रपश्यति",
"सभैंयादभयं प्राप्तस्तदर्थं यतते च यः । स पुनः सभयं गन्तुं स्वतन्त्रश्चेन्न
हीच्छति", "आरब्धैंकर्मनानात्वाद्बुद्धानामन्यथान्यथा । वर्तनं तेन शास्त्रार्थे

---

1. *Naishkarmyasiddhi*. iv. 62. 2. *Upades'asāhasrī*. 115 (xii 13). Rāmatīrtha ignores this line altogether. Apart from its own context, it would be difficult to say what the true reading of the second and third words is. ABCEFKL. have यथा, and the rest तथा. A. has मुक्ता, BDG. मुक्तः, C. मुक्तो, EFHK. मुक्त्वा, J. मुक्तं. B. reads ब्रह्मवित्तु. See Notes.

---

१. न CFJ. २. *Kauṣī*. 3. 1. ३. *Gītā* xviii. 17. ४. *Paramārthasāra*, 78. ५. *Sūta-Samhitā* (Ānandās'rama Series), p. 918. ६. *Upades'asāhasrī*. 640. (xviii. 228.). ७. *Pañchadas'ī*. vi. 287.

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्तन्ते । तदुक्तम्[1]—

"उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिण" इति ॥ ३७ ॥

किं बहुनायं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापि-

विभ्रान्तव्यं न पण्डितैः" इत्यादिश्रुतिस्मृत्यभियुक्तवाक्यैर्विदुषां यथेष्टाचरणत्वाङ्गीकारादिति चेत्सत्यं तेषां वचनानां विद्वत्स्तुतिपरत्वेन तत्कर्तव्यमित्यत्र तात्पर्याभावात् । तदुक्तमाचार्यैः—"अधर्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः । धर्मकार्ये कथं तत्स्याद्यत्र धर्मो विनश्यति" इति ॥ ३६ ॥

नन्वेवं "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवं" इत्यादिस्मृत्युक्तसाधनस्य "अद्वेष्टा सर्वभूतानां" इत्यादिवचनैः प्रतिपाद्यमानाद्वेष्टृत्वादिगुणसमूहस्य विदुषां सम्पाद्यमानत्वश्रवणात्तेन सह विरोधमाशङ्क्यामानित्वादिसम्पादनस्य च विविदिषासंन्यासविषयत्वाद्विदुषां तु लक्षणत्वेनालङ्कारवदनुवर्तनान्न विरोध इत्याह तदानीमिति । जीवन्मुक्तावस्थायामित्यर्थः । अस्मिन्नर्थे वार्तिकसम्मतिमाह तदुक्तमिति । अस्य विद्वत्संन्यासिनो जीवन्मुक्तस्याद्वेष्टृत्वादयो गुणा अप्रयत्नेन स्वत एव भवन्ति न तु साधनरूपिणस्तं प्रति ते साधनरूपा न भवन्ति । तत्र हेतुमाह उत्पन्नेति । यत उत्पन्न आत्मावबोधो ब्रह्मात्मैकत्वनिश्चयरूपस्ततस्तस्य ते गुणा लक्षणत्वेनैव भवन्तीत्यन्वयः ॥ ३७ ॥

इयता प्रबन्धेन प्रतिपादितेऽस्मिन्वेदान्तसाराख्ये ग्रन्थे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानन्दयोगीन्द्रेण महापुरुषेणाथ वेदान्तो नामेत्यारभ्य साधनचतुष्टयसम्पन्नस्य प्रमातुरधिकारिणो मूलाज्ञाननिवृत्तिपरमानन्दप्राप्तिसिद्धये प्रतीयमानाविद्यकसकलप्रपञ्चजातस्य ब्रह्मण्यध्यारोपापवादपुरःसरं सविस्तरं निष्प्रपञ्चत्वं प्रतिपाद्य तत्साधनं च श्रवणादिकं सप्रपञ्चमभिधाय तस्यैवाधिकारिणस्तत्त्वमस्यादिवाक्यश्रवणानन्तरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धेर्जीवन्मुक्तत्वं प्रदर्शितम् । एतावतैव कार्यसिद्धेः

---

1. *Naiṣkarmyasiddhi* iv. 69.

---

१. *Naiṣkarmyasiddhi* iv. 63. The reading there is धर्मोऽपि नेष्यते. २. *Gītā* xiii. 7. ३. *Idem.* xii. 13. ४. प्रति° CEFJL.; प्रतिबोधेन K. ५. That is, his guru's guru.

तानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः संस्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे

किं बहुलेखेनेति मनसि निधाय सम्प्रत्यस्यैव जीवन्मुक्तस्य स्वप्रकाशात्मानन्दानुभवैकनिष्ठस्य भेदप्रतीत्यभावेऽप्यविद्यालेशवशात्प्रारब्धं कर्म भुञ्जानो भिक्षाटनादिदेहयात्रामात्रक्रियाविशिष्टो[1] ब्रह्मीभूत एवावतिष्ठत इत्युपसंहरति किं बहुनेत्यादिना । प्रारब्धं त्रिविधम् । स्वेच्छाकृतं भिक्षाटनादि । समाध्यवस्थायां शिष्यादिभिर्दीयमानमन्नादिकं परेच्छाकृतम् । समाध्यवस्थायां व्युत्थानदशायां वाकाशफलपातवदकस्माज्जायमानं पाषाणपतनकण्टकवेधादिकमनिच्छाकृतम् । स चायं जीवन्मुक्तः प्रोक्तत्रिविधप्रारब्धप्रापितं सुखदुःखमनुभवन्बुद्ध्यादिसाक्षितया सर्वावभासकः सन्भोगेनारब्धकर्मक्षये सति प्रत्यगभिन्नपरमात्मनि प्राणादिलयानन्तरं प्रनष्टाविद्यकसंसारः कृतकृत्यः सन् गलितसकलभेदप्रतिभासो ब्रह्मैवावतिष्ठत इति सकलवेदरहस्यतात्पर्यमित्यर्थः । अयं जीवन्मुक्तो बुद्ध्याद्युपाधिविलये सति घटाद्युपाधिविनिर्मुक्ताकाशवन्मुक्त इत्युपचारव्यवहारभाग्भवति बद्धत्वस्याप्यवास्तवत्वात् । तदुक्तमाचार्यैः[2]—"न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः । न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता" अस्य जीवन्मुक्तस्योपाधिविगमसमये प्राणाख्यं लिङ्गशरीरमतितप्तलोहक्षिप्तनीरबिन्दुवत्प्रत्यगभिन्नपरमानन्दे लीनत्वात्स्थूलशरीरं नोत्तिष्ठतीति । अत्र श्रुतिमाह न तस्येति । अयं जीवन्मुक्तो जीवन्नेव दृश्यमानाद्रागद्वेषादिबन्धनाद्विशेषेण मुक्तः सन् वर्तमानदेहपाते सति भाविदेहबन्धाद्विशेषेण मुच्यत इत्यत्रापि श्रुतिमाह विमुक्तश्चेति । बृहदारण्यके[3]ऽपि—"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत" इति । वासिष्ठेऽपि[4] "जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते । भवत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव" इति । "असङ्गो ह्ययं पुरुषः"[5], "आकाशवत्सर्वगतश्च नित्यः"[6], "अन्नादिरं शुद्धमपा-

---

१. °क्रियावशिष्टः CFJK. २. Gaudapāda ii. 32. See Notes. ३. *Bṛih.* 4. 4. 7. ४. *Yogavāsiṣṭha* 3. 9. 14 (modified). ५. *Bṛih.* 4. 3. 15. ६. In the bhāshya on *Chhāndogya* 6. 3. 2, this is ascribed to the *Kāṭhaka*. It is not in the *Kaṭhopaniṣad*, however, or in *Tait. Brāh.* iii. 10—12, which Bhāskaramis'ra calls *Kāṭhaka* (See Burnell's Tanjore Catalogue, P. 7*b*.). I have not had access to a Ms. of the Saṁhitā. ७. *Îs'a.* 8.

लीने सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मावतिष्ठते। "[1]न तस्य प्राणा उत्क्रामन्ति", "[2]अत्रैव समवलीयन्ते", "विमुक्तश्च

पविद्धं" इत्यादिश्रुत्या प्रत्यगात्मनो नित्यत्वपरिपूर्णत्वकूटस्थत्वश्रवणादुत्पत्त्यासिविकृतिसंस्कारचतुर्विधक्रियाफलविलक्षणत्वेन विद्यया नित्यनिवृत्ताविद्यानिवृत्तिमात्रेण प्राप्त एवात्मा पुनः प्राप्त इत्युपचर्येत। अधिष्ठानस्य गमनाभावेऽध्यस्तस्य लोकान्तरगमनायोगाच्च सालोक्यादिमुक्तिसम्भवः। नन्वप्राप्तस्य क्रियासाध्यस्य वस्तुनो विद्यमानानर्थनिवृत्तेश्च पुरुषार्थत्वं दृष्टमत्र तदभावात्कथं पुरुषार्थत्वमिति चेन्न। तयोरेव पुरुषार्थत्वमिति नियमाभावात्स्वच्छायायामारोपितरक्षसो विस्मृतकण्ठगतचामीकरस्य आप्तपुरुषस्याप्तवाक्येन[3] तयोर्निवृत्त्याऽन्योरपि पुरुषार्थत्वदृष्टेः। अत्र सङ्ग्रहः—"आत्माज्ञानमलं निरस्तममलं प्राप्तं च तत्त्वं परं कण्ठस्थाभरणादिवद्भ्रमवशाच्छायापिशाची यथा। आप्तोक्त्यासिनिवृत्तिवच्छ्रुतिशिरोवाक्याद्दुरोरुत्थिताद्भ्रस्तध्वान्तनिरासतः परसुखं प्राप्तं तयोरुच्यत" इति। न च मुक्तानामपि वसिष्ठभीष्मप्रभृतीनामपरोक्षज्ञानिनां पुनर्देहान्तरश्रवणात्केवलज्ञानोत्पत्तिसमय एवाल्पज्ञानामस्माकं मुक्तिर्भवतीति कथं विश्वसिमोऽतो ज्ञानव्यतिरिक्तमप्युपायान्तरं किञ्चित्कर्तव्यमिति वाच्यं शास्त्रप्रामाण्यादेव तदुपपत्तेः। "ब्रह्म वेद ब्रह्मैव भवति", "तरति शोकमात्मवित्" इत्यादिश्रुतिभिर्ज्ञानोत्पत्तिसमयमेव मुक्तिप्रतिपादनात्। तदुक्तं[4] शेषेण—"तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहम्। ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक" इति। वसिष्ठादीनां त्वाधिकारिकपुरुषत्वेन यावदधिकारं प्रारब्धवेगप्रयुक्तशापादिना स्वीकृतावान्तरदेहपातेऽपि तद्देहभाविभोगस्य निवारयितुमशक्यत्वात्प्रारब्धस्य विना भोगेन क्षयानुपपत्तेः। "यावदधिकारमवस्थितिराधिकारिणां"[5] इति भगवद्व्यासैर्विशेषितत्वात्। अस्मदादीनां च प्रारब्धकर्मणोऽनेकदेहारम्भकत्वसम्भवेऽपि चरमदेहं विनापरोक्षज्ञानोत्पत्तेरसम्भवात्। वामदेवेन तथा दृष्टत्वात्। अन्यथा गर्भस्थस्य श्रवणाद्यभावेन ज्ञानोत्पत्त्यनुपपत्तेः। ननु ज्ञानिनामपि स्वभावस्थायां देहान्तरस्वीकारान्मुक्तानामपि पुनर्देहान्तरस्वीकारः किं न

---

1. *Brih.* 4. 4. 6. 2. *Idem.* 3. 2. 11. There, however, the reading is समवनीयन्ते.

---

१. See *Maxims* ii (2nd. edn.). २. *Paramārthasāra* 82. ३. *Brahmasūtra* 3. 3. 32. ४. *Ait. Up.* 4. 5.

विमुच्यत"[1] इत्यादिश्रुतेः ॥ ३८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यसदानन्द-
विरचितो वेदान्तसारः समाप्तः ॥

स्यादिति चेन्न । कण्ठे स्वप्नं[1] समाविशदित्यादिवाक्येषु कण्ठान्निर्गमनाभावश्रवणात् । देहान्तरप्राप्तेस्तु तदन्तरप्रतिपत्तावित्यत्र[2] देहान्निर्गमनश्रवणाद्वैषम्यम् । तदुक्तं स्कान्दे[3]—"यस्मिन्देहे दृढं ज्ञानमपरोक्षं विजायते । तद्देहपातपर्यन्तमेव संसारदर्शनम् । पुरापि नास्ति संसारदर्शनं परमार्थतः । कथं तद्दर्शनं देहविनाशादूर्ध्वमुच्यते । तस्माद्ब्रह्मात्मविज्ञानं दृढं चरमविग्रहे । जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यत" इति । तस्मात्सुष्ठूक्तं विमुक्तश्च विमुच्यत इति ॥ ३८ ॥

नित्यशुद्धपरिपूर्णमद्वयं सच्चिदात्मकमखण्डमक्षरम् ।
सर्वदासुखमबोधतत्कृतैर्वर्जितं सदहमस्मि तत्परम् ॥
गोवर्धनप्रेरणया विमुक्तक्षेत्रे पवित्रे नरसिंहयोगी ।
वेदान्तसारस्य चकार टीकां सुबोधिनीं विश्वपतेः पुरस्तात् ॥

जाते पञ्चशताधिके दशशते संवत्सराणां पुनः
सञ्जाते दशवत्सरे प्रभुवरश्रीशालिवाहे शके ।
प्राप्ते दुर्मुखवत्सरे शुभशुचौ मासेऽनुमत्यां तिथौ
प्राप्ते भार्गववासरे नरहरिष्टीकां चकारोज्वलाम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानन्दभगवत्पूज्यपाद-
शिष्यनृसिंहसरस्वतीकृता सुबोधिन्याख्या
वेदान्तसारटीका समाप्ता ॥

---

1. *Kaṭha* 5. 1.


---

१. So L.; CFJK. स्वप्ने. २. तदनन्तर J.; तदनन्तरं KL.
३. *Sūta-Saṁhitā* 3. 7. 76-8 (pp. 306-7).

रामतीर्थयतिविरचिता

विद्वन्मनोरञ्जनीनाम्नी

वेदान्तसारटीका ।



श्रीरामतीर्थयतिविरचिता

विद्वन्मनोरञ्जनी टीका

ॐसकलब्रह्मविद्यासम्प्रदायप्रवर्तकाचार्येभ्यो नमः ॥

सत्यं ज्ञानमनन्तं परिपूर्णानन्दविग्रहं रामम् ।
प्रत्यञ्चमनृतविश्वसृष्टिस्थित्यप्ययं वन्दे ॥ १ ॥
वाणीकायमनोभिः श्रीगुरुविद्यागुरून्नमस्कृत्य ।
वेदान्तसारटीकां कुर्वे श्रद्धावशाद्यथाबुद्धि ॥ २ ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनफलं विशिष्टशिष्टाचारानुमितस्मृतिपरिकल्पितश्रुतिबोधितकर्तव्यताकं स्वाभिमतदेवतातत्त्वानुसन्धानात्मकं मङ्गलमाचरत्यखण्डेत्यादिश्लोकेन। आत्मानमाश्रय इत्यन्वयः । यद्यपि ग्रन्थकरणादिकार्यारम्भे गणेशसरस्वत्यादिदेवताभेदं विघ्नविघातविद्यास्फूर्तिप्रदत्वेन प्रसिद्धमनुसन्धानं कुर्वन्ति शिष्टास्तथापि "एष उ ह्येव सर्वे देवा" इति श्रुतेरात्मन एव सर्वदेवतात्मकत्वावगमादात्मानुसन्धाने सति सर्वदेवतानुसन्धानं सम्भवतीति मन्यते ग्रन्थकारः । आत्मानं विशुद्धचिद्रूपं त्वम्पदलक्ष्यं तुरीयमाश्रये शास्त्राचार्यप्रसादाभिव्यक्तमनुसन्दधे । अस्मात्मनस्तत्पदलक्ष्यपरमात्मानन्यत्वं वाक्यार्थं कथयितुं तत्पदार्थं शोधयति—अखण्डस्सच्चिदानन्दमिति । "आनन्दादयः प्रधानस्य" इतिन्यायेन "सत्यं ज्ञानमनन्तं ब्रह्म", "विज्ञानमानन्दं ब्रह्म" इति श्रुत्योः परस्परैकवाक्यतामभिप्रेत्याखण्डेत्यादिभिरानन्दपदस्य समासः । अखण्डशब्दोऽनन्तपदपर्यायः । स चाविद्याध्यस्तदेशकालवस्तुभ्यः परमात्मनः परिच्छेदं व्यावर्तयत्येव नञ्पदयोगात् । तदुक्तम्—

"तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम्" इति ।

इतराणि तु पदानि स्वार्थापरित्यागेनैव स्वविरोध्यर्थव्यावृत्तं ब्रह्म लक्षयन्ति । तदुक्तम्—

"स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणम्" इति ।

परिशिष्टौ सत्यज्ञानशब्दावित्यर्थः । अखण्डमपि तदनृतं शून्यं वा स्यादित्यत आह—सदिति । सदनृतशून्यव्यावृत्तं बाधाभावोपलक्षितस्वरूपसत्ता-

---

१. *Bṛih.* 1. 4. 6. २. *Brahmasūtra* 3. 3. 11. ३. *Tait.* 2. 1. 1. ४. *Bṛih.* 3. 9. 28. ५. Sures'vara's *Taittirīyavārtika* ii. 78. ६. *Idem* ii. 79 (page 57).

त्मकमिति यावत् । ब्रह्मणोऽप्यनृतत्वे निरधिष्ठानारोपप्रसङ्गात् । शून्यस्य ससाक्षिकत्वे तु सर्वशून्यवादानुपपत्तेरसाक्षिकत्वे तदसिद्धेः स्वप्रकाशत्वे च ब्रह्मण एव नामान्तरत्वापत्तेर्न ब्रह्मानृतं शून्यं वेत्यर्थः । अखण्डं सदपि तत्त्वमोवज्जडं किं न स्यादित्यत आह—चिदिति । चिज्ज्ञानं ज्ञप्तिरिति पर्यायः । श्रुतौ[1] ज्ञानं ब्रह्मेति सामानाधिकरण्याद्गुणत्वे तस्य तदनुपपत्तेः । न च शुक्लो घट इतिवत्तत्स्यादिति वाच्यं निर्धर्मकत्वप्रतिपादकास्थूलादिश्रुतिविरोधात्[2] । किञ्च ज्ञानस्य नित्यत्वेऽग्न्युष्णवत्सवितृप्रकाशवच्च ब्रह्मस्वभावानतिरेकात्[3] । अनागमापायिधर्मस्य धर्मिणः परमार्थतो भिन्नत्वे प्रमाणाभावात् अनित्यत्वे ज्ञानानवस्थाप्रसङ्गात्[4] । कार्यस्य सतो ज्ञानस्यापि कार्यान्तरवत्स्वोपादानगोचरापरोक्षज्ञानजन्यत्वात्[5] । ज्ञानोपादानब्रह्मगोचरस्यापि ज्ञानस्य कार्यत्वे तस्यापि पूर्वसमानयोगक्षेमतया कथं नानवस्था । अजन्यत्वे प्रथमे कः प्रद्वेषः । तथा च सिद्धा ब्रह्मणो ज्ञानस्वभावता । एतेन जीवात्मनोऽपि ज्ञानस्वभावता व्याख्याता वेदितव्या । स्वप्रकाशं चैतद्ब्रह्मैष्टव्यमप्रकाशजडविलक्षणत्वनिर्देशसामर्थ्यात्[6] । "तदेव ज्योतिषां ज्योतिः[7]", "तस्य भासा सर्वमिदं विभाति[8]" इत्यादिश्रुतेः । नन्वेवमखण्डसच्चिद्रूपमपि ब्रह्म न प्रेक्षावत्प्रेप्सागोचरं सुखदुःखाभावतत्साधनानामन्यतमत्वाभावात्[9] । न तावत्स्वसुखदुःखाभावसाधनं ब्रह्म स्वस्मिन्सुखदुःखयोर्निवृत्तत्वात्[10] "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः[11]" इति श्रुतेः । नाप्यन्यगतसुखादिसाधनं ब्रह्म । अन्येषां दृष्टादृष्टसुखदुःखप्राप्तिपरिहारयोर्लौकिकवैदिकसाधनेभ्य एव सिद्धेः । तस्मान्न सुखादिसाधनं ब्रह्म । नापि दुःखाभावरूपं भावात्मस्वभावताविरोधात्[12] । नापि सुखात्मकं तथात्वे प्रमाणाभावादित्यत आह—आनन्दमिति । आनन्दं सुखरूपम्[13] । न च ब्रह्मण आनन्दात्मत्वे प्रमाणाभावः "विज्ञानमानन्दं ब्रह्म[14]", "आनन्दो ब्रह्मेति व्यजानात्[15]", "आनन्दरूपममृतं यद्विभाति[16]", "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्[17]" इत्यादिश्रुतेः प्रमाणत्वात्[18] । न चानन्दब्रह्मणोर्धर्मधर्मिताशङ्काप्यवकाशं लभते श्रुतिस्वारस्यभङ्गप्रसङ्गात् । न च ब्रह्मण ईश्वरस्य सुखित्वं परैरपीष्यतेऽत

---

१. *Tait.* 2. 1. 1. २. *Bṛih.* 3. 8. 8. ३. See Notes. ४. *Bṛih.* 4. 4. 16. ५. *Kaṭha* 5. 15. ६. MNR. omit प्रेक्षावत्. ७. *Chhā.* 8. 12. 1. ८. P. wrongly reads and translates अनागत°. ९. आनन्दत्वे MP. १०. *Bṛih.* 3. 9. 28. ११. *Tait.* 3. 6. 1. १२. *Mund.* 2. 2. 7. १३. *Tait.* 2. 7. 1. १४. त्वदन्यतात्त्रिकैरित्यर्थः । सुखित्वाङ्गीकारे तत्साधककर्माङ्गीकारोऽप्यस्तु । इष्टापत्तौ तु कर्मसाध्यदुःखापादानं दुर्वारमेवेति भावः ॥ M (margin).

आनन्दो विद्यतेऽस्मिन्नित्यानन्दं ब्रह्मेति परेषां श्रुतिव्याख्यानमुपहासास्पदमेव। न च ब्रह्मण्यानन्दशब्दो दुःखाभावपरः "आनन्दो ब्रह्मेति व्यजानात्" इति भावरूपब्रह्मसामानाधिकरण्यनिर्देशविरोधात्। न च प्रियास्पर्शित्वश्रुतिविरोधस्तस्याः श्रुतेर्वैषयिकप्रीतिनिषेधपरत्वादिति भावः। यद्यप्यात्मपदमेवेह शेषिपदं तथापि श्रुत्युपरोधात्पदार्थशोधनार्थतया च ब्रह्मपदमध्याहृत्य विशेष्यं बोद्धव्यम्। एवं सत्यखण्डं सच्चिदानन्दं ब्रह्मात्मानमाश्रय इति ब्रह्मात्मपदयोः सामानाधिकरण्येन तत्त्वम्पदार्थयोरैक्यवाक्यार्थोऽब्रह्मत्वपारोक्ष्यनिवृत्त्या परिपूर्णतया निरूपितः स्याद्यान्यथा। एतेषां च पदानां ब्रह्मपदेन प्रत्येकं प्रथममन्वितानां पश्चात्सामानाधिकरण्येन परस्परमपि सम्बन्धसिद्धिः। "अरुणया पिङ्गाक्ष्या गवैकहायन्या सोमं क्रीणाति" इत्यत्र क्रयवाच्यपदान्वितानामरुणादिपदानामिव परस्परान्वयः। न चैकार्थत्वे सत्यादिपदानां पर्यायतापत्तिरयौगपद्यं चेति वाच्यं प्रवृत्तिनिमित्तभेदाद्यावर्त्यभेदाद्योक्तदोषानवतारात्। एवमन्योऽपि वाक्यविचारोपयोगी न्याय ऊहनीयो विस्तरभयान्नेह लिख्यते। एवं विधिमुखेन परिच्छिन्नानृतजडदुःखरूपानात्मतद्धर्मविलक्षणं ब्रह्मेति निरूप्येदानीं "नेति नेति", "अस्थूलं", "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादिश्रुतिमाश्रित्य निषेधमुखेन सकलनिषेधावधिभूतं सत्यस्य सत्यं ब्रह्मेतिदर्शयति—अवाङ्मनसगोचरमिति। वाक्च मनश्च वाङ्मनसे तयोर्गोचरो वाङ्मनसगोचरो न वाङ्मनसगोचरोऽवाङ्मनसगोचरस्तदिति विग्रहः। "नैवं वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा", "अस्तीत्येवोपलब्धव्य" इति च काठकश्रुतेः। एवं विधिनिषेधाभ्यां ब्रह्मणः स्वरूपलक्षणमभिधाय लक्षितं स्वरूपं तटस्थलक्षणेन सम्भावयति—अखिलाधारमिति। अखिलस्याकाशादिप्रपञ्चस्याधार आश्रयस्तदिति विग्रहः। आश्रयशब्दः सृष्टिप्रलययोरप्युपलक्षणार्थः। तथाच श्रुतिः—"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति" इति। ततश्च जगदुत्पत्तिस्थितिलयकारणं ब्रह्मेत्युक्तं भवति। अत इदं फलितम्। सत्यज्ञानानन्तानन्दैकरसं ब्रह्म तत्पदलक्ष्यमिति। आत्मपदादेव त्वम्पदार्थशुद्धिः। "आत्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति" इतिश्रुतावात्मशब्दस्य निर्विशेषप्रत्यक्चैतन्यमात्रनिष्ठतायां निर्धारितत्वात्। तथा च ब्रह्मात्मपदयोः सामानाधिकरण्यादैक्यवाक्यार्थसिद्धि-

---

१. *Tait.* 3. 6. 1. २. *Chhā.* 8. 12. 1. ३. *Tait-Saṁhitā* 6. 1. 6. 7; 7. 1. 6. 2. See Notes. ४. *Bṛih.* 2. 3. 6. ५. *Idem* 3. 8. 8. ६. *Tait.* 2. 4. 1. ७. *Kaṭha.* 6. 12. ८. *Idem* 6. 13. ९. *Tait.* 3. 1. 1. १०. *Bṛih.* 1. 4. 7.

रित्युक्तं तदेव वाक्यार्थभूतमात्मानमाश्रये। किमर्थम्। अभीष्टसिद्धये। अभीष्टं शास्त्रार्थाप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्तिनिरासलक्षणं यथाशास्त्रमर्थसङ्ग्रहसामर्थ्यलक्षणं च। तस्य सिद्धिः सम्पत्तिस्तस्यै तदर्थमित्यर्थः॥ १॥

एवं शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणलक्षणं मङ्गलं विधायेदानीं "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादिशास्त्रादेवताभक्तिवद्गुरुभक्तेरपि विद्याङ्गत्वप्रतीतेः "देवमिवाचार्यमुपासीत" इत्यादिस्मृतेश्च गुर्वाराधनोक्तिपूर्वकं स्वचिकीर्षितं प्रतिजानीते—अर्थत इति श्लोकेन। वेदान्तो वक्ष्यमाणलक्षणस्तस्य सारो मथितार्थस्तं वक्ष्ये। तच्च यथामति स्वमत्यनुसारेण। अनन्तशाखाप्रविततस्यातिगम्भीरार्थस्य वेदान्तस्यार्वाग्बुद्धिभिरपरिच्छेदात्। तदुक्तमभियुक्तैः—

"गुरुचरणसरोजसन्निधाना-
दपि वयमस्य गुणैकलेशभाजः।
अपि महति जलार्णवे निमग्नाः
सलिलमुपाददते मितं हि मीना" इति॥

एतच्च गर्वपरिहारोक्तिवचनं न पुनर्वादिभयनिमित्तं यथाशास्त्रमर्थसङ्ग्रहादित्यर्थः। किं कृत्वा। गुरूनाराध्य। भक्तिश्रद्धातिशयस्तुतिनमस्कारादिना देवमिव पूजयित्वा। गुरूनित्येकस्मिन्बहुवचनं पूजार्थम्। किंनामानो गुरव इत्यपेक्षायां स्वस्य साम्प्रदायिकत्वज्ञापनाय तन्नामतो निर्दिशति—अद्वयानन्दानिति। नाम्नो ऽस्त्यर्थादिवत्संज्ञामात्रत्वं व्यावर्तयति—अर्थत इति। अपिशब्दः शब्दार्थयोः समुच्चयार्थः। न केवलं शब्दतः किन्त्वर्थतोऽपीति। तत्र हेतुः—अतीतद्वैतभानत इति। अतीतं द्वैतं यस्मात्तदतीतद्वैतं प्रत्यगात्मतत्त्वं तस्य भानं साक्षात्कारस्तस्मादतीतद्वैतभानतः। 'अतीतद्वैतभावत' इति पाठे तत्त्वज्ञानविध्वस्तनिखिलभेदब्रह्मात्मत्वादित्यर्थः॥ २॥

ब्रह्मात्मप्रतिपत्तिपरेषु श्रुतिसूत्रेषु विद्वद्भिर्मितनिबन्धेषु चाविशेषेण वेदान्तशब्दस्य लोके प्रयोगदर्शनात्सर्वत्र मुख्यवृत्तितः प्रतीतिं वारयन्मुख्यगौणभेदेन वेदान्तशब्दं व्युत्पादयति—वेदान्तो नाम इत्यादिना। उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः। उपनिपूर्वस्य क्विप्प्रत्ययान्तस्य षद्लृविशरणगत्यवसादनेष्वित्यस्य धातोरुपनिषदिति रूपम्। तत्रोपशब्दः सामीप्यमाचष्टे तच्च सङ्कोचकाभावात्सर्वान्तरे प्रत्यगात्मनि पर्यवस्यति। निशब्दो निश्चयवचनः। सोऽपि तत्तत्त्वमेव निश्चिनोति तन्नैकट्यवाच्युपशब्दसामाना-

---

१. P. wrongly, शास्त्रार्थप्र°. २. *Śvet.* 6. 23. ३. *Āpastamba-Sūtra* I. 6. 13. ४. *Saṅkṣepaśārīraka* i. 9.

धिकरण्यात्। तस्माद्ब्रह्मविद्यास्वसंशीलिनां संसारसारतामतिं सादयति विषादयति शिथिलयतीति वा परमश्रेयोरूपं प्रत्यगात्मानं सादयति गमयतीति वा दुःखजन्मप्रवृत्त्यादिमूलाज्ञानं सादयत्युन्मूलयतीति वोपनिषत्पदवाच्या। सैव प्रमाणम्। तस्याः प्रमारूपायाः करणभूतः सर्वशाखासूत्तरभागेषु पठ्यमानो ग्रन्थराशिरप्युपचारात्प्रमाणमित्युच्यते। तथा चोपनिषदः प्रमाणं प्रमाकरणमुपनिषत्प्रमाणं वेदान्त इत्यर्थः। तदुपकारीणि वेदान्तार्थविचारानुकूलानीति यावत्। तदनुकूलत्वं वेदान्तवाक्यप्रमेयासम्भावनापोहद्वारा न तु प्रमित्युत्पत्तौ तत्फले वा साक्षाद्विचारशास्त्रस्याङ्गभावस्तथा सति वेदान्तवाक्यानां सापेक्षताप्रसङ्गात्। तदुक्तमभियुक्तैः[1]—

"स्वाध्यायवन्न करणं घटते विचारो
नाप्यङ्गमस्य परमात्मधियः प्रसूतौ।
सापेक्षतापतति वेदगिरस्तथात्वे
ब्रह्मात्मनः प्रमितिजन्मनि तन्न युक्तम्" इति॥

शरीरमेव शारीरकं तत्र भवो जीवः शारीरकः स सूच्यते याथातथ्येन निरूप्यते यैस्तानि शारीरकसूत्राणि "अथातो ब्रह्मजिज्ञासा"[2] इत्यादीनि। यद्वा शारीरकस्य सूत्राणि तद्याथात्म्यवादिवेदान्तार्थसङ्ग्रहवाक्यानि। आदिशब्दो भाष्यादिसङ्ग्रहार्थः। चशब्दो वेदान्तशब्दानुषङ्गार्थः। तथाच वेदानामन्तोऽवसानभागो वेदान्त इति व्युत्पत्तियोगान्मुख्यो वेदान्तशब्दो वेदभागभेदेषु शारीरकादौ तूपचरित इति व्युत्पादितः। ननु किं पुनरस्य ग्रन्थस्यारम्भे निमित्तम्। न खलु निर्निमित्ता प्रेक्षावत्प्रवृत्तिरिति चेत्को भावः। निमित्तमात्राक्षेप इति चेन्न। अशनायाद्यनेकोर्मिमालाकुलसमुद्भूतक्षोभहतविवेकविज्ञानपाथसि दृढतरकामक्रोधाद्युत्तुङ्गशैलजालविषमे सुतदुहितृकलत्रान्धवाद्यनेकमकरनक्रचक्राकुले नरसृगपशुपक्षिदेवादिस्थानभोगफेनबुद्बुदे संसारसागरेऽनवरतमध ऊर्ध्वं तिर्यग्वा मज्जनोन्मज्जनादिविवशानतिविततगम्भीरार्थानेकशाखवेदान्तविचारमहाद्रुमावलम्बनासमर्थान्दुःखिनो लोकानालोक्य सञ्जातकरुणाया निमित्तत्वोपपत्तेः। अथ निमित्तविशेषाक्षेपश्चेत्तत्राह—अस्येति।

"शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः"॥

---

१. *Saṅkṣepaśārīraka* i. 18. २. *Brahmasūtra* 1. 1. 1. ३. See प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते in *Maxims* iii. ४. *Parāśara-upapurāṇa* xviii. 21, 22 (or, *Kaivalyaratna* p. 45. This was reprinted from *The Pandit* in 1901).

इति हि प्रकरणलक्षणं वदन्ति । तथा च यच्छास्त्रैकदेशसम्बद्धं यत्प्रकरणं तत्तच्छास्त्रीयैरेवानुबन्धैरनुबन्धवद्युक्तम् । अन्यथा शास्त्रप्रकरणयोर्भिन्नविषयादिमत्त्वेन शास्त्रासम्बद्धत्वप्रसङ्गादसम्बद्धप्रलपितमिदमापद्येत । अतोऽस्य ग्रन्थस्य वेदान्तशास्त्रीयप्रकरणत्वाद्वेदान्तशास्त्रसिद्धैरेवानुबन्धैस्तद्वत्तासिद्धेर्न तेऽनुबन्धाः पृथगालोचनीया इत्यर्थः ॥

ननु महाविषयादेरिह शास्त्रीयत्वेऽप्यवान्तरविषयादेः पृथगालोचनमुचितमितरथा शास्त्रं परित्यज्य प्रेक्षावतोऽत्र प्रवृत्त्ययोगादितिचेद्दृढं प्रकरणत्वेनैवावान्तरसङ्गतेः सुलभालोचनत्वात्पृथगिह निर्देशानपेक्षणात् । तथाहि सारग्रहणेच्छुरवान्तराधिकारी । सगुणनिर्गुणरूपविषयभेदं परित्यज्य निर्गुणसारमात्रमिह विषयः । तन्मात्रावधारणमवान्तरप्रयोजनम् । सम्बन्धोऽपि विषयानुरूप इति भावः । ननु शास्त्रीयोऽनुबन्धः शास्त्रविद्भिरेव विज्ञायते न व्युत्पित्सुभिस्तत्कथमिह तेषां शास्त्रीयविषयाद्यनभिज्ञानां प्रवृत्तिरित्याशङ्क्य शास्त्रीयमेवानुबन्धं संक्षेपतो व्युत्पादयितुमुपक्रमते—तत्रानुबन्धो नाम इत्यादिना । तत्र वेदान्तशास्त्रे । स्वार्थप्रतिपत्तारमनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगादादावधिकार्यनुबन्धापेक्षा । तस्य च विषयबोधमन्तरेणाप्रवृत्तेर्विषयस्य तदानन्तर्यम् । विषयस्य च शक्यप्रतिपाद्यत्वसिद्धये सम्बन्धस्य विषयानन्तर्यम् । प्रयोजनस्य चरमत्वं प्रसिद्धमित्युद्देशपाठक्रमो विवक्षितः । तथा च शारीरकसूत्रं "अथातो ब्रह्मजिज्ञासा" इति ॥ ३ ॥

तत्र यथोद्देशक्रममधिकारिणं निरूपयति—**अधिकारी** त्विति । धर्मजिज्ञासाधिकारिणोऽस्य वैलक्षण्यसूचनार्थस्तुशब्दः । प्रमाताधिकारीत्यन्वयः । लौकिकवैदिकव्यवहारेष्वभ्रान्तो जीवः प्रमातेह विवक्षितः । जीवमात्रस्य पक्षे भ्रमसम्भवेन शास्त्रार्थप्रतिपत्तृत्वायोगात् । तस्य तुशब्दसूचितं विशेषमाह—**साधनचतुष्टयसम्पन्न** इति । वक्ष्यमाणसाधनचतुष्टयविशिष्ट इत्यर्थः । अयं भावः । न तावद्वेदाध्ययनं ब्रह्मजिज्ञासाधिकारहेतुस्तस्य धर्मब्रह्मजिज्ञासयोः साधारणत्वात्तन्मात्रेणेह नियमेन प्रवृत्त्यनुपपत्तेः । नापि धर्मविचारः । प्रागपि धर्मविचारादधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः । नापि धर्मानुष्ठानमिह जिज्ञासाहेतुर्विनापि धर्मानुष्ठानं ब्रह्मचर्यादेव विरक्तस्य ब्रह्मजिज्ञासादर्शनात् । श्रुतिश्च भवति विविदिषोः सन्न्यासविधायिनी "[1]यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादिका ॥

ननु "[2]जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वास्ति" इति श्रुतेः ।

---

१. *Jābāla* 4. २. *Tait-saṁhitā* 6. 3. 10. 5.

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः" ॥

इति स्मृतेश्चर्णत्रयापाकरणमन्तरेण मोक्षशास्त्रविचारप्रवृत्ययुक्तताया गम्यमानत्वात्कथं धर्ममननुष्ठाय सन्न्यासपूर्वकब्रह्मविचारे प्रवृत्तिरिति चेत् । उच्यते । श्रुतिस्तावत् "हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस" इति पशवदानत्रयविधिमुपक्रम्य "तदवदानैरेवावदयते तदवदानानामवदानत्वं" इत्यवदाननिर्वचनेनोपसंहारादवदानत्रयविध्यर्थवादत्वान्न स्वार्थपरा । अतः सा "ब्रह्मचर्यादेव" इति श्रुत्यानन्यपरया बाध्यते । यदि ब्रह्मचर्यादिभिरपाकरणीयमृणत्रयमपि "अवदानैरेवावदयत" इत्यवदानश्रुतौ ब्रह्मचर्यादेर्ऋणत्रयापाकरणहेतुत्ववचनं स्वार्थपरमेवेति मतं तथापि जातमात्रस्यर्णत्रयसम्बन्धे प्रमाणाभावादधिकारी जायमानो गृहस्थो वा जायमान इति वा व्याख्यानमुचितम् । स्मृतिस्त्वविरुद्धविषयतया व्याख्येया । एतेन "यज्ञायुधी यजमानः", "जरया वास्मान्मुच्येरन्", "वीरहा वा एष देवानां योऽग्निमुद्वासयत" इत्यादिश्रुतयः "ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्वार्हस्थ्यस्य" इत्यादिस्मृतयश्च व्याख्याता वेदितव्याः । "ब्रह्मचर्यादेव प्रव्रजेत्", "यदहरेव विरजेत्तदहरेव प्रव्रजेत्", "अथ पुनरव्रती वा व्रती वा", "किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे", "किं प्रजया करिष्यामो येषां नोऽयमात्मेति", "याज्ञवल्क्यः प्रव्राज", "ये प्रजामीषिरे ते इमशानानि भेजिरे । ये प्रजां नेषिरे तेऽमृतत्वं हि भेजिर" इत्यादिश्रुतिस्मृत्यविरोधात् । तस्मान्न धर्मानुष्ठानं ब्रह्मजिज्ञासाहेतुः । अतो ब्रह्मजिज्ञासा जायमाना यस्मिन्सत्येव नियमेन जायते यस्मिन्नसति नैव जायते तदेव तस्याः साधनमेषितव्यम् । तच्च वक्ष्यमाणं साधनचतुष्टयमेवेति । कस्मात्पुनः साधनसम्पन्नस्तत्राह—नितान्त° इति । नितान्तमत्यन्तं निर्मलं शुद्धं स्वान्तमन्तःकरणं यस्य स तथा । कुतः स्वान्तस्य नैर्मल्यं प्रतिबन्धकरागादिवासनानिवृत्त्येत्याह—निर्गत° इति । रागादिवासनारूपकल्मषनिवृत्तिरपि कुतस्तत्राह—नित्य° इति । काम्यकर्मभिरतस्यानुष्ठीयमानमपि नित्यादि न साक्षात्कल्मषनिवृत्तिहेतुः कामवासनया शुद्धिप्रतिबन्धसम्भवात्तथा निषिद्धावर्जने पापेन प्रतिबन्धादित्यभिप्रेत्य नित्यानुष्ठानं विशिनष्टि—

---

१. *Manu.* 6. 35. २. *Tait-Saṁhitā* 6. 3. 10. 4. ३. *Idem* 6. 3. 10. 5. ४. *Śatapatha.* 12. 5. 2. 8. For the next quotation, see Notes. ५. *Tait-Saṁhitā* 1. 5. 2. 1. ६. *Gautama-saṁhitā* 3. 36. ७. *Jābāla.* 4. ८. *Idem.* ९. *Idem.* १०. *Bṛih.* 4. 4. 22; not in MN. ११. *Bṛih.* 4. 5. 25. (Mādhyandina). १२. See Notes. १३. साधने.

काम्यनिषिद्धवर्जनपुरःसरमिति । एवं नित्याद्यनुष्ठानस्य शुद्धेश्चैकभविकत्वनियमं व्यावर्तयति—अस्मिन् जन्मनि जन्मान्तरे वेति ।

"[1]अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" ।
"[2]न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति" ॥

इत्यादिस्मृतेर्जन्मान्तरानुष्ठितस्यापि जन्मान्तरोपकारकत्वसम्भवादिति भावः । एवं काम्यनिषिद्धवर्जनपुरःसरमिहजन्मनि जन्मान्तरे वानुष्ठितनित्यादिक्षपितकल्मषस्य विवेकादिसाधनचतुष्टयसम्पत्तौ कारणमाह—**आपातत** इति । आपाततो विचारेणेदमित्थमेवेति पर्यवधारणमन्तरेणाधिगतोऽखिलो वेदार्थो येन स तथा । वेदशब्दो वेदान्तविषयः । वेदार्थज्ञाने हेतुमाह—**विधिवदिति** । "[3]ब्राह्मणेन षडङ्गो वेदो निष्कारणोऽध्येयो ज्ञेयश्च" इतिवचनान्नित्याध्ययनविध्युपस्थापितवेदान्तवचोभिर्निरुक्तव्याकरणाद्यङ्गोपकरणैरनवबुद्धतात्पर्यलिङ्गैरधिगताखिलवेदान्तार्थ इत्यर्थः । एतदुक्तं भवति । वस्तुतश्चित्सदानन्दब्रह्मस्वभावोऽप्यात्माऽनाद्यनिर्वाच्याविद्यासम्बन्धलब्धजीवभावोऽविद्याकामकर्मवशंगतः काम्यनिषिद्धाद्यनवरतमाचरंस्तत्फलभूतस्वर्गनरकौ भुञ्जानस्तद्भोगवासनावासितस्तदनुरूपं पुनः कर्म पुनः फलमित्येवं घटीयन्त्रवत्कुलालचक्रवद्वोर्ध्वाधस्तिर्यग्भ्रमणमविश्राममनुभवन् हृष्टः कृतार्थो मूढो दुःखी वेत्यात्मानं मृषैव मन्यते । स पुनः

"[4]एकः काम्योऽपरो नित्यस्तथा नैमित्तिकः परः ।
प्राधान्येन फलं शुद्धिरार्थिकी काम्यकर्मणः ।
प्राधान्येन मनःशुद्धिर्नित्यस्य फलमार्थिकम् ।
केवलं प्रत्यवायस्य निवृत्तिरितरस्य तु" ॥

इत्यादिपुराणवचनादनीतानेकजन्मसुकृतयादृच्छिकपुण्यपुञ्जपरिपाकोदयवशात्काम्यफलेषु जातदोषबुद्धिराध्यात्मिकादिदुःखत्रयं च निषिद्धाचरणफलमाकलयन् काम्यनिषिद्धे परित्यजन्नीश्वरार्पणबुद्ध्यानुष्ठितनित्यादिक्षपितकल्मषतया नितान्तनिर्मलस्वान्तोऽधीतसाङ्गवेदार्थापातालोचनया लब्धविवेकादिसाधनसम्पन्नः स्वात्मयाथात्म्यजिज्ञासुर्वेदान्ताधिकारीति ॥

काम्यादिपदार्थान् कथयति—**काम्यानीत्यादिना** । फलोद्देशेन विधीय-

---

१. *Gītā*. vi. 45. २. *Idem* vi. 40. ३. See Notes. ४. For these two simile's, see *Maxims* ii (2nd. edn.). ५. *Sūta-Saṁhitā*, p. 345. In P. each word in this line is neuter एकं &c. ६. See Notes.

मानानि कर्माणि काम्यानि। न च "विश्वजिता यजेत" इत्यादावव्याप्तिस्तत्रापि "[1]स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्" इतिन्यायेन स्वर्गफलोद्देशेन विधेः साधितत्वात्। ज्योतिष्टोमशब्द ऐकाहिकविषयः। आदिशब्दोऽहीनसत्रसङ्ग्रहार्थः। भ्रमावगतेष्टसाधनतानिषेधकनञ्पदयोगिवाक्यगम्यानि निषिद्धानि। लिङाद्यनुषक्तनञ्योगिवाक्यगम्यानि वा। नरकादीत्यादिपदादैहिकदुःखग्रहः। ब्राह्मण[2]हननादीत्यादिपदात्सुरापानादिग्रहः। प्रत्यवायशब्देनागामिदुःखमुच्यते। येषामकरणे विज्ञायमाने तत्साध्यते ज्ञाप्यते तानि नित्यानि इत्यर्थः। अकरणे प्रत्यवायलक्षणानि नित्यानीति यावत्। [3]निर्निमित्तमुपात्तदुरितक्षयार्थानि नित्यानीति नित्यकर्मलक्षणं न त्वकरणे प्रत्यवायोत्पादकानि नित्यानीति। ननु "अकुर्वन्विहितं कर्म निन्दितं च समाचरन्। प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति" ॥ इति स्मृतौ [4]शतृप्रत्ययादकरणस्य प्रत्यवायहेतुत्वमवगम्यते तत्कथमकरणस्य प्रत्यवायानुत्पादकत्वमिति चेन्न। "[5]लक्षणहेत्वोः क्रियायाः" इति पाणिनिना शतुर्लक्षणार्थेऽपि विधानात्। अत एव नित्याद्यनुष्ठानकाले निद्रालस्यादिपरवशं नरमालोक्य शिष्टैर्लक्ष्यते यद्यस्य यथावन्नित्यनैमित्तिकानुष्ठानमभविष्यत्तदा सञ्चितदुरितक्षयोऽभविष्यन्न चायं विहितमकार्षीदतः प्रत्यवायी भविष्यतीति। तथा च "विचिकित्सब्छ्रोत्रिय" इतिवच्छतृप्रत्ययस्यान्यथाप्युपपत्तेर्न तद्भावस्य हेतुत्वाशङ्का युक्ता। [6]तदुक्तम्—

"नित्यानामक्रिया यस्माल्लक्षयित्वैव सत्वरा।
प्रत्यवायक्रियां तस्माल्लक्षणार्थे शता भवेत्" इति ॥

ननु हेत्वर्थेऽपि शतुर्विधानस्य तुल्यत्वे कथं लक्षणार्थावगम इति चेदभावाद्भावोत्पत्तेरनुपपत्तेरिति वदामः। भावरूपस्य हि कार्यस्य भावरूपं कारणमिति प्रत्यक्षादिभिरवधारितं तेन शतृप्रत्ययादभावस्य भावहेतुताभ्युपगमो विरुध्यते। नन्वेवं सति कथं तवाप्यकरणस्य प्रत्यवायलक्षकत्वसिद्धिरिति चेन्नैष

---

१. *Mīmāṁsā* 4. 3. 15. See विश्वजिन्न्याय in *Maxims* iii. २. ब्रह्म° MNR; ब्रह्महत्या° P. ३. This sentence comes below, after विधानात् and reads निर्निमित्तानि &c. ४. *Manu.* xi. 44. There the second half of last line reads प्रायश्चित्तीयते नरः। and the editions and commentaries vary between प्रसक्तः, प्रसजन् and प्रसज्जन्. See Notes. ५. the present participle (active). ६. *Pāṇ.* 3. 2. 126. ७. *Taittirīyabhāṣyavārtika.* i. 21. See Notes.

दोषः । नास्माभिरकरणस्य स्वरूपेण प्रत्यवायलक्षकत्वमिष्यते किन्तु तज्ज्ञानस्य । न च तस्यैव प्रत्यवायजनकत्वमपीति वाच्यं नित्याकरणाज्ञाने प्रत्यवायाभावप्रसङ्गात् । ननु कथं तर्हि भाट्टैरनुपलम्भस्याभावप्रमितिहेतुत्वमिष्यते तार्किकैश्च प्रतिबन्धकाभावस्य तत्तत्प्रागभावस्य च कारणत्वमिष्यत इति चेद्भान्त्येति ब्रूमः । तथाहि न तावद्योग्यानुपलब्धेः स्वरूपसत्तामात्रेणाभावप्रमितिहेतुता युक्ता । तथा सत्यज्ञानकरणत्वेनाभावज्ञानस्य प्रत्यक्षान्तर्भावप्रसङ्गाज्ज्ञाताया एवानुपलब्धेरभावप्रमाहेतुत्वे तज्ज्ञानस्यैव भावरूपस्याभावज्ञानकारणता बलादायास्यतीति । प्रतिबन्धकाभावः कारणमिति पक्षे स किं दृष्टकारणकलापकुक्षौ निक्षिप्तः किंवादृष्टकारणकलापकुक्षौ । आद्ये दाहादिकार्यार्थिनः काष्ठादिसमवधानाधिगम इव प्रतिबन्धकाभावसमवधानाधिगमे सत्येव वह्निप्रज्वलनादौ प्रवृत्तिः स्यान्न च तथा प्रवर्तमानो दृश्यते । अन्यथा सत्यपि प्रतिबन्धकसमवधाने तदभावनिश्चयेन प्रवर्तमानस्य कदाचित्कार्यानुदयो न भवेत् । ननु सति प्रतियोगिनि तदभावनिश्चयो भ्रम इति चेत्तर्हि प्रतिबन्धकस्यायोग्यत्वेन तदभावोऽप्ययोग्य एवेति न तस्य दृष्टकारणकलापकुक्षिनिक्षेपः । नापि द्वितीयः । अस्मदाद्यप्रत्यक्षाणामीश्वरतज्ज्ञानेच्छाप्रयत्नप्राप्यदृष्टानां देशकालयोश्च सूर्यादिग्रहचारक्रियायाश्च भावरूपतया प्रतिबन्धकाभावत्वायोगात्तदतिरिक्तस्य कस्यचित्सर्वकार्यसाधारणकारणस्य कल्पकाभावात् । किञ्च सत्यपि प्रतिबन्धके उत्तेजकसमवधाने कार्यदर्शनान्न प्रतिबन्धकाभावस्य कारणता । उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य कारणत्वे तादृक्प्रतिबन्धकाज्ञाने तदभावाग्रहान्न तस्य कारणतासिद्धिः । न चानन्यथासिद्धनियतपूर्ववर्तित्वमपि प्रतिबन्धकाभावस्य तदन्वयव्यतिरेकयोर्विरोधिसंसर्गाभावविषयतयान्यथासिद्धत्वात् । तर्हि विरोधिसंसर्गाभावत्वेनैव कारणतेति चेन्न । सत्येवोत्पत्तिहेतुकलापसमवधाने स्थितिहेतुसमवधाने वोत्पत्तेः स्थितेर्वा विघटकभावस्य विरोधित्वप्रसिद्धेर्न तदभावस्य सामग्र्यन्तर्भावो विरोधिसंसर्गाभावस्य तत्प्रवेशे तत्प्रतियोगिनो विरोधित्वासिद्धिः । तस्मिंश्च सति तत्संसर्गाभावस्य सामग्रीप्रवेश इत्यन्योन्याश्रयस्य दुरुद्धारत्वादित्यलमतिकर्दमेन । प्रागभावस्यापि नियतप्राक्कालवर्तित्वेन कारणत्वेऽभावविशेषणस्य कालस्यात्माश्रयताप्रसङ्गो न च प्रागभावत्वेनैव कारणत्वं तावन्मात्रे कारणलक्षणाभावात् । किञ्च कारणत्वं नाम धर्मो भावात्मक उताभावात्मकः । उभयथापि नाभावनिष्ठत्वं तस्य सम्भवति विरोधिनोर्भावाभावयोराधाराधेयभावानुपपत्तेः । अभावस्य निर्विशेषत्वान्निरतिशयत्वाद्वा । तस्मान्नाभावाद्भावोत्पत्तौ दृष्टान्तः । तन्तुनाशात्पटनाश

---

१. सत्यज्ञात° QR.

इत्यपि स्वप्रक्रियामात्रमित्यास्तां विस्तरः । अस्तु वा क्वचिदभावस्यापि कारणत्वं तथापि न प्रत्यवायस्याकरणहेतुत्वं प्रत्यवायशब्दवाच्यस्य पापादृष्टस्य तज्जन्यागामिदुःखस्य वा निषिद्धक्रियाजन्यत्वात् "पापकारी[1] पापो भवति", "अथ[2] य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्" इति च श्रुतेः । तस्मादकरणे प्रत्यवायसाधनानि प्रत्यवायज्ञापकानि नित्यानीति व्याख्यानं सुव्याख्यानमिति ॥

सन्ध्यावन्दनादीनि इत्यादिपदात्पञ्चमहायज्ञादिग्रहः[3]। निमित्तमात्रमासाद्यावश्यकर्तव्यतया विहितानि नैमित्तिकानि । एतदाह—पुत्रेति । जातेष्टिर्नाम "वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते" इति विहिता । आदिपदात् "यस्याहिताग्नेर्गृहान्दहत्यग्निरग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्" इत्यादिनोक्तानां क्षामवत्यादीनां ग्रहः । उपरागस्नानादि च स्मार्तमुदाहरणीयम् । यद्यपि जातेष्टिवाक्यशेषे "यस्मिन्[4] जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति" इति पुत्रगाम्यवान्तरफलश्रवणान्न वक्ष्यमाणकर्तृगामिद्विविधफलानुकूलं जातेष्ट्युदाहरणं तथापि नैमित्तिकस्वरूपमात्रव्युत्पादनायोदाहरणं न दुष्यतीति द्रष्टव्यम् । विहिताकरणप्रतिषिद्धसेवारूपनिमित्तविशेषानुबन्धीनि प्रायश्चित्तानि । पापक्षयमात्रोद्देशेन विहितानीति वा । आदिपदात्कृच्छ्रादिग्रहः । शास्त्रबोधिते सगुणे ब्रह्मणि दीर्घकालादरनैरन्तर्योपेतमनोवृत्तिस्थिरीकरणलक्षणानि उपासनानि । निदिध्यासनाद्भेदमाह—सगुणेति । उपासनानां ज्ञानाद्भेदं दर्शयति—मानसव्यापाररूपाणीति । शाण्डिल्यविद्या नाम "सर्वं खल्विदं ब्रह्म" इत्युपक्रम्य "स[5] ऋतुं कुर्वीत मनोमयः प्राणशरीरो भारूप" इत्यादिना छान्दोग्ये विहिता । वाजिनामग्निरहस्याख्येऽपि काण्डे "स आत्मानमुपासीत मनोमयं प्राणशरीरं" इत्यादावुक्ता । बृहदारण्यके[6] च "मनोमयोऽयं पुरुषो भाःसत्य" इत्यादौ प्रत्यभिज्ञाता विद्या । आदिशब्दाद्हैरण्यवैश्वानरादिविद्यान्तरग्रहः[7] ।

इदानीमुक्तलक्षणानां नित्यादीनामीश्वरार्पणतयानुष्ठीयमानानां परमफलं दर्शयति—एतेषामिति । आदिपदान्नैमित्तिकप्रायश्चित्तयोर्ग्रहः । नित्यादीना-

---

१. *Bṛih.* 4. 4. 5. २. *Chhā.* 5. 10. 7. ३. See Notes. ४. *Tait. Saṁhitā* 2. 2. 5. 3. ५. *Idem* 2. 2. 2. 5. The two words आहिताग्नेः and अग्निः, however, are not in TS. ६. *Idem.* 2. 2. 5. 4. ७. *Manu.* xi. 209–216. ८. *Chhā.* 3. 14. 1, 2. ९. *Śatapatha.* 10. 6. 3. 2. १०. *Bṛih.* 5. 6. 1. ११. *Chhā.* 8. 1; 5. 11–18.

मुपात्तदुरितक्षयद्वारा बुद्धिशुद्धिहेतुत्वमिति द्रष्टव्यं निर्गतनिखिलकल्मषतयेत्युक्तत्वात् ।

"नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्" ।

इत्यादिस्मृतेः "धर्मेण पापमपनुदति" इति श्रुतेश्च चित्तशुद्धेः परमप्रयोजनत्वं परम्परया मोक्षसाधनत्वात् । तथाच स्मृतिः—

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु" ॥

इत्युपक्रम्य

"असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति" ॥ इति ।

तदुक्तं नैष्कर्म्यसिद्धावपि—"नित्यकर्मानुष्ठानाद्धर्मोत्पत्तिर्धर्मोत्पत्तेः पापहानिस्ततश्चित्तशुद्धिस्ततः संसारयाथात्म्यावबोधस्ततो वैराग्यं ततो मुमुक्षुत्वं ततस्तदुपायपर्यैषणं ततः सर्वकर्मसन्न्यासस्ततो योगाभ्यासस्ततश्चित्तस्य प्रत्यक्प्रवणता ततस्त्वमस्यादिवाक्यार्थपरिज्ञानं ततोऽविद्योच्छेदस्ततः स्वात्मन्यवस्थानं" इति । उपासनानां त्विति । तुशब्दः कर्मभ्य उपासनाया वैशिष्ट्यद्योतनार्थः । तस्य नित्याद्यनुष्ठानक्षपितकल्मषतया विशुद्धस्य चित्तस्य शास्त्रप्रकाशिते ध्येये ज्ञेये वा विषय ऐकाग्र्यं निश्चलत्वमित्यर्थः । सूक्ष्मार्थावधारणसमर्थत्वमिति यावत् । पूर्वोक्तप्रकारेणानुष्ठीयमानानां नित्यादीनामुपात्तदुरितक्षयद्वारा शुद्ध्यादिपरम्परया ज्ञानहेतुत्वे प्रमाणमाह—विविदिषन्तीति । आदिपदात् "तपसाऽनाशकेन" इति वाक्यशेषग्रहः । विविदिषन्तीति विविदिषासम्बन्धे विधिप्रत्ययोऽनुसन्धेयोऽपूर्वत्वात् । नहि यज्ञादीनां विविदिषासंयोगः पूर्वं प्राप्तो येनानुवादत्वं वाक्यस्य कल्पेत । ननु यज्ञादीनां यावज्जीववाक्येनावश्यकर्तव्यतया प्राप्तानां विविदिषार्थत्वे नित्यानित्यसंयोगः प्रसज्येत यदि च विविदिषार्थं यज्ञाद्यनुष्ठानमपरमिष्येत ततः संसारव्यावृत्सूनां द्विरनुष्ठानं स्यादिति चेन्न खादिरादिवत्संयोगपृथक्त्वोपपत्तेः । न च तर्हि तेनैव न्यायेन कर्मणां मोक्षार्थत्वमपीति शङ्कनीयं ज्ञानकर्मसमुच्चयनिराकरणात् । तथाच न्यायः—"अत एवाग्नीन्धनाद्यनपेक्षा" इति । कर्मणां ज्ञानं प्रत्यारादुपकारकत्वं तु स्यात् "सर्वापेक्षा च यज्ञादि-

---

१. *Mahānāra.* 22. 1. २. *Gītā.* xviii. 45, 49. ३. (Bombay Sanskrit Series) i. 52. ४. *Bṛih.* 4. 4. 22. ५. As, for example, "यावज्जीवमग्निहोत्रं जुहोति," and "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत." *Mīmāṁsābhāṣya* 2. 4. 1. ६. *Brahmasūtra* 3. 4. 25.

श्रुतेरश्ववत्" इति न्यायात्[3]। उक्तं च भाष्यकृद्भिः[4]—"विविदिषासंयोगात्तु बाह्येतराणि यज्ञादीनि" इति। तत्रैव स्मृतिं संवादयति—तपसेति। आदिपदात् "कषायपक्तिः कर्माणि"[5] इत्यादिस्मृत्यन्तरग्रहः॥

ननु नित्यादेः सत्त्वशुद्धितदैकाग्र्यफलकत्वे "कर्मणा पितृलोको विद्यया देवलोकः"[6], "सर्व एते पुण्यलोका भवन्ति"[7] इति श्रुतिर्नित्यादीनां पितृलोकादिफलपरा पीड्येतेत्यत आह—नित्यनैमित्तिकयोरिति। अत्र प्रायश्चित्ताग्रहणं तस्यावान्तरफलाभावात्। न ह्युपात्तदुरितक्षयमन्तरेण तस्य किञ्चित्फलं श्रुतमस्ति। अन्ययोस्तु तच्छ्रूयत इति विशेषः। नित्यनैमित्तिकयोः पितृलोकप्राप्तिरवान्तरफलमुपासनानां सत्यलोकप्राप्तिरिति विवेकः। "तद्यथा आग्नेये फलार्थे निर्मिते छायागन्धावित्यनूत्पद्येते"[8] इति स्मृत्युक्तछायागन्धवत्पितृलोकादिफलस्यावान्तरत्वमानुषङ्गिकत्वम्। तदुद्देशेन नित्यादेरविधानाद्विविदिषासंयोगस्य च विधानाच्छुद्धेरेव महाफलत्वमिति भावः। ननु पितृलोकस्य कथं नित्यादिसाध्यत्वं श्राद्धादिकर्मसाध्यत्वात्। देवलोकस्य च

"अष्टाशीतिसहस्राणां मुनीनामूर्ध्वरेतसाम्।
उत्तरेणार्यमणः पन्थाः··· ··· ···"[9]॥

इत्यादिस्मृतेर्नैष्ठिकाद्यूर्ध्वरेतआश्रमधर्ममात्रसाध्यत्वावगमात्कुतो विद्याफलत्वमिति चेदत्र पृच्छामः। किं श्राद्धादि नित्यनैमित्तिकरूपं कर्म काम्यं वेति। आद्ये कथं न नित्यादेः पितृलोकः फलम्। द्वितीये त्वस्य विध्युद्देशफलेनैव निराकाङ्क्षत्वात्पितृलोकफलसम्बन्धाभावान्नापि विना विद्यामूर्ध्वरेतआश्रमधर्ममात्रेणोत्तरमार्गगमनं सम्भवति।

"विद्यया तदारोहन्ति यत्र कामाः परागताः।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः"[10]॥

इति श्रुतौ विद्याविरहिणामुत्तरमार्गनिषेधात्। निर्णीतं चैतदाचार्यैर्गुणोप-

---

१. *Idem.* 26. २. *S'ārīrakabhāṣya* on 3. 4. 27, last sentence. ३. The whole verse stands thus in *Bhāṣya* on 3. 4. 26:—"कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः। कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते"॥ I cannot trace it to its source. ४. *Bṛih.* 1. 5. 16. ५. *Chhā.* 2. 23. 2. ६. *Āpastambadharmasūtra* 1. 7. 20. 3. It is quoted by S'ankara on *Brahmasūtra* 4. 3. 14, and referred to by Sures'vara, in his *Bṛihadāraṇyakavārtika* (page 34). He says "फलान्तरश्रुतेः साक्षात्तद्यथाग्नस्मृतेस्तथा। आग्ने निमित इत्यादि ह्यापस्तम्बस्मृतेर्वचः"॥ See Notes. ७. *Vishṇu P.* 2. 8. 93, slightly modified. ८. *S'ata.* 10. 5. 4. 16.

संहारपादे "[1]अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां" इत्यत्राधिकरणे [2]स्मृतिर्नापुनरावृत्तिमूर्ध्वरेतसामाचष्टे किन्तु गमनमात्रम्। श्रुतौ तु देवलोकशब्दितब्रह्मलोकगतानां पुनरावृत्यभावोऽवगम्यते। "[3]एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्त" इति, "तेषामिहै न पुनरावृत्तिः" इति च। यत्पुनरत्रेममिहेति च विशेषणात्कल्पान्तर आवृत्तिरवगम्यते तद्विद्यारहितानामनावृत्तिस्तु विद्यावतां क्रममुक्त्याम्नानादिति रहस्यम्। नन्वेवं सति छान्दोग्यभाष्यविरोधस्तत्र हि महता संरम्भेण "ये चेमेऽरण्ये[4] श्रद्धातप इत्युपासत" इति पञ्चाग्निविद्यागतवाक्यव्याख्यानावसरे गृहस्थानां विद्यारहितानामनृतपैशुन्यमायादम्भाब्रह्मचर्यादिभिरपूतत्वान्न स्वधर्मनिष्ठामात्रेणोत्तरमार्गगतिरस्ति। इतरेषां नैष्ठिकवानप्रस्थमुख्यसंन्यासिनां तु तद्विपरीतत्वात्पूततया स्वाश्रमधर्मनिष्ठामात्रेणोत्तरमार्गगतिरपुनरावृत्तिलक्षणा भवेदित्याचार्यैरेव निरूपितम्। "न तत्र दक्षिणा" इत्यादिश्रुतिः परममुक्त्यपेक्षेति च व्याख्यातम्। तत्कुत एवं विभागवचनमिति चेत्सत्यम्। ऊर्ध्वरेतसामुत्तरमार्गेण ब्रह्मलोकगमनं विद्यां विनापीत्येतावन्मात्रं तत्रोक्तं न पुनरात्यन्तिक्यपुनरावृत्तिस्तत्र विवक्षिता।

"[5]आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते"।

इत्यापेक्षिकामृतत्ववचनोदाहरणात्। [6]गुणोपसंहारे च "तस्मादिह श्रद्धातपोभ्यां विद्यान्तरोपलक्षणं वाजसनेयिनस्तु पञ्चाग्निविद्याधिकारेऽधीयते 'ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धासत्यमुपासत' इत्युदाहृत्य तत्र श्रद्धालवो ये सत्यं ब्रह्मोपासत इति व्याख्येयं सत्यशब्दस्य ब्रह्मण्यसकृत्प्रयुक्तत्वात्" इति तैरेव व्याख्यातत्वात्। याज्ञवल्क्यश्चाह—

"[7]सप्तर्षिनागवीथ्यन्तर्देवलोकं समाश्रिताः।
तावन्त एव मुनयः सर्वारम्भविवर्जिताः॥
तपसा ब्रह्मचर्येण सङ्गत्यागेन मेधया।
तत्र गत्वावतिष्ठन्ते यावदाभूतसम्प्लवम्" ॥ इति।

तस्मादात्यन्तिक्यपुनरावृत्तिर्विद्यावतामेवेति युक्तं क्रममुक्तिहेतुत्वाद्विद्यायाः। न च तर्हि मुक्तेरेव विद्यायाः परमप्रयोजनत्वाच्चित्तैकाग्र्यस्य

---

१. *Brahmasūtra*. 3. 3. 31. As to गुणोपसंहार see *Bhāṣya* on 3. 3. 5, and अधिकरणमाला. २. NP. wrongly स्मृतिर्न पुन°. ३. *Chhā*. 4. 15. 6. ४. *Bṛih*. 6. 1. 18 (Mādhyandina). ५. *Chhā*. 5. 10. 1. ६. *Vishṇu P*. 2. 8. 96. ७. *Śārīrakabhāṣya* on 3. 3. 31. ८. *Bṛih*. 6. 2. 15. ९. *Yājñ. Smṛiti*. 3. 187, 188.

तदयुक्तमिति वाच्यं सगुणब्रह्मविदस्तथात्वेऽपि निर्गुणब्रह्मविद्याधिकारिणः चित्तैकाग्रताया एव परमप्रयोजनत्वात् । तस्यापि साक्षात्कारोदयात्प्रागेव प्रमीतस्य ब्रह्मलोकगमनोपपत्तेः ।

"प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः" ।

इत्यादिस्मृतेश्च । सगुणब्रह्मविदोऽपि ब्रह्मलोकगतस्य तत्रत्यं भोगं विद्यान्तरफलं भुक्त्वातस्तत्रोत्पन्नचित्तैकाग्र्यद्वारा स्वयम्भातवेदान्तवाक्यार्थज्ञानादेव मुक्तिरिति नियमात् । भवत्येव चित्तैकाग्रतोपासनायाः परमप्रयोजनमिति न किञ्चिदुच्यते । तस्मात् "सर्वे एते पुण्यलोका भवन्ति" इति श्रुतेर्नित्यनैमित्तिकयोः फलवत्त्वस्य वाचनिकत्वात्तथात्वेऽप्युक्तलक्षणभेदेन काम्यवैषम्यात्फलविशेषस्य चाश्रुतत्वात्पितृलोकस्य च फलात्मनः कर्मविशेषाकाङ्क्षितत्वान्नष्टाश्वदग्धरथन्यायेन "कर्मणा पितृलोक" इति श्रुतिरुपपद्यते । काम्यप्रायश्चित्तयोः फलविशेषोद्देशेन पापक्षयमात्रार्थत्वेन च विधानात्फलान्तराकाङ्क्षाभावात्तथाङ्गावबद्धानामुपासनानां कर्मसमृद्ध्यर्थत्वादनङ्गावबद्धानामपि प्रतीकोपासनानामब्रह्मोपासनानां चाभ्युदयफलत्वात्कार्यकारणब्रह्मोपासनानामवान्तरफलं देवलोकशब्दवाच्यब्रह्मलोक इति परिशेषात्सिद्धेर्युक्तं 'विद्यया देवलोक' इति वचनमित्यलं प्रपञ्चेन ॥

साधनसम्पन्नः प्रमाताधिकारीत्युक्तं तत्र कानि साधनानि कियन्ति वेत्यपेक्षायां तानि विभजते—साधनानीति । विवेकमन्तरेण वैराग्यायोगाद्विवेकस्य प्राथम्यं न हीदं हेयमिदमुपादेयमिति विवेचनमन्तरेण हेयाद्रागनिवृत्तिः सम्भवति । अनिवृत्तरागस्य शमाद्यभावाच्छमाद्यपेक्षया विरागस्य पूर्वमुद्देशः । शान्त्यादिहीनस्य मुमुक्षायोगात्ततः प्रागेव शमाद्युद्देशः । एतैस्त्रिभिः साधनैः सम्पन्नस्य मुमुक्षाया अवश्यम्भावात्तस्यां च सत्यां ब्रह्मजिज्ञासायां नियमेन प्रवृत्तेर्मुमुक्षान्तान्येव साधनानीत्यभिप्रायः ॥

विवेकादीन्युद्देशक्रमेण लक्षयति—नित्यानित्यवस्तुविवेकस्तावदित्यादिना । नित्यत्वं नाम कालानवच्छिन्नत्वमनित्यत्वं नाम तद्विपरीतत्वम् । न स्थास्यतीति लोकागमयोर्व्यवहारायोग्यं नित्यं तद्विपरीतमनित्यमिति वा । तथाच नित्यानित्ये च ते वस्तुनी च नित्यानित्यवस्तुनी तयोर्विवेक इति विग्रहः । केचित्तु नित्यानित्ययोर्वस्तुनोः सितुं शीलं ययोस्ते नित्यानित्यवस्तुनी नित्यत्वमनित्यत्वं च तयोः साश्रययोर्विवेको नित्यानित्यवस्तुविवेक इत्याहुः । स चापाततोऽधिगतवेदार्थस्यानुमानकुशलस्य ब्रह्मैव नित्यं वस्तु ततोऽन्यद्-

---

१. *Gītā.* vi. 41. २. *Chhā.* 2. 23. 2. ३. See Notes. ४. *Brih.* 1. 5. 16. ५. *Idem.* ६. See Notes.

खिलमचेतनमनित्यमिति विवेको भवति । तथाहि । "यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते तदेव ज्योतिषां ज्योतिः", "नित्यं विभुं सर्वगतं सुसूक्ष्मं", "आकाशवत्सर्वगतश्च नित्यः", "अजो नित्यः शाश्वतः", "सत्यं ज्ञानमनन्तं ब्रह्म", "ब्रह्म रातेर्दातुः परायणं", "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा", "यो वै भूमा तदमृतं" इत्यादिश्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति । तथा "नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीत्", "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्", "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं", "नेति नेति", "नेह नानास्ति किञ्चन", "यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं", "अथ यदल्पं तन्मर्त्यं" इत्यादिश्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्र भेदप्रपञ्चेऽनित्यत्वं च तस्यैव पुंसः प्रतिभाति । तथानुमानमपि विमतोऽचेतनवर्गोऽनित्योऽविभक्तत्वाद्घटपटस्तम्भादिवत् इति । अनेन हि विभक्तस्यानित्यत्वेऽवगते तस्मिन्ननुगतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमप्यर्थादवगच्छति । आकाशादेश्चोत्पत्तिमत्त्वसाधनेनानित्यत्वमुत्तरत्र वर्णयिष्यामः । न चैवं श्रुत्यनुमानाभ्यां विवेके सति ब्रह्मणो विज्ञातत्वादलं विचारेणेति वाच्यमापाततो नित्यं वस्तु ब्रह्मेत्यवगमेऽपि तस्याद्वितीयत्वप्रत्यगभिन्नत्वादेरनिर्धारणाज्जिज्ञासाया अनिवृत्तेः । इत्यास्तां विस्तरः ॥

ऐहिकानामिति । इहलोके भवा ऐहिकाः प्रतिपन्नशरीरसम्बन्धिनः स्वचन्दनवनितागृहक्षेत्रपशुभृत्यादिविषयजन्यसुखरूपा भोगाः कृषिसेवाप्रतिग्रहादिकर्मजन्या अनित्या यथा दृष्टा एवमामुष्मिका अप्यमृतादिविषयसेवाजन्यानन्दा यागादिकर्मजन्यत्वादनित्या भवितुमर्हन्तीति निश्चित्य तेभ्यो नितरां छर्दितान्नवज्जुगुप्सेहामुत्रार्थफलभोगविराग इत्यर्थः । अयं भावः । सुखं मे निरतिशयं भूयाद्दुःखं मे माभूदणुमात्रमपीत्यखिलप्राणिनामस्त्यभिनिवेशः । ते चैवमभिनिविष्टाः पुरुषकारावलम्बनेन सर्वोत्साहं यतन्तोऽपि न लभन्ते सुखमात्यन्तिकं दुःखाभावं च । कथम् । केचित्समुद्रयानराजप्रीणनाद्यतिकष्टमनुभूय फलकाले स्वयं नश्यन्ति । केचित्प्राप्तफला अपि व्याध्याद्युपद्रुताः सन्तो भोगं न लभन्ते । केचित्तु प्राप्तेषद्भोगा अपि भोग्यभार्या-

---

१. *Brih.* 4. 4. 16. The Upaniṣad reads तद्देवाः (with which N. agrees), not तदेव. २. *Muṇḍ.* 1. 1. 6. ३. See footnotes to page 57. ४. *Kaṭha.* 2. 18. ५. *Tait.* 2. 1. ६. *Brih.* 3. 9. 28. ७. *Chhā.* 7. 24. 1. ८. *Idem.* ९. *Brih.* 1. 2. 1. १०. *Ait.* 1. 1. ११. *Chhā.* 6. 2. 1. १२. *Brih.* 2. 3. 6. १३. *Idem.* 4. 4. 19. १४. *Chhā.* 7. 24. 1. १५. *Idem.*

पुत्रादिविनाशाद्वा तद्विसंवादाद्वान्यैर्वा सह स्पर्धासूयादिभिः सञ्चितभोग्यजातस्य क्षयभयेनानावृष्ट्यादिचिन्तासन्तापादिभिश्च क्षणमपि सुखमलभमानाः कष्टा दरिद्राः काणकुब्जक्लीबबधिरादयो बुभुक्षापिपासार्दिता बहुलमुपलभ्यन्ते । एवं दुःखबहुले संसारे सुखलवमात्रमनुभवन्नपि कृपणवद्विशुद्धचित्तो न सज्जते किन्तु विरज्यत एवेति । नन्वस्त्वेवमैहिकं सुखमनित्यत्वादिदोषदुष्टत्वाद्विरागास्पदं तथापि न पारलौकिकादपि विरक्तिरुपपद्यते क्षयिष्णुत्वानुमानस्य "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति श्रुतिबाधितविषयस्यानुत्थानादिति चेन्नैवम् । "तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत" इति श्रुत्या वस्तुबलावलम्बनेन प्रवृत्त्यानन्यपरया सापेक्षाक्षय्यफलविषयकायाः प्राशस्त्यलक्षणाया विध्येकवाक्यत्वेनान्यपरायास्तस्या एव बाधितत्वात् । न हि जन्यं नित्यं भावरूपं दृष्टमत ऐहिकभोगवदेवाब्रह्मस्तम्बपर्यन्तेषु भोगेषु वैराग्यमुपपद्यत इति । तदुक्तं भगवता व्यासेन—

"यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥" इति ।

शमादीन्विभजते—शमादय इति । मनसो बहिःप्रवृत्तौ बाह्येन्द्रियाणां द्वारत्वात्तन्निरोधमन्तरेण मनोनिग्रहाशक्तेर्दमानन्तरं शमो द्रष्टव्यः पाठक्रमादर्थक्रमस्य बलीयस्त्वादग्निहोत्रयवागूपाकवत् । मनसोऽन्तःकरणस्य निग्रहो विषयेभ्यो बलादाकर्षणं शम इत्येतावत्युक्ते श्रवणादिविषयेभ्योऽपि निग्रहे प्राप्ते ततो निग्रहस्य ज्ञानानुकूलत्वाभावादानर्थक्यमित्याशङ्क्य निग्रहं विशिनष्टि—श्रवणादीति । मननादिसङ्ग्रहार्थमादिपदम् । एवमुत्तरत्रापि द्रष्टव्यम् । तद्व्यतिरिक्तेत्यत्र श्रवणादिस्तच्छब्दार्थः । निवर्तितानां तेषां बाह्यान्तरिन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यः श्रवणादिव्यतिरिक्तविषयेभ्य उपरमणं पुनर्विषयप्रवृत्त्यनुत्साहकरणेन स्थिरीकरणमुपरतिरित्यर्थः । ननु शमदमयोर्लक्षणाभ्यामिदमुपरतिलक्षणं सङ्कीर्णं प्रतिभाति बहिःप्रवृत्तेन्द्रियव्यापारनिरोधात्मकस्य लक्षणार्थस्य तुल्यत्वादित्यपरितोषात्प्रकारान्तरेणोपरतिं लक्षयति—अथवेति । विहितानामवश्यकर्तव्यतया चोदितानां सन्ध्यावन्दनाग्निहोत्रादीनां कर्मणां विधिना

---

१. *Śatapatha* 2. 6. 3. 1. २. *Chhā.* 8. 1. 6. ३. प्रशस्तलक्षणायाः P. ४. *Mahābhārata* xii. 6636 (Chap. 177), and 9919 (Chap. 277). ५. "The Agnihotra being enjoined before the preparation of the gruel (*yavāgū*) which is a prerequisite." P. (trans.) See Notes.

"तद्वैके प्राजापत्यामेवेष्टिं कुर्वन्ति"[1],
"प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्[2] ।
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" ॥

इत्यादिश्रुतिस्मृत्युक्तमार्गेण परित्यागः परिव्रजनं सन्न्यास उपरतिरित्यर्थः । शमादिवत्सन्न्यासोऽप्यात्मज्ञानान्तरङ्गत्वादवश्यं मुमुक्षुणानुष्ठेयः । तथाच श्रुतयः—

"न[3] कर्मणा न प्रजया धनेन
त्यागेनैके अमृतत्वमानशुः" ॥,
"वेदान्त[4]विज्ञानसुनिश्चितार्थाः
सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः" ॥,

"एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति"[5], "पुत्रै[6]षणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति"[7], "तानि[8] वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्" इत्याद्याः ।

स्मृतयश्च—

"नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति" ॥,
"त्वंपदार्थविचाराय सन्न्यासः सर्वकर्मणाम्" ॥,
"अर्थ[9]स्य मूलं निकृतिः क्षमा च
कामस्य रूपं च वपुर्वयश्च ।
धर्मस्य यागादि दया दमश्च
मोक्षस्य सर्वोपरमः क्रियाभ्यः" ॥,
"प्रवृ[10]त्तिलक्षणो योगो ज्ञानं सन्न्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य सन्न्यसेदिह बुद्धिमान्" ॥ इत्यादयः ।

न्यायश्च पुरुषस्योद्देश्यसिद्धये यदुपयुक्तमविरोधि च तदुपादेयं विपरीतं तु हेयमिति । तदिह ब्रह्मात्मजिज्ञासूनां वेदान्तविचारे क्रियमाणे न कर्मणामुपयोगो विनापि कर्म तदनुष्ठानसिद्धेः । नाप्यविरोधः । कर्मविक्षिप्तचित्तस्य वेदान्तार्थनिर्णयाशक्तेः कर्मणां विचारविरोधित्वात् । न ह्यपेतब्रह्मक्षत्राद्यकर्त्रभोक्तृब्रह्माहमस्मीत्यात्मनि विचार्यमाणे ब्राह्मणाद्यध्यासविशिष्टात्मप्रतिपत्त्यधीनेषु कर्मस्वधिकारो न विरुध्यते येनात्मजिज्ञासुना कर्माणि

---

१. *Jābāla* 4. २. *Manu.* 6. 38. ३. *Mahānāra.* 10. 5. ४. *Mund* 3. 2. 6. ५. *Brih.* 4. 4. 25. (Mādhyandina). ६. *Idem.* 26. ७. *Mahānāra.* 21. 2. ८. *Gītā* xviii. 49. ९. *Upades'asāhasrī* xviii. 222 (**विवेकाय**). १०. *Saṅkṣepas'ārīraka.* 3. 366. ११. *Mahābhārata* xiv. 1195 (chap. 43). See Notes.

न त्यक्तव्यानि स्युः । तस्माच्छ्रुतिस्मृतिन्यायैरात्मज्ञानाङ्गतया यः सन्न्यास कर्तव्यतया प्राप्तः सोपरतिरिति भावः । शीतोष्णादीत्यादिपदान्मानापमान-लाभालाभशोकहर्षादिग्रहः । श्रवणादावित्यत्रादिशब्दो मननादिसङ्ग्रहार्थः । तदनुगुणेत्यत्र गुरुशुश्रूषापुस्तकसम्पादनतद्रक्षणादिः श्रवणाद्यनुगुणो विषयो निर्दिश्यते । न पुनः सुखवासद्रव्यान्नादिसङ्ग्रहादेरपि श्रवणाद्यनुकूलत्वात्तदर्थं मठारम्भप्रतिग्रहादावपि चित्तसमाधिः कर्तव्य इहोपदिश्यते "दण्डमाच्छा-दनं कौपीनं परिग्रहेच्छेषं विसृजेत्" इति सन्न्यासकाले त्याजितस्य दण्डकौ-पीनाद्यतिरिक्तस्य विना प्रतिप्रसवशास्त्रं सङ्ग्रहानुपपत्तेरित्यर्थः । समाधिरै-काग्र्यं तत्परत्वमिति यावत् । गुरुवेदान्तादीत्यादिपदात्स्मृतीतिहासपुराणानां ग्रहः विश्वास इदमित्थमेव नान्यथेति गुर्वादिवाक्येषु नियता बुद्धिः सा श्रद्धेत्यर्थः ॥

चरमं साधनं लक्षयति—मुमुक्षुत्वमिति । मोक्षो नाम विद्यानिरस्ता-विद्यातत्कार्यब्रह्मात्मनावस्थानम् । तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्व-मित्यर्थः । ननु

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवति....." ॥

इति श्रुतेः सर्वकामविमुक्तस्य मोक्षाधिकारात्कथमिच्छाधिकारिविशेषण-मिति चेन्नायं दोषोऽनात्मविषयेच्छाया एव कामत्वात्तदभिप्राया श्रुतिः । मोक्षेच्छायास्तु आत्मविषयतयाकामत्वात् "अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकाम" इति श्रुतेरात्मकामस्याप्तकामत्वेनाकाम-त्वावगमादिति । विद्याधिकारिणः शमादिसाधनवत्त्वे श्रुतिं प्रमाणयति— शान्तो दान्त इति । "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा-त्मन्येवात्मानं पश्यति" इति काण्वाः पठन्ति । समाहित इत्यस्य स्थाने "श्रद्धावित्तो भूत्वे"ति माध्यन्दिनाः । तदुभयपाठानुरोधेन गुणोपसंहार-न्यायमाश्रित्येह शमादयः षण्निर्दिष्टा इति द्रष्टव्यम् । शमादेर्विद्याहेतुत्वं श्रीभगवानप्याह—

"योगारूढस्य तस्यैव शमः कारणमुच्यते" ॥
.....अशान्तस्य कुतः सुखं" ॥ तथा ।,
"यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता" ॥ इति ।,

---

१. *Aruneya Up.* 1. २. निहिता M. निश्चयात्मिका P. ३. *Brih.* 4. 4. 7. ४. *Idem.* 4. 4. 6. ५. *Idem.* 4. 4. 23. ६. See Notes. ७. *Gītā* vi. 3. ८. *Idem.* 2. 66. ९. *Idem.* 2. 58.

"[1]सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" ॥ इति,
"[2]मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत" ॥ इति,
"[3]समाधावचला बुद्धिः....." ॥
"मय्येव मन आधत्स्व मयि बुद्धिं निवेशय" ॥ इति,
"[4]श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः" ॥
"[5]अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति" ॥ इति च ॥

मुमुक्षुत्वेऽपि—

"[6]मुमुक्षुर्वै शरणमहं प्रपद्ये" ॥,
"[7]ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी" ॥

इति श्रुतिस्मृती द्रष्टव्ये । एवं विशेषणविशिष्टो वेदान्ताधिकारीति निरूपितेऽर्थेऽभियुक्तवचनमुदाहरति—उक्तं च—प्रशान्त° इति । प्रशान्तचित्ताय शान्ताय । जितेन्द्रियाय दान्ताय । प्रहीणदोषाय नितान्तनिर्मलस्वान्ताय । यथोक्तकारिणे काम्यनिषिद्धवर्जनपुरःसरं नित्याद्यनुष्ठानलब्धेश्वरप्रीतये। गुणान्विताय विवेकवैराग्योपरतितितिक्षासमाधानयुक्ताय । सर्वदा गुरुमनुगताय श्रद्धालवे । एवंभूताय मुमुक्षव एतदात्मज्ञानं सततं गुरुणा देयमिति श्लोकार्थः ॥

तदेवमधिकार्यनुबन्धो निरूपितः । इदानीं विषयानुबन्धं व्यपदिशति—विषय इति । क्षीरनीरवत्परस्परविभिन्नयोः समानाभिहारस्यैक्यशब्दार्थत्वाज्जीवब्रह्मणोरपि स्वरूपतो भिन्नयोरैक्यं मिश्रीभाव इति शङ्का स्यात्सा माभूदिति व्याचष्टे—शुद्धचैतन्यमिति । चैतन्यस्य शुद्धत्वं सर्वधर्मातीतत्वमेकरसत्वम् । ननु कथं शुद्धचैतन्यस्य विचारविषयत्वं यावता प्रागपि विचारात्तत्स्वप्रकाशं स्वयमेवावभासत इत्याशङ्क्य स्वरूपेणावभासमानत्वेऽपि परिपूर्णसच्चिदानन्दप्रत्यक्स्वरूपतयाज्ञायमानत्वाद्विषयत्वोपपत्तिरित्यभिप्रेत्याह—प्रमेयमिति । प्रमेयत्वमज्ञातत्वम् । अयं भावः । ब्रह्मात्मवस्तुनो विषयस्यात्यन्ताप्रसिद्धौ न विचारप्रवृत्तिः सम्भवत्युद्देश्यविषयाप्रसिद्धेः । तथा

---

१. *Gītā*. xviii. 66. २. *Idem*. ii. 14. ३. *Idem*. ii. 53. ४. *Idem*. xii. 8. ५. *Idem*. iv. 39. ६. *Idem*. iv. 40. ७. *S'vet*. 6. 18. ८. *Gītā* xv. 4. ९. *Maxims* ii (2nd. edn.).

यथावत्प्रसिद्धौ च न विचारप्रवृत्तिरनुपयोगात् । तथाच केनचिद्रूपेण प्रसिद्धं ब्रह्मात्मवस्तूद्दिश्य विचारेण तद्याथात्म्यं निर्णेयम् । तदिह ब्रह्मपदस्य निरतिशयमहत्त्ववति सामान्येन प्रसिद्धत्वादात्मपदस्य च प्रतीचि सामान्येन प्रसिद्धेः "[1]अयमात्मा ब्रह्म" इत्यादौ समभिव्याहारादैक्यस्याप्यापाततः प्रसिद्धेस्तद्विशेषस्य च पारोक्ष्यसद्वयत्वाद्यनधिकरणत्वस्य देहेन्द्रियमनोबुद्धिप्राणाहंकृतिविलक्षणतत्साक्षिप्रत्यगभिन्नसच्चिदानन्दाद्वयब्रह्मरूपत्वस्य चाप्रसिद्धेः सामान्यतः प्रसिद्धवस्तूद्देशेन तद्विशेषनिर्धारणाय विचारप्रवृत्युपपत्तिरिति । यद्वा । परोक्षतः प्रसिद्धं ब्रह्मात्मवस्तूद्दिश्य तत्स्वरूपसाक्षात्काराय विचारप्रवृत्युपपत्तिरिति । तथाच श्रुतिः—"[2]आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यात्मसाक्षात्कारमनूद्य तादर्थ्येन मननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणमनुष्ठेयं विधत्ते । [3]स्मृतिरपि—

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
मत्वा च सततं ध्येय एते दर्शनहेतवः" ॥ इति ।

ननु प्रधानादीनामपि कपिलकणादादिस्मृतिसिद्धानां वेदान्तवाक्यविषयत्वात्कथं जीवब्रह्मैक्यस्य विषयत्वसंकीर्तनमिति तत्राह—तत्रैवेति । उपक्रमोपसंहारादिभिर्लिङ्गैर्वेदान्ततात्पर्ये निरूप्यमाणे प्रत्यक्स्वरूपे ब्रह्मण्येव पर्यवसानदर्शनात्प्रधानादिषु चादर्शनाद्ब्रह्मैव वेदान्तविषयो न प्रधानादिरित्यर्थः । तथा च श्रुतिस्मृती भवतः । "[4]सर्वे वेदा यत्पदमामनन्ति", "[5]वेदैश्च सर्वैरहमेव वेद्य" इति च ॥

तृतीयमनुबन्धमाह—सम्बन्धस्त्विति । तदैक्यं प्रत्यग्ब्रह्मणोरैक्यं तच्च तत्प्रमेयं चेति तथा तस्येति विग्रहः । ननु कथं यथोक्तप्रमेयस्योपनिषत्प्रमाणबोध्यत्वं निर्धर्मके तस्मिञ्छब्दशक्तिगोचरत्वायोगादिति चेत्को भावः । शब्दादिहीनस्य वाच्यत्वानुपपत्तिरिति चेन्न । अनुक्तोपालम्भात् । असङ्गस्य लक्ष्यत्वानुपपत्तिरिति चेद्यथा लक्षणावृत्त्याश्रयणेन ब्रह्मात्मैक्यप्रतिबोधस्तथोत्तरत्र वक्ष्यामः ॥

चरममनुबन्धमाह—प्रयोजनं त्विति । तदैक्यप्रमेयशब्दः पूर्ववत् । अज्ञानं वक्ष्यमाणलक्षणम् । तस्य निवृत्तिः प्रयोजनमित्येतावत्युक्ते समूल-

---

१. *Bṛih.* 2. 5. 19. २. *Idem.* 2. 4. 5. ३. Quoted in *Bṛihadāraṇyakavārtika* 2. 4. 304.—"श्रोतव्यः श्रुतिवाक्येभ्य इत्यत्राशङ्क्यते यतः ।" but can trace it no further back. ४. *Kaṭha* 2. 15. ५. *Gītā* xv. 15.

दुःखोन्मूलनलक्षणं वैशेषिकाभिमतं प्रयोजनमभ्युपगतं प्रतिभायात् । तन्माभूदिति विशेषणान्तरोपादानम् । अज्ञाननिवृत्तिरानन्दावाप्तिश्च प्रयोजनमित्युक्ते नित्यनिरतिशयसुखाभिव्यक्तिर्निःशेषदुःखोच्छित्तिश्च प्रयोजनमिति भाट्टाभिमतं प्रयोजनं प्रतिभायात् । तन्माभूदिति तत्स्वरूपेत्युक्तम् । ब्रह्मात्मचैतन्यस्य चानन्दरूपत्वं प्रतिपादितमधस्तात् । विचारजन्यज्ञानस्योक्तोभयविधं प्रयोजनमित्यत्र क्रमेण श्रुती प्रमाणयति—तरतीत्यादिना । आत्मविद्भूमाख्यब्रह्मात्मसाक्षात्कारवाञ्छोकोपलक्षितसंसारमूलाज्ञानं तरत्यतिक्रामति । यः कश्चिद्ब्रह्म परमात्मानं प्रत्यग्रूपं वेद साक्षात्करोति स ब्रह्मैव भवति तद्रूप एव भवतीत्यर्थः ॥

नन्वविद्यानिवृत्तेर्विद्यासाध्यत्वेन प्रयोजनत्वेऽपि कथं स्वरूपानन्दस्य तथात्वं तस्य नित्यप्राप्तत्वेन विद्यासाध्यत्वाभावादिति चेत्सत्यं नित्यप्राप्तमप्यानन्दात्मब्रह्मस्वरूपमविद्यावस्थायां विस्मृतकण्ठगतचामीकरवदनवाप्तमिव भवति । विद्यया त्वविद्यानिवृत्तौ विज्ञातचामीकरवदभिव्यक्तिमापद्यमानमवाप्तमिव व्यपदिश्यत इति न काचिदनुपपत्तिरिति भावः ॥ ४ ॥

एवं साधनचतुष्टयसम्पन्नस्याधिकारिणो विज्ञातविषयादिमत आत्मयाथात्म्यजिज्ञासया गुरूपसत्तिं दर्शयति—अयमधिकारीति । जननमरणादीत्यादिपदाद्रागद्वेषादिग्रहः । संसारानलसन्तप्तो गुरुमुपसृत्य तमनुसरतीत्यन्वयः । उपसरणं समीपगमनमनुसरणमनुवृत्तिरिति भेदः । अत्युद्विग्नस्याविलम्बेन तच्छान्तिकरस्थानप्रवेशे दृष्टान्तमाह—प्रदीप्तेति । निदाघमध्याह्नार्कमरीचिसंन्यासखल्वाटः प्रदीप्तशिराः । शिशिरतरमधुरजलपरिपूर्णो महाह्रदो जलराशिः ।

"रिक्तपाणिर्न सेवेत राजानं देवतां गुरुम् ।"[1][2]

इति वचनमाश्रित्याह—उपहारपाणिरिति । उपहार उपायनं पाणौ यस्य सः । श्रोत्रियं ब्रह्मनिष्ठमिति गुरोर्विशेषणे । श्रोत्रियत्वं वेदवेदाङ्गपारगत्वं वेदान्तार्थपारगत्वं वा प्रकृतोपयोगात् । श्रोत्रियग्रहणमकामहतत्वावृजिनत्वयोरप्युपलक्षणार्थम् "यश्च श्रोत्रियोऽवृजिनोऽकामहत" इति श्रुतेः[3] । अकामहतत्वं ब्रह्मलोकानन्दादर्वाचीनेष्वानन्देषु वितृष्णत्वम् । अवृजिनत्वं यथोक्तकारितया निष्पापत्वम् । ब्रह्मनिष्ठत्वमौपनिषदब्रह्मात्मविज्ञानपरिपूर्ण-

---

१. *Maxims* ii. 17 (2nd. edn.). २. Quoted (with पश्येत however) in *Indische Sprüche*, as from *Vikramcharita*. 115. Compare, too, रिक्तपाणिर्न पश्येत राजानं ब्राह्मणं स्त्रियम् of *Mahābhārata* vii. 7886. ३. *Brih.* 4. 3. 33.

स्वमित्यर्थः । उक्तविधिना यथोक्तगुरूपसर्पणं विद्यार्थिनावश्यं कर्तव्यमित्यत्र प्रमाणमाह—समिदिति । समिच्छब्दो गुरोरनुरूपोपायनमात्रोपलक्षणपरः । आदिशब्दात् "आचार्यवान्पुरुषो वेद", "आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्" इत्यादिश्रुत्यन्तरसङ्ग्रहः । शिष्योपसृत्यनन्तरं गुरोरुपदेशक्रमं दर्शयति—स परमेति । स गुरुः परमकृपया प्रपन्नजनक्लेशदर्शनजातकरुणया तन्मतिप्रकाशनप्रवृत्त्या वा । तदुक्तमभियुक्तैः—

"एतदेव हि दयालुलक्षणं
यद्विनेयजनबुद्धिवर्धनम्" ॥ इति ।

उक्तार्थज्ञापिकां श्रुतिं पठति—तस्मा इति । "तस्मा एतत्प्रोवाच । यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामि" इत्यादिश्रुत्यन्तरमादिशब्दार्थः ॥ ५ ॥

अध्यारोपं सदृष्टान्तं लक्षयति—असर्प° इति । ननु कथमवस्तुनो निरात्मकस्यारोपो यावता क्वचिद्दृष्टपूर्वस्य सत एव क्वचिदारोपो दृष्टः । उक्तं च भट्टाचार्यैः—

"अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि ।
प्रज्ञातगुणसत्ताकमध्यारोप्येत वा न वा" ॥ इति ।

उच्यते । संस्कारजन्यो हि भ्रमस्तत्सिद्धये पूर्वप्रतीतिमात्रमपेक्षते न पुनः पूर्वप्रतीतस्य परमार्थसत्त्वमपि व्यतिरेकाभावात्संशयविपर्ययदृष्टेष्वपि संस्कारकार्यस्मृतिदर्शनात् । तथा हि लोकेऽनुभवोऽस्मिन्वल्मीककूटे मम पुरा स्थाणुः पुरुषो वेति सन्देह आसीदस्मिन्छुक्तिशकले रजतमिदमिति भ्रम आसीदित्यादिः । न च संशयविपर्ययोरेवेयं स्मृतिर्न तदर्थयोरिति वाच्यमर्थशून्ययोस्तयोः स्मृतिविषयत्वानुपपत्तेः । तस्मान्निरुपाख्यविलक्षणस्य पूर्वपूर्वभ्रमदृष्टस्याप्युत्तरोत्तरारोपोपपत्तेर्भ्रमप्रवाहस्य चानादित्वेनान्योन्याश्रयानवस्थादिप्रसङ्गानवकाशाद्युक्तं वस्तुनि परमार्थे सत्यवस्तुनोऽनिर्वचनीयस्यारोप इत्यर्थः । वस्त्ववस्तुनी क्रमेण लक्षयति—वस्त्विति । ननु ब्रह्मण एव वस्तुत्वे जीवस्य शुक्त्यादेश्चावस्तुत्वात्कर्तृत्वाद्यध्यारोपे रजताद्यध्यारोपे चाव्याप्तिः स्यादिति चेन्न । ब्रह्मण्येव जीवत्वस्यापि कल्पितत्वात्कर्तृत्वादेश्च सोपाधिकभ्रमतयोपाध्यनुरक्ते ब्रह्मण्येवाध्यारोपाच्छुक्त्यादेरपि रजताद्यधिष्ठानचैतन्यावच्छेदकत्वेनाधिष्ठानत्वमुपचर्यते । न पुनस्तस्यैवाधिष्ठानत्वमज्ञातं हि

---

१. *Chhā.* 6. 14. 2. २. *Idem.* 4. 9. 3. ३. °करुणः P. ४. प्रवृत्तिः N. P. Q. R. ५. *Sañkṣepas'ārīraka* iv. 3. ६. *Chhā.* 7. 1. 1. ७. *Tantravārtika* 1. 4. 22 (p. 322). ८. तस्मान्निद्याद्यवि° P.

वस्त्वारोपाधिष्ठानम् । न च शुक्त्यादेरज्ञातत्वमस्ति जडत्वाच्चिन्मात्रनिष्ठत्वाच्चिन्मात्रविषयत्वाच्चाज्ञानस्य । तदुक्तम्—

"यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् च वेत्ति सः ।
जडं न विद्यावेद्यत्वान्नातोऽज्ञानं जडाश्रयम् ॥"

ततश्च सत्यस्य वस्तुनो मिथ्यावस्तुसम्भेदावभासोऽध्यारोप इत्युक्तं भवति। एतेन चिज्जडयोः परस्परतादात्म्याध्यासे शून्यमेव जगतस्तत्त्वं स्यादध्यस्तस्य मिथ्यात्वादिति केषाञ्चिद्वोद्यं निरस्तम् । भ्रमकाले परिस्फुरदंशस्य मिथ्यात्वेऽप्यपरिस्फुरतोंऽशान्तरस्य विद्यमानत्वात्। तदुक्तमभियुक्तैः—

"[1]अध्यस्तमेव हि परिस्फुरति भ्रमेषु
नान्यत्कथञ्चन परिस्फुरति भ्रमेषु ।
रज्जुत्वशुक्तिशकलत्वमरुक्षितित्व-
चन्द्रैकताप्रभृतिकानुपलम्भनेन ॥" इति,
"किञ्चानृतद्वयमिहाध्यसितव्यमिष्टं
स्याच्चेत्तदा भवति चोद्यमिदं त्वदीयम् ।
सत्यानृतात्मकमिदं मिथुनं मिथश्चे-
दध्यस्यते किमिति शून्यकथाप्रसङ्गः ॥" इति च ।

तस्माद्युक्तमुक्तं वस्तु सच्चिदानन्दाद्वयं ब्रह्म तस्मिन्नज्ञानतत्कार्याखिलजडसमूहस्यावस्तुनोऽध्यारोप इति ॥

अज्ञानं व्युत्पादयति—अज्ञानं त्विति । तुशब्दो मतान्तरेभ्यो वैशिष्ट्यद्योतनार्थः । तमेव विशेषं दर्शयति—सदसद्भ्यामित्यादिना । ज्ञानविरोध्यज्ञानमित्युक्ते ज्ञानप्रागभावे प्रसङ्गं व्युदस्यति—भावरूपमिति । उत्तरज्ञानविरोधिपूर्वज्ञानव्युदासाय सदसद्भ्यामनिर्वचनीयमिति । मिथ्याज्ञानव्युदासाय त्रिगुणात्मकमिति । यद्वा ज्ञानविरोधित्वं ज्ञानापनोद्यत्वं तदेवाज्ञानत्वमित्यज्ञानलक्षणम् । न च ब्रह्मात्मैकत्वज्ञानापनोद्यप्रपञ्चेऽतिव्याप्तिः । तस्याज्ञानोपादानकत्वेनाज्ञानातिरेकात् । नाप्यज्ञानात्मसम्बन्धेऽतिव्याप्तिः । असङ्गस्वभावस्य चिदात्मनोऽज्ञानसम्बन्धस्याज्ञानाधीनत्वात्तस्याप्यज्ञानात्मत्वोपपत्तेः ।

---

१. Cannot trace this verse; but the first line is quoted as a nyāya in *Tattvadīpana* (a Com. on the *Vivaraṇa*) p. 179, and in the *Laukikanyāyasaṅgraha*. २. *Saṅkṣepas'ārīraka* i. 36. ३. *Idem*. i. 33.

अतो नानयोर्लक्ष्यबहिर्भाव इति न लक्षणस्यातिव्याप्तिः । अव्याप्त्यसम्भवयोस्तु शङ्कैव नास्ति ज्ञानेनाज्ञानबाधस्य प्रसिद्धत्वात् । न च पूर्वज्ञाने ज्ञानप्रागभावे चातिव्याप्तिः । पूर्वज्ञानस्य ज्ञानापनोद्यत्वनियमाभावादिच्छादिवृत्त्यन्तरोत्पत्त्यापि तदपनोददर्शनात् । इह च नियमेन ज्ञानापनोद्यस्याज्ञानत्वाभ्युपगमात् । प्रागभावस्य च प्रतियोग्युत्पत्तिमात्रविरोधिनस्तदपनोद्यत्वाभावात् । न ह्यनुत्पन्नः प्रतियोगी कस्यचिदपनोदकः सम्भवति । अतो न तयोरतिव्याप्तिः ॥

नन्वज्ञानस्यापि ज्ञानोत्पत्तिनान्तरीयकतया विनाशाश्रयणात्कथं ज्ञानापनोद्यत्वमिति चेन्न । ज्ञानोत्पत्त्यनन्तरं विलम्बाभावाभिप्रायेणाज्ञाननाशस्य ज्ञानोत्पत्तिनान्तरीयकतावाचोयुक्तेराश्रयणात् भावाभावयोस्तु क्षणमात्रमपि सहभावानुपपत्तेरित्यस्ति प्रागभावाद्वैषम्यमज्ञानस्येति । सदसद्भ्यामनिर्वाच्यमित्यपरं लक्षणम् । अत्रापि पूर्ववदेवातिव्याप्त्यादिपरिहारो द्रष्टव्यः । नेदमसम्भवि । अज्ञानस्य सत्त्वे चिदात्मवद्बाधाभावप्रसङ्गात् । असत्त्वे च वन्ध्यासुतादिवदपरोक्षप्रतिभासानुपपत्तेः । बाधप्रतीत्योश्चाज्ञाने प्रसिद्धत्वाद्युक्तं तस्यानिर्वचनीयत्वम् । सदसत्त्वपक्षयोरुक्तदूषणमुपजीव्य मिथ्याज्ञानसंस्कारोऽज्ञानमसत्प्रकाशनशक्तित्वेनासद्वेति मतद्वयं निरसनीयम् । मिथ्याज्ञानमात्मगुणोऽज्ञानमिति पक्षं निरस्यति—त्रिगुणात्मकमिति । गुणा लोहितशुक्लकृष्णा अज्ञानकार्येषु तेजोबन्नेष्ववान्तरप्रकृतिषु प्रसिद्धाः "[1]यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इति श्रुतेः । तथा च कार्यगतत्रिरूपेण कारणमप्यज्ञानमव्याकृतात्मकं त्रिरूपेण त्रिगुणात्मकमिति यावत् । तथा च [2]न्यायः—"ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके" इति । यद्वा रजःसत्त्वतमोलक्षणास्त्रयो गुणास्तद्युक्तमज्ञानं त्रिगुणात्मकमिति । गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकमित्युक्तम् । तथा च गुणस्य गुणवत्त्वानुपपत्तेर्न मिथ्याज्ञानमज्ञानमित्यर्थः । ज्ञानाभावोऽज्ञानमिति मतं निरस्यति—भावरूपमिति । अयमर्थः । अभावप्रतियोगि यज्ज्ञानं तत्किं साक्षिचैतन्यं स्यात् "[3]साक्षी चेता" इत्यादिश्रुतेस्तस्यापि ज्ञानत्वप्रसिद्धेः । किंवान्तःकरणवृत्तिः "[4]विज्ञानेन वा ऋग्वेदं विजानाति" इति विज्ञानशब्देन बुद्धेः श्रवणात् । अथवात्मगुणस्तथात्वेन च ज्ञानस्य वैशेषिकतन्त्रे प्रसिद्धत्वात् । तत्राद्यो नाभावप्रतियोगी तस्य नित्यत्वात् । द्वितीये ज्ञानशब्दस्त्वौपचारिकत्वेन तदभावस्य मुख्यतोऽज्ञानत्वायोगात् । "येन वा पश्यति" इत्यारभ्य

---

१. *Chhā.* 6. 4. 1. २. *Brahmasūtra* 1. 4. 9. ३. *Śvet.* 6. 11. ४. *Chhā.* 7. 7. 1.

"प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोक"[1] इत्यन्तेन प्रज्ञाशब्दवाच्य-प्रत्यक्चैतन्यव्याप्तस्येव चक्षुरादिद्वारकबुद्धिपरिणामस्य सङ्कीर्तनात् । साङ्ख्य-पक्षमाश्रित्यानौपचारिकत्वे स्वीक्रियमाणेऽपि न वृत्त्यभावोऽज्ञानं वृत्त्यभाव-शब्देन वृत्त्युपादानबुद्धिस्वरूपावस्थानमात्रस्यैवाभिलाषात् । अतः पक्षान्तरं परिशिष्यते । तत्रेदं वक्तव्यम् । ज्ञानविशेषाभाव एवाज्ञानं ज्ञानसामान्या-भावोऽपि वेति । नाद्यो मूढोऽहं न किञ्चिज्जानामीत्यनुल्लिखितविषय-विशेषस्याप्यज्ञानस्यानुभवात् । न च तत्रापि विषयविशेषपर्यवसायित्वं कल्प्यत इति वाच्यं विनानुपपत्तिं सामान्यबुद्धेर्विशेषालम्बनत्वे सामान्य-बुद्धिविलोपसङ्ग्रहात् । तथा च घटवत्यपि भूतले घटसामान्यनिषेधप्रसङ्गः सुषुप्त्यभावप्रसङ्गश्च स्यात् । तस्माज्ज्ञानसामान्याभावोऽहमज्ञ इत्युल्लिख्यत इति वाच्यम् । तत्र चाभावज्ञानस्य धर्मिप्रतियोगिज्ञानसापेक्षस्वात्मनि धर्मिणि ज्ञाने च प्रतियोगिनि विज्ञायमाने तस्मिन्नेवात्मनि कथं ज्ञाना-भावग्रहोऽभावप्रतियोगिनो ज्ञानस्य तत्र वर्तमानत्वात् । तयोरविज्ञाय-मानयोरपि कथं तत्राभावग्रहः कारणाभावात् । षष्ठप्रमाणपक्षेऽप्ययं न्याय ऊहनीयः । नन्वनुपपत्तौ सत्यां सामान्यबुद्धेरपि विशेषालम्बनत्वं कल्प्यते । यथा घटवत्यपि भूतले घटो नास्तीति बुद्धेर्विवक्षितघटाभावविषयत्वं तद्व-दिहापि सामान्याभावस्य यत्किञ्चित्प्रतियोगिसत्त्वविरोधादात्मनि विज्ञायमाने तस्मिन्ननुपपत्तेर्न किञ्चिज्जानामीति बुद्धेर्ज्ञानविशेषाभावविषयत्वं कल्प्यत इति चेन्न । अनयैवानुपपत्त्या भावान्तरविषयत्वस्यैव कल्पनीयत्वात् । न हि मूढोऽहं सामान्यं किञ्चिदपि न जानामीत्यनुभवे किञ्चिद्विषया-न्तरमवशिष्यते यज्ज्ञानाभावविषयत्वमस्य कल्प्येत । यथास्मिन् भूतले न कोऽपि घटोऽस्तीति प्रत्यये घटविशेषस्यानवशेषस्तद्वत् । नन्वप्रसिद्ध-भावान्तरकल्पनाद्धरं प्रसिद्धस्याभावस्येव यथाकथञ्चिदप्यज्ञानबुद्धेर्विषयत्व-कल्पनमिति चेन्न । अत्यन्तमप्रसिद्ध्यभावात् । "देवात्मशक्तिं स्वगुणैर्नि-गूढां"[2], "मायां तु प्रकृतिं विद्यात्"[3] इति च श्रुतिवाक्ययोर्गुणवत्त्वेनोत्पद्यमान-जगदुपादानत्वेन च प्रसिद्धत्वात् । तस्मान्नाभावो ज्ञानं किन्तु भावा-न्तरमेवेति ॥

ननु भावत्वमप्यज्ञानस्यानुपपन्नमनादेस्तस्य भावरूपत्वे चिदात्मवद-निवृत्तिप्रसङ्गादनिर्मोक्षापत्तेरित्यत आह—यत्किञ्चिदिति । अयमर्थः । नास्माभिरज्ञानस्य भावत्वं परमार्थसत्त्वाभिप्रायेणोच्यते किन्त्वभाववै-

---

१. *Aitareya* 5. 1–3. २. Namely *anupalabdhi*. See Notes.
३. *Svet.* i. 3. ४. *Idem.* iv. 10.

लक्षण्याभिप्रायेण । न च भावाभावयोः परस्परप्रतिषेधेऽन्यतरविधिनान्तरीयकत्वात्प्रकारान्तरानुपपत्तिरिति वाच्यम् । स्त्रीपुंप्रकृत्योः परस्परप्रतिस्पर्धिनोर्निषेधे तदन्यस्य नपुंसकस्येव भावाभावान्यस्याज्ञानस्योपपत्तेः । अथ तत्र प्रमाणान्तरेण तृतीया प्रकृतिरुपलभ्यत इति मतं तर्हीहाप्यस्ति प्रमाणं प्रतीतिबाधान्यथानुपपत्तिरिति सन्तोष्टव्यम् । वस्तुतस्तु नात्रास्माकमत्यन्तमाग्रहोऽज्ञाने सर्वानुपपत्तेरलङ्कारत्वात् । तदुक्तम्—

"अविद्याया अविद्यात्वमिदमेव तु लक्षणम् ।
यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्" ॥ इति,
"सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्वद्दिवाकरम्" ॥ इति च,

इष्टसिद्धावपि—

"दुर्घटत्वमविद्याया भूषणं न तु दूषणम् ।
कथञ्चिद्घटमानत्वेऽविद्यात्वं दुर्घटं भवेत्" ॥ इति ।

तस्मात्सत्त्वेनासत्त्वेन सदसत्त्वेन वा सावयवनिरवयवोभयात्मकत्वेन वा भिन्नाभिन्नोभयरूपत्वेन वा निर्वक्तुमशक्यत्वेनानिर्वचनीयमज्ञानं सवितरि दिवान्धपरिकल्पितान्धकारवद्यत्किञ्चिदिति वदन्ति वृद्धा इति सिद्धम् ॥

इदानीं यथानिरूपितमज्ञानमेव नास्तीति विवदमानं प्रतिबोधयितुं तत्रानुभवश्रुती प्रमाणयति—अहमज्ञ इत्यादिना । अनुभवस्यास्य ज्ञानाभावविषयत्वं प्रतिक्षिप्तम् । निर्विकल्पकघटितप्रतियोगिकस्य ज्ञानसामान्याभावस्य स्वात्मनि प्रत्यक्षायोग्यत्वाच्च । नच भावरूपमप्यज्ञानमात्मनि ज्ञायमाने न ग्रहीतुं शक्यते तस्य ज्ञानविरोधित्वादिति वाच्यं स्वप्रकाशसाक्षिचैतन्येन तस्य विरोधाभावात् । अन्तःकरणवृत्त्यैव तु विरोधादहमज्ञ इत्यहङ्कारगर्भस्य चोल्लेखस्य साक्षिप्रकाशिताज्ञानविषये स्फुटतरव्यवहारमात्रत्वाच्च न काचिदनुपपत्तिरिति भावः । देवस्य स्वयम्प्रकाशस्यात्मनः शक्तिं शक्तिवत्परतन्त्रां स्वगुणैः शुक्लादिभिः सत्त्वादिभिर्वा निगूढामालिङ्गितां ते ध्यानयोगानुगता अपश्यन्निति सम्बन्धः ।

---

१. See परस्परविरोधे हि &c. in *Maxims* iii. २. *Bṛihadāraṇya-kavārtika* (page 57) verse 181, modified in second line. See Notes. ३. *Naiṣkarmyasiddhi* iii. 66. ४. For other references to this work, see *Vedāntakalpataru* p. 511, and *Vivaraṇaprameya* p. 225. The first line of the verse is found in *Saura Saṁhitā* iv. (Kaivalya-ratna, p. 110).

"[1]अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" ॥,
"[2]नाहं प्रकाशः सर्वस्य योगमायासमावृतः" ॥

इत्यादिस्मृतिः । प्रत्यगात्मचैतन्यस्य ब्रह्मणो नित्यप्रासत्वेन स्वप्रकाशत्वेन चास्ति प्रकाशत इति व्यवहारपुष्कलकारणे सति नास्ति न प्रकाशत इति तद्विपरीतव्यवहारस्यात्मन्यावरणमन्तरेणानुपपत्तिः "[3]श्रोतव्य" इत्यादिविधिनात्मयाथात्म्यज्ञानाय श्रवणादिविधानानुपपत्तिश्चेत्यर्थापत्तिद्वयं चकारेण समुच्चीयते ॥ ६ ॥

ननु "[4]अजामेकां", "[5]इन्द्रो मायाभिः" इति श्रुतिभ्य एकत्वानेकत्वयोरज्ञाने विप्रतिपत्तौ कः समाधिरिति विवक्षायामाह—इदमिति । व्यष्टिर्विशेषः समष्टिः सामान्यम् । व्यवह्रियते श्रुत्यादिष्विति शेषः । अयं भावः । यो यदनुरक्तबुद्धिविषयो नियतः स तदात्मको यथा मृदनुरक्तबुद्धिविषयो घटो मृदात्मको दृष्टः । तथा सामान्यानुरक्तबुद्धिविषया विशेषाः सामान्यात्मका इति युक्तम् । सामान्यविशेषयोरत्यन्तभेदे गवाश्ववत्सामान्यविशेषभावानुपपत्तेः । भेदाभेदौ त्वेकस्मिन्नप्रामाणिकौ वस्तुनो द्वैरूप्यानुपपत्तेः । अभेदपक्षे तु कयाचिद्भेदकल्पनया सामान्यविशेषव्यवहारोपपत्तेः समुद्रतरङ्गादिवज्जलतरङ्गचन्द्रादिवद्वा । तथा चाज्ञानस्यैकस्यैव सतः सामान्यविशेषभावेनैकानेकत्वव्यवहारः श्रौतो न विरुध्यत इति । एतदेव दृष्टान्तैरुपपादयितुमुपक्रमते—तथाहीत्यादिना । "[6]पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्", "[7]रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय" इति मन्त्रद्वयानुसारेणाज्ञानतत्कार्यावच्छिन्नोऽज्ञानतत्कार्यप्रतिबिम्बितो वा चिदात्मा जीवेश्वरभावं भजत इति मतद्वयमुपरुध्य दृष्टान्तद्वयोपादानमिति सर्वत्र वनवृक्षजलाशयजलकीर्तनाभिप्रायो बोद्धव्यः ॥

नानात्वेन इत्यादेरयमर्थः । अज्ञानं किं ब्रह्मनिष्ठमुत जीवनिष्ठम् । नाद्यो नित्यशुद्धत्वादिस्वभावविरोधात् । न द्वितीयोऽन्योन्याश्रयात् । तथाहि । अज्ञानमित्युक्ते कस्य किंविषयमित्याश्रयविषयसापेक्षताप्रतीतेर्न निराश्रयमज्ञानमस्तीति प्रतिपत्तुं शक्यम् । तस्य च जीवाश्रयत्वे जीवभावस्याप्यज्ञानाधीनत्वात्सिद्धे जीवभावेऽज्ञानस्य साश्रयत्वसिद्धिस्तत्सिद्धौ च जीवत्वसिद्धिरिति कथं नान्योन्याश्रयः । नन्वनादित्वादज्ञानजीवभाव-

---

१. *Gītā.* v. 15.　२. *Idem* vii. 25.　३. *Bṛih.* 2. 4. 5.
४. *S'vet.* vi. 5.　५. *Ṛigveda* 6. 47. 18.　६. *Bṛih.* 2. 5. 18.
७. *Ṛigveda* 6. 47. 18, and *Bṛih.* 2. 5. 19.

प्रवाहस्य बीजाङ्कुरवन्नान्योन्याश्रय इति चेन्मैवं क्रमभाव्यनेकबीजाङ्कुरव्यक्तिवदनेकाज्ञानजीवव्यक्तीनां सत्त्वे प्रमाणाभावात्। ननु "सता[1] सौम्य तदा सम्पन्नो भवति", "तद्धेदं तर्ह्यव्याकृतमासीत्[2]" इत्यादिश्रुतिभ्यः सुषुप्तिप्रलययोर्जीवस्य परमात्मैकभावापत्तिश्रवणात्पुनः प्रबोधसर्गयोर्जीवभावापत्तेरवगम्यमानत्वाच्च तदा तद्विभागहेतोः संस्काररूपस्याज्ञानस्यापि कल्प्यमानत्वात्कथं न बीजाङ्कुरन्यायः प्रामाणिक इति चेत्तत्किमिदानीं सुषुप्त्यादिकाले जीवस्य जीवत्वं नास्तीति विवक्षितम्। हन्त तर्हि कृतनाशाकृताभ्यागमप्रसङ्गो मुक्तानामपि संसारित्वप्रसङ्गश्च दुर्वारः स्यादविशेषात्। किञ्च सुषुप्त्यादावज्ञानसद्भावे तस्य ब्रह्माश्रितत्वप्रसङ्गोऽसद्भावे सुप्तानां पुनरनुत्थानप्रसङ्गः। "तं[3] इह व्याघ्रो वा सिंहो वा" इत्यादिसम्पत्तिवाक्यशेषासङ्गतिप्रसङ्गश्चेत्यसमञ्जसमेतत्। अथाज्ञानजीवयोः स्वरूपेणैवानादितयाश्रयाश्रयिभावस्य नित्यसिद्धत्वान्नान्योन्याश्रय इति मतं तदपि न ब्रह्मण्यज्ञानाभावप्रसङ्गात्। नायमिष्टप्रसङ्गः "सोऽकामयत[4]", "तदात्मानं स्वयमकुरुत[5]" इत्यादिश्रुतिभिर्ब्रह्मणि जगत्कारणे कामयितृत्वादेरज्ञानकार्यस्य श्रूयमाणत्वात्। न च दृष्टिगतपीतिघ्नः शङ्खे समारोपवज्जीवगताज्ञानविक्षेपस्य कामयितृत्वादेस्तद्विषये ब्रह्मणि समारोपः श्रुत्या कीर्त्यत इति वाच्यम्। तथा सति जीवानामेव जगत्सर्गस्थितिलयोपादानत्वात् "सर्वं[6] खल्विदं ब्रह्म" इत्यादिब्रह्मसामानाधिकरण्यं जगतः श्रूयमाणमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं च पीड्येत। जीवस्य ब्रह्माभेदात्सर्वमेवोपपद्यत इति न कश्चिद्दोष इति चेत्तर्हि जीवपक्षपातं परित्यज्य ब्रह्मण एव जगत्स्रष्टृत्वादि यथाश्रुतं स्वीकर्तव्यम्। विना तस्याज्ञानाश्रयत्वं कूटस्थस्य न कामयितृत्वादीत्युक्तं तस्य च जीवाद्विभक्तस्यात्राज्ञानाश्रयत्वे तत्रापि स्यादन्योन्याश्रयः। ननु ब्रह्मणि जगत्कारणत्वादिनिर्वाहकमज्ञानं मायाशब्दवाच्यमन्यदेव जीवगतकर्तृत्वाद्यवभासहेतुभ्योऽज्ञानेभ्योऽविद्याशब्दवाच्येभ्य इति चेन्न। मायाविद्ययोः श्रुतिस्मृतिसूत्राभियुक्तवचनैरेकत्वस्य वृद्धैर्निरूपितत्वात्। अनिर्वचनीयत्वे सति तत्त्वावभासप्रतिबन्धविपर्ययावभासहेतुत्वस्य लक्षणस्य तुल्यत्वादविद्याभेदे च कल्पनागौरवदोषात्। एकाविद्यापक्षेऽप्यनन्तविक्षेपशक्तिकल्पनया जाग्रत्स्वप्नबन्धमोक्षरशनाभुजङ्गादिव्यवहारव्यवस्थोपपत्तेः। न चात्रापि कल्पनागौरवं समानं धर्मिभेदकल्पनातो धर्मभेदकल्पने लाघवात्। इत्यास्तां विस्तरः॥

---

१. *Chhā.* 6. 8. 1. २. *Bṛih.* 1. 4. 7. ३. *Chhā.* 6. 9. 2. ४. *Tait.* 2. 6. 1. ५. *Idem.* 2. 7. 1. ६. *Chhā.* 3. 14. 1. ७. Cf. "धर्मिभेदाद्धर्मभेदो लघीयानिति न्यायेन" in Ānandagiri on *Śāṅkara-bhāṣya* 2. 4. 6.

अतश्चिन्मात्रनिष्ठमज्ञानं तच्च जीवब्रह्मविभागहेतुर्ब्रह्मणो जगत्सृष्टृत्वादेर्जीवस्य कर्तृत्वादेश्च हेतुरित्यङ्गीकर्तव्यम्। न च चिन्मात्रस्य स्वप्रकाशत्वादज्ञानाश्रयत्वविरोधः। जीवपक्षेऽपि तुल्यत्वादन्तःकरणपरिणामोपहितस्येव चैतन्यस्याज्ञानविरोधित्वात्। न च ज्ञानवदज्ञानस्याप्येकाश्रयविषयत्वानुपपत्तिरावरकत्वेनापवरकस्थतमोवत्तदुपपत्तेः। तदुक्तमभियुक्तैः—

"आश्रयत्वविषयत्वभागिनी
निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो
नाश्रयो भवति नापि गोचरः" ॥ इति।

तस्मादेकमज्ञानं चिन्मात्राश्रयविषयमिति स्थिते जीवावस्थायामेवाहमज्ञ इति स्फुटतरव्यवहारात्तदपेक्षया जीवगताज्ञानानामित्युक्तमिति। अनयैव दिशा

"जीवाश्रया ब्रह्मपदा ह्यविद्या तत्त्वविन्मता"।

इति प्राचां वचनं योजनीयम्॥

ननु नानात्वेन प्रतिभासमानानां जीवानामेकाज्ञानोपाधिकत्व एकमुक्तौ सर्वमुक्तिप्रसङ्ग इति चेन्नायं दोष एकस्यैव जीवत्वादितरेषां तद्दृष्टिविजृम्भितत्वेन ततोऽनतिरेकात्। तर्हि कोऽसौ जीवो यद्दृष्टिविजृम्भितं जीवान्तरमिति चेद्यः पश्यति स एव। अहं तु संसारिणमात्मानमन्यांश्च मद्विधान् जीवान्पश्यामीति चेत्तर्हि त्वमेव जीवस्त्वविद्यया वयमन्ये च जीवा बद्धा मुक्ताः सुखिनो दुःखिन इत्येवं विचित्राः कल्पितास्तवाब्रह्मसाक्षात्कारमविसंवादिताः प्रतिभासन्ते स्वप्न इवाप्रबोधम्। जाते तु ब्रह्मात्मसाक्षात्कारे सर्वमेव त्वद्दृष्टिविजृम्भितं त्वया सह मोक्षिष्यते त्वत्सुषुप्ताविवेति। इयांस्तु पुनर्विशेषः। सुषुप्तावस्यज्ञानं सर्वकार्यसंस्कारोपरञ्जितं पुनर्व्यवहारप्रवर्तकं मुक्तौ तु तस्य ज्ञानेन बाधितत्वात्पुनर्व्यवहाराभावः। इत्यलं प्रसङ्गागतप्रपञ्चेन॥ वनवृक्षयोर्जलाशयजलयोर्वा सामान्यविशेषभावो नास्तीति यद्यपि दार्ष्टान्तिकेन वैषम्यं तथापि समुदायसमुदायिनोरेकत्वे दृष्टान्तदार्ष्टान्तिकयोः साम्यात्सर्वांशेन च साम्यस्याविवक्षितत्वान्न कश्चिद्दोष इति गमयितव्यम्। अज्ञानैकत्वव्यपदेशिनीं श्रुतिं पठति—अजामेकामिति। आदिपदात् "मायां तु प्रकृतिं विद्यात्", "तरत्यविद्यां विततां", "अक्षरात्परतः परः"

---

१. *Saṅkṣepas'ārīraka* 1. 316. २. *Ved. Siddh. Muktāvalī.* 3. ३. इव प्रबोधे। MQ. ४. *S'vet.* iv. 10. ५. See Notes. ६. *Mund.* 2. 1. 2.

"तद्वेदं तर्ह्यव्याकृतं", "तम आसीत्तमसा गूढं" इत्याद्येकवचनान्तश्रुत्यन्तरग्रहः ॥

एकमेवाज्ञानं समष्टिव्यष्टिभेदभिन्नं परिकल्प्य समष्ट्यज्ञानोपधाननिबन्धनं चैतन्यव्यवहारं वक्तुं समष्टिं विशिनष्टि—इयमिति । उत्कृष्टस्योपाध्यन्तराननुरक्ततयाप्रतिहतज्ञानात्मकस्य चैतन्यस्योपाधितया विशुद्धं रजस्तमोभ्यामनभिभूतं सत्त्वं प्रधानं यस्याः सा तथाविधेयं समष्टिरित्यर्थः । समष्ट्यज्ञानोपहितचैतन्यस्य व्यपदेशभेदं दर्शयति—एतदिति। परमार्थतोऽसङ्गस्यापि चैतन्यस्याध्यासिकसम्बन्धसम्बद्धाज्ञानद्वारा सर्वावभासकत्वेन सर्वमर्यादाधारकसत्तारूपत्वेन सर्वजीवप्रवर्तकत्वेन च लब्धसर्वज्ञत्वादिगुणकस्य सदव्यक्तमन्तर्यामीश्वर इत्यादिव्यपदेशो भवतीत्यर्थः । उक्तेऽर्थे हेतुमाह—सकलेति । सकलाज्ञानं समष्ट्यज्ञानम् । अवभासकत्वशब्दो विधारकत्वादेरप्युपलक्षणार्थः । सर्वविक्षेपसंस्कारवत्त्वादज्ञानस्य सत्कार्यवादाश्रयणाच्चाव्याकृताद्यवस्थास्वपि समष्ट्यज्ञानस्य सर्वत्वमिति द्रष्टव्यम् । उक्तव्यपदेशिकां श्रुतिमाह—यः सर्वज्ञ इति । सर्वज्ञः सामान्यतः सर्वविद्विशेषत इति भेदः । आदिशब्दात् "सदेव सोम्येदं", "एष सेतुर्विधरणः", एष त आत्मान्तर्याम्यमृतः", 'महतः परमव्यक्तं", "यतो वा इमानि", "यः परः स महेश्वरः" इत्यादिश्रुत्यन्तरग्रहः । उपहितस्य व्यपदेशमुक्त्वोपाधेरपि तं सहेतुकमाह—अस्येयमिति । अज्ञानमिदंशब्दार्थः । आनन्दप्रचुरत्वमुपहितधर्मं आच्छादकत्वमज्ञानधर्मः । तदुभयाविवेकात्कारणमज्ञानमानन्दमयकोश इत्यर्थः । सर्वे आकाशादय उपरमन्तेऽस्मिन्निति सर्वोपरमोऽज्ञानम् । तादृग्भावात्सुषुप्तिर्महासुषुप्तिः प्रलय इति यावत् । यतः सर्वोपरमत्वमत एवेति योजना । स्थूलप्रपञ्चो विराट् सूक्ष्मप्रपञ्चो हिरण्यगर्भः ॥

एवं समष्ट्यज्ञानं साभासं सव्यपदेशं निरूप्य व्यष्ट्यज्ञानमपि सदृष्टान्तं तथा निरूपयति—यथा वनस्येत्यादिना । कैवमनेकत्वव्यपदेशोऽज्ञानस्येति तदाह—इन्द्र इति । इन्द्रः परमेश्वरः प्रकरणात् । स मायाभिर्मायाविक्षेपशक्तिभिर्विक्षिप्तेषु देहेन्द्रियान्तःकरणेषु प्रतिबिम्बितः पुरुरूपो बहुरूपः सन्नीयते प्रकाशत इति श्रुत्यर्थः । आदिशब्दात् "य एको जालवानीशत ईशिनीभिः" इत्यादिश्रुत्यन्तरग्रहः । एकस्मिन्नज्ञाने व्यष्टिसमष्टिशब्दप्रयोगे

---

१. *Bṛih.* 1. 4. 7. २. *Ṛik-Saṁhitā* 10. 129. 3. ३. *Chhā.* 6. 2. 1. ४. *Bṛih.* 4. 4. 22. MPQ. read विधारणः. ५. *Idem.* 3. 7. 3. ६. *Kaṭha.* iii. 11. ७. *Tait.* iii. 1. ८. *Mahānāra.* x. 8. ९. *Śvet.* iii. 1.

निमित्तमाह—अत्रेति। अज्ञानं सप्तम्यर्थः। व्यस्तव्यापित्वेन कार्योपाधिजीवव्यापित्वावभासेन व्यष्टिताव्यपदेशः। समस्तव्यापित्वेन कारणोपाधिसर्वज्ञाविभक्तसर्वव्यापित्वेन समष्टिताव्यपदेश इत्यर्थः। निकृष्टोपाधितयेति। ज्ञानप्रतिबन्धकावरणवान् जीवो निकृष्टस्तस्योपाधितयेत्यर्थः। मलिनं रजस्तमोभ्यामभिभूतं सत्त्वं प्रधानं यस्याः सा तथा। रजस्तमसोः स्वातन्त्र्येण प्रतिबिम्बोद्ग्राहकत्वायोगादिति भावः। एतदुपहितं व्यष्टयज्ञानोपहितम्। एकाज्ञानावभासकत्वात्। अज्ञानैकदेशावभासकत्वादिति यावत्। व्यष्टयज्ञानोपहितस्य प्राज्ञशब्दवाच्यत्वे कारणमाह—अस्येति। अस्य जीवस्यास्पष्टोपाधितया रजस्तमोभ्यामभिभूतसत्त्वप्रधानव्यष्टयज्ञानोपाधिकत्वेन हेतुनातिप्रकाशकत्वाभावात्प्राज्ञशब्दवाच्यत्वमित्यर्थः। प्रायेणाज्ञः प्राज्ञ इत्युक्तं भवति। पूर्ववदुपहितस्य व्यपदेशमुक्त्वोपाधेरप्याह—अस्यापीति। अपिशब्द ईश्वरोपाधिदृष्टान्तार्थः। अहङ्कारादेः सुषुप्त्याद्यवस्थायां संस्कारावशेषेण स्थितस्य कारणत्वादित्यर्थः। आनन्दप्रचुरत्वादेवेत्येवकारः कोशवदाच्छादकत्वादिति हेत्वन्तरसमुच्चयार्थः। यद्वा आनन्दप्रचुरत्वाद्धेतोरेवेति भिन्नक्रमः। तस्मिन्पक्षे कोशवदाच्छादकत्वादित्यनुषञ्जनीयम्। सर्वशब्दो जाग्रत्स्वप्नविषयः। शेषमतिरोहितार्थम्॥ ७॥

"सता सोम्य तदा सम्पन्नो भवति" इत्यादिश्रुतेः सुषुप्तौ प्राज्ञस्येश्वरसम्पत्त्यवगमात्प्राज्ञेश्वरयोरेकत्वं तदवस्थयोरप्यव्याकृतसुषुप्तयोरेकत्वं सिद्धवत्कृत्यानयोस्तदवस्थापन्नं भोगं दर्शयति—तदानीमिति। तयोरप्यवस्थयोर्जीवावच्छेदकस्य व्यष्टयज्ञानस्य केनापि रूपेण स्थितत्वादेताविति द्विवचनोपादानं सर्वात्मनैक्ये पुनरुत्थानानुपपत्तेः। आनन्दं स्वरूपानन्दमनुभवतः। आनन्दशब्दोऽज्ञानतत्साक्षिणोरप्युपलक्षणपरः। तदानीमखण्डात्मस्वरूपचैतन्येनैवानन्दाद्यनुभवेऽभ्युपगम्यमाने स्वरूपस्य नित्यत्वात्तज्जन्यसंस्काराभावेनावस्थान्तरे स्मरणरूपपरामर्शानुपपत्तेस्तदनुकूलमुपाधिविशेषं कल्पयति—अज्ञानवृत्तिभिरिति। अन्तःकरणादेरप्यज्ञानकार्यत्वेन तदात्मकत्वात्तदभिप्रायोऽज्ञानशब्दो माभूदिति विशिनष्टि—अतिसूक्ष्माभिरिति। दुर्लक्ष्यत्वमतिसूक्ष्मत्वम्। तासां वृत्तीनां जडत्वात्कथं ताभिरानन्दाद्यनुभव इत्यत आह—चैतन्येति। चैतन्यव्याप्ताभिरित्यर्थः। तथा च वृत्तिविनाशात्तद्विशिष्टचैतन्यस्यापि विनाशात्संस्कारजन्यं स्मरणमवस्थान्तरे सम्भवतीति भावः। तत्र प्रमाणमाह—आनन्दभुगिति। चेतोमुखश्चैतन्यदीप्ताज्ञानवृत्तिप्रधानः। आदिशब्दात्—

---

१. *Chhā.* 6. 8. 1.

"सुषुप्तिकाले सकले विलीने
तमोभिभूतः सुखरूपमेति" ॥

इत्यादिश्रुत्यन्तरग्रहः । तत्रैवानुभवमपि प्रमाणयति—सुखमिति । न चायं सुखपरामर्शो दुःखाभावविषयस्तस्य तत्राननुभूतत्वात्तदनुभवसामग्र्याश्च निरूपयितुमशक्यत्वात् । विस्तृतं चैतद्भद्धैरित्युपरम्यते सङ्ग्रहाधिकारात् । उक्तोपाध्योस्तदुपहितयोश्च प्राक्सिद्धवत्कृतमभेदं विशदयति—अनयोरिति । प्राज्ञेश्वरयोरभेदे श्रुतिं प्रमाणयति—एष सर्वेश्वर इति । आदिपदात् "अथ[2] य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इत्यादिश्रुत्यन्तरग्रहः ॥ ८ ॥

प्राज्ञेश्वरात्मकस्य चैतन्यस्योपहितत्वेऽनुपहितं चैतन्यमन्यदेवेत्यर्थादुक्तेः किं तदित्यपेक्षायां तत्स्वरूपसंज्ञे दर्शयति—वन° इति । आधारश्चासावनुपहितश्चासावाकाशश्च स तथा तद्वदिति यावत् । यद्यप्याकाशस्य वनाश्रयत्वं जलाशयाश्रयत्वं वा नास्ति तदनारम्भकत्वात्तथाप्यवकाशमन्तरेण तयोः स्थित्यनुपपत्तेस्तदाधारत्ववचनमिति द्रष्टव्यम् । अस्य चैतन्यस्य तुरीयत्वं वक्ष्यमाणविश्वाद्यपेक्षयेति द्रष्टव्यम् । तत्र प्रमाणमाह—शिवमिति । आदिपद्यात्—

"त्रिषु[3] धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः" ॥

इत्यादिश्रुत्यन्तरग्रहः । अध्यारोपेण व्यासक्तचित्ततया प्रकरणार्थविस्मरणं माभूदिति प्रसङ्गात्तमाह—इदमेवेति ॥ ९ ॥

एवमवस्थाभिमानिसहितमज्ञानं सविभागं सप्रपञ्चं निरूप्येदानीं तत्कार्याध्यारोपं क्रमेण निरूपयिष्यंस्तदुपयोगित्वेनाज्ञानगतं सामर्थ्यं तावन्निरूपयति—अस्याज्ञानस्येति । तत्रावरणशक्तिं सदृष्टान्तामुपपादयति—आवरणेति । यद्यप्यज्ञानस्य मूर्तत्वामूर्तत्वाभ्यामनिर्वाच्यत्वान्न परिच्छिन्नत्वं तथापि परिच्छेद्यापेक्षयाल्पत्वमात्रं विवक्षितमिति दृष्टान्तदार्ष्टान्तिकयोरवैषम्यम् । बुद्धिपिधायकतयेत्यत्र बुद्धिशब्देन तदनुरक्तं चैतन्यं लक्ष्यते बुद्धेरज्ञानकार्यत्वेन तदावृतत्वानुपपत्तेः । निरूपितेऽर्थे हस्तामलकाचार्यसम्मतिमाह—तदुक्तमित्यादिना । उक्तामावरणशक्तिं तत्कार्यद्वारा बुद्धिमारोहयति—अनयेति । अधिष्ठानस्वरूपविशेषावरणवशेन विपरीतार्थसम्भावना भवतीत्यत्र दृष्टान्तमाह—यथा स्वाज्ञानेति । विक्षेपशक्तिं सदृष्टान्तामाह—विक्षेपेति । अत्राप्याचार्यान्तरसम्मतिमाह—तदुक्तं-विक्षेपेति । आवरणविक्षेपशक्तिद्वयविशिष्ट-

---

१. *Kaivalya.* 13. २. *Chhā.* 8. 3. 4. ३. *Kaivalya.* 18.

अज्ञानं कूटस्थासङ्गाद्वयचैतन्यात्मनो जगत्कारणत्वोपाधिरिति भावः । तदुक्तमभियुक्तैः—

"आच्छाद्य विक्षिपति संस्फुरदात्मरूपं
जीवेश्वरत्वजगदाकृतिभिर्मृषैव ।
अज्ञानमावरणविभ्रमशक्तियोगा-
दात्मत्वमात्रविषयाश्रयताबलेन" इति ॥

नन्वेवंविधाज्ञानोपाधिकस्येश्वरचैतन्यस्य यज्जगत्कारणत्वं तन्निमित्तत्वं स्यादुपादानत्वं वोभयं वेति जिज्ञासायामाह—शक्तिद्वयवदिति । स्वप्रधानतया कूटस्थचैतन्यस्वरूपावभासितया स्वोपाधिप्रधानतया उपाध्युपरक्तसत्तास्फूर्तिरूपतयेति भेदः । एकस्योभयविधकारणात्मकत्वे दृष्टान्तमाह—यथेति । लूतोर्णनाभिः । तन्तुरेव कार्यं तन्तुकार्यम् । यथा लूता तन्तुनिर्माणे प्रसिद्धकार्पासतूलकाष्ठयन्त्रादिसहायमनपेक्ष्यैव तन्तूनातानवितानात्मकं च तत्कार्यं जालरूपं सृजत्येवमीश्वरः प्राक्सृष्टेरेक एवाद्वितीयोऽसहाय एव स्वमायाशक्त्यावेशमात्रेण लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति भावः । तथा च श्रुतिः—"यत्तदद्रेश्यमग्राह्यं" इत्युपक्रम्य—

"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात्केशलोमानि
तथाक्षरात्सम्भवतीह विश्वम्" इति ॥

न्यायोऽपि—"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति ॥ १० ॥

तदेवं चैतन्यस्य जगत्कारणत्वं प्रपञ्च्य ततः कार्योत्पत्तिक्रमं दर्शयति—तमःप्रधान° इति । तमसः प्राधान्यनिर्देशाद्रजःसत्त्वयोरपि तत्र मात्रया वृत्तिर्द्रष्टव्या । उक्तभूतसृष्टिक्रमे प्रमाणमाह—तस्मादिति । नन्वाकाशं नोत्पद्यते निरवयवद्रव्यत्वादात्मवदिति चेन्न । उदाहृतश्रुतिबाधितविषयत्वेनानुमानानुत्थानात्प्रत्यनुमानविरोधाच्च । तथाहि । आकाशमुत्पद्यते महत्त्वे सति भूतत्वान्महापृथिव्यादिवत् । न चाश्रयासिद्धो हेतुराश्रयस्याकाशस्योभयवादिसिद्धत्वात् । न च धर्मिग्राहकप्रमाणबाधनिबन्धनाप्याश्रयासिद्धता हेतोः । धर्मिग्राहकप्रमाणेन शब्दाश्रयत्वेनाकाशाख्यधर्मिमात्रसिद्धावपि तद्गतनित्यत्वादेस्तेनासिद्धेः । न च स्वरूपासिद्धो भूतत्वमहत्त्वयोः पक्षे सम्प्रतिपत्तेः । नापि व्याप्यत्वासिद्धो निरुपाधिकत्वात् । न च मूर्तत्वसा-

---

१. *Sañkṣepaśārīraka* i. 20. २. *Mund.* 1. 1. 6. ३. *Idem.* 1. 1. 7. ४. *Brahmasūtra* 1. 4. 23.

वयवत्वरूपवत्त्वादेरुपाधित्वं शक्यं गुणकर्मणोः साध्याव्याप्तेः । भूतत्वद्रव्यत्व-सामान्यवत्त्वादेश्च साधनव्यापकत्वात् । अत्र द्रव्यत्वव्यतिरिक्तावान्तरजाति-मत्त्वमुपाधिरिति चेन्न प्रध्वंसेन साध्याव्याप्तेः । तस्योत्पत्तिमत्त्वेऽपि जन्या-श्रयत्वाभावात् । न च साध्यस्योत्पत्तिमत्त्वस्य भावधर्मिकत्वान्न प्रध्वंसे प्रसक्तिरिति वाच्यमुत्पत्तिमात्रस्यैवाकाशे साध्यत्वात् । अन्यथा विप्रतिपत्त्य-विषयाणां द्रव्यत्वादीनां धर्मिगतानां साध्यताप्रसङ्ग इत्यनुमानाकौशल-मापद्येत । न चान्यः कश्चिदुपाधिरुत्प्रेक्ष्यते । अविभुत्वं त्वाकाशेऽपि वेदान्तिनः समानं "ज्यायानन्तरिक्षात्"[1], "येनावृतं खं च दिवं"[2] इत्या-दावात्मापेक्षयाकाशस्य न्यूनपरिमाणत्वश्रवणात् । अतो न तं प्रति तस्यो-पाधित्वम् । नापि विरुद्धः साध्यविपर्ययाव्याप्तेः । नापि साधारणानैकान्तिको विपक्षाप्रवेशात् । नाप्यसाधारणः सपक्षगामित्वात् । नापि कालातीतो बाधकप्रमाणानिरूपणात् । न चोक्तानुमानं बाधकमिति वाच्यं तस्य नर-शिरःकपालशुद्धतानुमानवदागमबाधितविषयत्वस्योक्तत्वात् । न च श्रुतेरा-काशाभिव्यक्तिमात्रार्थत्वान्नोत्पत्त्यर्थतेति वाच्यम् । सिद्धे चानुमानस्यागम-बाधितविषयत्वेन प्रामाण्ये श्रुतेरन्यार्थत्वसिद्धिस्तत्सिद्धौ चेतरासिद्धिरितीतरेत-राश्रयात् । किञ्च "तस्माद्वा[3] एतस्मादात्मन आकाशः सम्भूत" इति सकृच्छ्रुतः सम्भूतशब्द आकाशे साक्षात्सम्बध्यमानो गौणः स एव वाय्वा-दावनुषज्यमानो मुख्य इति महदिदं व्याख्यानकौशलं तार्किकपशोः । नापि सन्दिग्धानैकान्तिकता विपक्षव्यावृत्तेः स्फुटत्वात् । नापि प्रकरण-समता त्वदनुमानस्य दुर्बलत्वेनोभयोः समानबलत्वाभावात् । निरवयवद्र-व्यत्वस्य विनश्यदवस्थापन्ने पटे व्यभिचारात् । अवयवत्वात्यन्ताभावाधि-करणत्वं निरवयवशब्देन विवक्षितमिति चेन्न । अवयवशब्देन प्रदेशवि-वक्षायां सर्वस्याप्यवयविप्रदेशस्यावयवत्वेनोपक्षीणत्वादवयव्यभावप्रसङ्गात् । आश्रयविवक्षायामन्यतरासिद्धो हेतुः स्यादाकाशाश्रयस्य ब्रह्मणो ममेष्टत्वात् । तस्मात्त्वदनुमानं न प्रतिपक्षः । नापि प्रतिपक्षान्तरमुत्प्रेक्ष्यते । तस्मा-दनुमानेनाप्याकाशोत्पत्तेः सम्भावितत्वाच्छुष्कतर्कश्रद्धामनादृत्य श्रुत्युक्तमे-वाकाशजन्मेतरजन्मवच्छ्रद्धेयम् । अभ्युपगम्य चेदं परमाणूनामनुत्पत्ति-मत्त्वं महत्त्वे सतीति हेतुर्विशेषितः । तदनभ्युपगमे तु भूतत्वादित्येव हेतुः । तथा हि चतुर्विधाः परमाणव उत्पद्यन्ते मूर्तत्वाद्भूतत्वाद्वा पटादिवत् । न च मनसि मूर्तत्वहेतोरनैकान्तिकता तस्यापि पक्षतुल्यत्वात् । न च

---

१. *Chhā.* 3. 14. 3. २. *Mahānāra.* 1. 3. ३. *Tait.* 2. 1.
४. See page 96, line 22.

धर्मिग्राहकप्रमाणबाधः सिद्धेऽपि तेन धर्मिस्वरूपे तद्वतनित्यत्वादेरसिद्धेः। न च परमाणूनामपि कार्यत्वे कारणानवस्थानान्न किमपि मूलकारणं जगतः स्यादिति वाच्यम्। ब्रह्मण एव जगन्मूलकारणस्य श्रुतिस्मृतीतिहासपुराणप्रसिद्धत्वात्। तथा दिक्कालावुत्पत्तिमन्तावचेतनभावत्वात्पटवत्। न चास्माकमविद्यायां व्यभिचारस्तस्या भावाभावविलक्षणत्वाभ्युपगमात्। अन्येऽपि हेत्वाभासाः पूर्ववदुद्धरणीयाः। न च सामान्यविशेषसमवायेषु व्यभिचारस्तत्र सामान्यस्य विचार्यमाणे ब्रह्मस्वरूपानतिरेकादचेतनत्वहेतोस्तत्राप्रवृत्तेः। तथाहि विशेषास्तावत्सामान्ये कल्पिता इति त्वविद्यावादे निरूपितम्। तथा च द्रव्यत्वादीनां सामान्यविशेषाणां सामान्यमात्ररूपतायां सत्तायामन्तर्भावः। सत्ताया अपि स्फुरणविरहिताया: क्वाप्यनुपलम्भात्स्फुरणमात्रत्वं युक्तम्। स्फुरणं च ब्रह्मैव "सदेव सोम्येदं", "सत्यं ज्ञानं" इत्यादिश्रुतेः। "ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद" इत्यादौ परब्रह्मस्वरूपातिरिक्तत्वेन ब्राह्मण्यादिजातिं विजानतो निन्दाश्रवणाच्च। तस्मान्न सामान्ये व्यभिचारः। विशेषसमवायौ तु खपुष्पकल्पौ। अनयोर्यथा खपुष्पकल्पत्वं तथा चिदानन्दलहरीटीकायां प्रपञ्चितमस्माभिरितीहोपरम्यते। श्रुतयश्च भवन्ति प्रत्यनुमानबाधिकाः। "अणोरणीयान्" इति हि परमाणोरणीयः परमकारणं ब्रह्म दर्शयित्वा "यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्" इति तैत्तिरीयश्रुतिस्तद्व्यतिरिक्तमणुमहच्चाविशेषेण प्रतिषेधति। "असतोऽधि मनोऽसृज्यत", "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति च तैत्तिरीयाथर्वणश्रुती मनस उत्पत्तिं स्पष्टमाचक्षेते। तथा "ज्ञः कालकालो गुणी सर्वविद्यः", "सर्वे निमेषा जज्ञिरे" इति च श्वेताश्वतरतैत्तिरीयश्रुती कालस्यापि कार्यतामावेदयतः। "पुरुष एवेदं सर्वं" इत्युपक्रम्य "दिशः श्रोत्रात्" इति पुरुषसूक्तात्मिका श्रुतिर्दिशां पुरुषविकारत्वं सूचयति। वस्तुतस्तु प्राच्यादिव्यपदेशस्यादित्यगत्युपाधिना नभस्येव कल्पितत्वान्नाकाशातिरिक्ता दिगस्तीति गमयितव्यम्। न च ब्रह्माप्युत्पद्यते कारणत्वादाकाशवदिति वाच्यं

---

१. *Chhā.* 6. 2. 1. २. *Tait.* 2. 1. 1. ३. *Brih.* 2. 4. 6. ४. Not mentioned in any of our Catalogues. ५. So MNR:—but P. and margin of Q. प्रत्यक्षानुमान°. See Notes. ६. *Tait. Ar.* 10. 10. 1. ७. *Idem.* 10. 10. 3. ८. *Tait. Brāh.* 2. 2. 9. 10. ९. *Mund.* 2. 1. 3. १०. *S'vet.* 6. 2. ११. *Tait. Ar.* 10. 1. 2. १२. *Ṛik-Saṁhitā* 10. 90. 2. १३. *Idem.* 14.

"अजो नित्य"[1] इत्यादिश्रुतिविरोधात् "असम्भवस्तु सतोऽनुपपत्तेः"[2] इति न्यायविरोधाच्च । एतेन जगदुत्पत्तिप्राक्काले ब्रह्मातिरिक्तं वस्तु नास्तीति दर्शितम् । अविद्यायाश्चात्मशक्तित्वेन ततः पार्थगर्थ्ययोगाज्जीवानां च तदा परमात्मनि सम्पन्नत्वात्तदृष्टानां च तदुपाध्यन्तःकरणनिष्ठानां तत्संस्कारा-विशेषाविद्यामात्रत्वेन पृथक्सत्त्वाभावात् । विस्तृतं चैतदाचार्यैर्विषयदधिकरणादाविति विश्रम्यते । "आकाशाद्वायुर्वायोरग्निः"[3] इत्यादावाकाशादिभाव-मापन्नादविद्यासहायाद्ब्रह्मण एव वाय्वादीनामुत्पत्तिरिति द्रष्टव्यम् । "तत्तेजोऽसृजत तत्तेज ऐक्षत" इत्यादिश्रुत्यन्तरे तेजःप्रभृतेरपीक्षणपूर्वकमबादिस्रष्टृ-त्वश्रवणात् । अचेतनस्य चेक्षणानुपपत्तेः । न्यायोऽपि—"तदभिध्यानादेव तु तल्लिङ्गात्सः" इतीममेवार्थं निर्णयति । एतेन प्रधानाण्वादिवादा निरस्ता वेदितव्यास्तेषां श्रुतिविरुद्धत्वान्न्यायविरुद्धत्वाच्च । न ह्यचेतनं चेतनानधिष्ठितं किञ्चित्कुर्वदुपपद्यते रथशकटादावदर्शनात् । अतो न प्रधानवाद आश्रयणीयः । तथा परमाणुवादोऽपि । अण्वोर्द्वयोः संयोगस्याव्याप्यवृत्तित्वे तयोः सावय-वतापत्तेरनित्यत्वप्रसङ्गः । तत्संयोगस्य व्याप्यवृत्तित्वे निरवयवयोरण्वोरेकस्मि-न्नितरस्य सम्भितत्वात्प्रथिमानुपपत्तिस्तथा च तत्कार्यस्य द्व्यणुकस्यापि परिम-ण्डलत्वप्रसङ्गः । किञ्च द्व्यणुकारम्भसमये परमाणू कथञ्चिद्विक्रियेते न वा । आद्येऽनित्यत्वादिदोषापत्तिर्मृत्पिण्डादिवत् । द्वितीये परमाणुसमूह एव द्व्यणुका-दिकार्यं स्यात्तृणतूलवत् । इत्यलं प्रपञ्चेन । प्रकृतमनुसरामः ॥

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितं चैतन्यमाकाशादिकारणमित्युक्तं तत्क-थमवगम्यते भूतकारणाज्ञाने तमःप्राधान्यमिति तत्राह—तेषु चेति। जाड्या-धिक्यदर्शनादित्यत्राधिक्यशब्दं प्रयुञ्जानः सत्तास्फूर्तिपदत्वेन कार्येषु चैतन्यस्यापीषदनुवृत्तिं सूचयति । तथा चाहुस्तत्त्वदर्शिनः—

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्" ॥ इति,

वसिष्ठोऽप्याह

"यदस्ति यद्भाति तदात्मरूपं
नान्यत्ततो भाति न चान्यदस्ति ।
स्वभावसंवित्प्रतिभाति केवला
ग्राह्यं गृहीतेति मृषा विकल्पः" ॥ इति ।

---

१. *Kaṭha.* 2. 18. २. *Brahmasūtra* 2. 3. 9. ३. *Tait.* 2. 1. 1. ४. *Chhā.* 6. 2. 3. ५. *Brahmasūtra* 2. 3. 13. ६. See Notes. ७. *Idem.* 2. 1. 29. ८. *Vākyasudhā* 20. ९. See Notes.

उत्पद्यमानेष्वाकाशादिषु वक्ष्यमाणकार्यानुरूपं गुणत्रयमुपलम्भयति—तदानीमिति। कारणस्याव्याकृतस्य ये गुणाः सत्त्वादयस्तेषां प्रक्रमेण तान् गुणानारभ्य यथाकार्यक्रमं सत्त्वादिगुणाः सहैव कार्यैस्तेषूत्पद्यन्त इत्यर्थः। नन्वव्याकृतात्पञ्चतन्मात्राणि क्रमेण जायन्त इति हि स्मृतीतिहासपुराणेषु प्रसिद्धिस्तत्कथमाकाशादेरिहोत्पत्तिराम्नायत इति तत्राह—एतान्येवेति। एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहाराक्षमाणि तन्मात्राणि शब्दादितावन्मात्रैकस्वभावान्यपञ्चीकृतानि परस्परमसंसृष्टानि चेति स्मृत्यादिषूच्यन्ते महर्षिभिरित्यर्थः। तदेवं भूताध्यारोपं श्रौतमनुक्रम्येदानीं भौतिकाध्यारोपं प्रतिजानीते—एतेभ्य इति ॥ १२ ॥

प्रतिज्ञातैकदेशं विवृणोति—सूक्ष्मशरीराणीति। लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भाव एभिरिति लिङ्गानि तानि च तानि शरीराणि च शरीरप्रतिष्टत्वाच्छरीरसाधनत्वाद्वा धर्मादिद्वारेणेति लिङ्गशरीराणीत्यर्थः। तथा च प्रयोगः। विमतानीन्द्रियाणि प्राणश्च स्वातिरिक्तस्वानुगतचैतन्याधिष्ठानपूर्वकप्रवृत्तयोऽचेतनत्वाद्रथादिवत् इति। श्रुतिश्च भवति—"[1]प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः" इति, "[2]यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणं" इत्यादिका च। के पुनः सप्तदशावयवा इति तानाह—अवयवास्त्विति। ननु कथं लिङ्गशरीरं सप्तदशावयवमिति निर्धार्यते। यावता [3]पुर्यष्टकं लिङ्गमाचक्षते सुरेश्वराचार्याः पञ्चीकरणवार्तिके—

"ज्ञानेन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।
मनो बुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ॥
प्राणोऽपानस्तथा व्यान उदानाख्यस्तथैव च।
समानश्चेति पञ्चैताः कीर्तिताः प्राणवृत्तयः ॥
खं वायवग्न्यब्धरित्र्यश्च भूतसूक्ष्माणि पञ्च च।
अविद्याकामकर्माणि लिङ्गं पुर्यष्टकं विदुः" ॥ इति।

अन्यत्र पुनरन्यादृशं वर्णितम्। भूतसूक्ष्मपञ्चकं कर्मज्ञानेन्द्रियपञ्चकद्वयं चतुर्वृत्तिकमेकमन्तःकरणं पञ्चवृत्तिक एकः प्राणश्चेति सप्तदशावयवा इति। अतः कथं निर्णय इति। उच्यते। [4]नैतेषां पक्षाणां विकल्पोऽ-

---

१. *Bṛih.* 4. 4. 18. २. *Chhā.* 8. 12. 4. ३. See Notes. ४. According to MS. 243 of 1882-83 in Deccan College Library, this consists of the second line of verse 31, the first of verse 33, and verses 35 and 36. See Notes. ५. See Notes.

भ्युपेयते वस्तुनि तदयोगान्नापि समुच्चयस्तत्र प्रमाणाभावात्किन्त्वहोक्तस्य सप्तदशकस्यैव संक्षेपविस्तरभेदेन तथा तथा तत्र तत्र कथनम्। तथाहि। इहोक्तानां हि सप्तदशानामवयवानां भूतसूक्ष्माण्युपादानानि तदुपादानं चाविद्या। अतश्चोपादानोपादेययोरभेदान्नाविद्या भूतसूक्ष्मेभ्यः पृथग्विवक्ष्यते। भूतसूक्ष्माणि च लिङ्गशरीरेभ्यो न पृथगभिप्रेयन्ते। कामकर्मणोरप्यन्तःकरणवृत्तित्वेन तदाश्रितत्वेन च तदभेदान्न पार्थगर्थ्यविवक्षा। अतः पुर्यष्टकवार्तिकेन न विरोधः। तथा पक्षान्तरेऽपि भूतसूक्ष्माणि तत्कार्येभ्यः पृथक्कृत्यान्तःकरणप्राणयोश्च वृत्तिवृत्तिमतोरभेदं गृहीत्वा सप्तदशत्वं निरूपितम्। तथा च "सप्तदशः[1] प्रजापतिः" इति श्रुतेः प्रजापतेर्हिरण्यगर्भस्य सप्तदशत्वावगमात्सप्तदशावयवमेव लिङ्गशरीरं मुख्यं ज्ञेयमिति। तदुक्तमभियुक्तैः[2]—

"मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम्" ॥ इति।

ज्ञानसाधनानीन्द्रियाणि—ज्ञानेन्द्रियाणि श्रोत्रादीनि। तेषां शब्दस्पर्शरूपरसगन्धग्राहकेन्द्रियत्वानि प्रत्येकं यथाक्रमं लक्षणानि। इन्द्रियाण्याहङ्कारिकाणीति[3] सांख्यास्तान्निराकुर्वंस्तेषां भौतिकत्वं कथयति—एतानीति। कारणगुणेनोत्पन्नत्रिगुणानां भूतानां सत्त्वगुणावच्छिन्नेभ्योंऽशेभ्यो गुणोद्रेककृतभागेभ्यः श्रोत्रादीनि जातानीत्यर्थः। बुद्धिमनसी लक्षयति—बुद्धिर्नामेति। निश्चयोऽध्यवसायः। इदमित्थमेवेति विषयपरिच्छेदः। सङ्कल्प इदं-नीलमिदं पीतमिति विषयविवेचनम्। विकल्पस्तद्विपर्यय इति भेदः। नन्वन्तःकरणस्य चतुष्टयत्वप्रसिद्धेः कथमिह द्वयमेव गृहीतमित्यत आह—अनयोरेवेति। अनुसन्धानात्मिकान्तःकरणवृत्तिश्चित्तम्। अभिमानात्मिकान्तःकरणवृत्तिरहङ्कारः। चित्तस्य बुद्धावन्तर्भावो विषयपरिच्छित्तिरूपत्वाविशेषात्। अहङ्कारस्य मनस्यन्तर्भावस्तस्यापि सङ्कल्पात्मकत्वाविशेषात्। एवं स्वरूपाभेदेऽपि विषयभेदात्क्वचित्क्वचिच्चित्ताहङ्कारयोर्बुद्धिमनोभ्यां पृथङ्निर्देशः। बुद्धेर्ह्यपूर्वो विषयश्चित्तस्य पूर्वानुभूतः। तथा मनसो बाह्य आभ्यन्तरश्च सर्वो विषयो यथायोगमहङ्कारस्य स्वनात्मोपरक्त आत्मैवेति। अतो विषयभेदेऽपि स्वरूपाभेदाद्युक्तोऽन्तर्भावः॥

पूर्ववदेषां चतुर्णामप्यन्तःकरणभेदानां भौतिकत्वमाह—एते पुनरिति। उक्तानां ज्ञानेन्द्रियाणामन्तःकरणानां च भूतगतसात्त्विकांशकार्यत्वे हेतुमाह—एतेषां प्रकाशात्मकत्वादिति।

"तत्र[4] सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्"।

---

१. *Satapatha* 5. 2. 2. 3. २. *Sañkṣepaśārīraka* iii. 19. ३. See Notes. ४. *Gītā*. xiv. 6.

इति स्मृतेः । सत्त्वकार्यभूतः प्रकाश इन्द्रियान्तःकरणेष्वपलभ्यमानस्तेषां सत्त्वकार्यतां गमयतीत्यर्थः । निरूप्यमाणे लिङ्गशरीर उत्तरावयवैः सिद्धमवान्तरभेदं कथयति—इयं बुद्धिरिति । बुद्धिग्रहणेनार्थान्मनोव्यावृत्तिरभिप्रेता । तदुपहितचैतन्यस्य च व्यपदेशभेदमाह—अयमिति । अयं विज्ञानमयकोशावच्छिन्नश्चिदात्मा जीव इत्युच्यत इत्यन्वयः । तस्य प्राज्ञात्मनो विशेषमाह—व्यावहारिक इति । व्यवहारमेव विशेषणान्तरेण व्यनक्ति—इहलोकेति । तत्र हेतुमाह—कर्तृत्वेति । तथा च श्रुतिः—

"विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च"[1]। इति ।

कर्तृत्वादिकं चैतन्यात्मनो न वास्तवं किंत्वाभिमानिकमित्यभिप्रेत्याभिमानित्वेनेत्युक्तम्। तथा च श्रुतिः—"स[2] समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव" इत्याद्या । इवशब्देन व्यवहारस्याभासतां दर्शयति । तथा न्यायौ[3] च—"कर्ता शास्त्रार्थवत्त्वात्", "यथा च तक्षोभयथा" इति च कर्तृत्वाकर्तृत्वयोर्व्यावहारिकपारमार्थिकत्वे व्यवस्थापयतः । पूर्ववन्मनःसम्बद्धमवान्तरभेदमाह—मनस्त्विति । कर्मसाधनानीन्द्रियाणि कर्मेन्द्रियाणि । तानि विभजते—कर्मेन्द्रियाणीति । वचनादानगमनविसर्गानन्दसाधनेन्द्रियत्वं यथाक्रमं वागादीनां प्रत्येकं लक्षणम् । एतेषामपि पूर्ववद्भौतिकत्वमाह—एतानि पुनरिति ॥

ननु कथमिन्द्रियाणां भौतिकत्वं निर्दिश्यते यत एषां भूतयोनेः परमकारणादेवोत्पत्तिः श्रूयते । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"[4] इति सत्यं श्रूयते । तत्रार्थक्रममेवाश्रित्य भूतभावमापन्नात्तस्माद्भूतयोनेरिन्द्रियोत्पत्तिराश्रिता । तथा च न्यायः—"अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्"[5] इति । न चैतेषां भौतिकत्वे प्रमाणाभावः "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्"[6] इति श्रौतलिङ्गस्य प्रमाणत्वात् । न च वागादिष्विन्द्रियत्वमप्रसिद्धमिति वाच्यं "प्रज्ञया वाचं समारुह्य वाचा हि सर्वाणि नामान्याप्नोति"[7] इति कौषीतक्यादौ चक्षुरादिभिः सह वाचः समभिव्याहृतत्वात् । आथर्वणे च—"चक्षुश्च द्रष्टव्यं च"[8] इत्यादिना सविषयाणीन्द्रियाण्यनुक्रम्य "हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च"[9] इति सविषयाणां समभिव्याहृतत्वात् । एतानि चेन्द्रियाण्येकादशैव भवन्ति न न्यूनानि नाधिकानि ।

---

१. *Tait.* 2. 5. 1. २. *Bṛih.* 4. 3. 7. ३. *Brahmasūtra* 2. 3. 33, 40. ४. *Muṇḍ.* 2. 1. 3. ५. *Brahmasūtra* 2. 3. 15. ६. *Chhā.* 6. 5. 4. ७. *Kauṣī.* 3. 6. ८. *Praśna* 4. 8. ९. *Idem.*

"दशेमे पुरुषे प्राणा आत्मैकादशः" इति श्रुत्यनुरोधेन सिद्धान्ततत्त्वात्। अत्रात्मशब्दो मनोविषयः प्राणशब्द इतरेन्द्रियविषय इति भेदः। अणुत्वं चैषां परिच्छिन्नत्वे सति सूक्ष्मत्वलक्षणमभ्युपगन्तव्यं न तु परमाणुलक्षणत्वम्। तथा सति सर्वशरीरव्यापिकार्यानुपपत्तिप्रसङ्गात्। अपरिच्छिन्नत्वे चोत्क्रान्तिर्गत्यागतिश्रुतिव्याकोपप्रसङ्गः। स्थूलत्वे चोत्क्रान्तिसमये बिलान्निर्गच्छन्त इव सर्पाः शरीरच्छिद्रेभ्यो निष्क्रममाणानीन्द्रियाणि प्रत्यक्षेणोपलभ्येरन्। न चोपलभ्यन्ते। तस्मादुक्तप्रकारेणाणूनीन्द्रियाणि। ननु "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादिश्रुतेरग्न्यादिदेवतानामेव मुखादिस्थानेषु वागादीन्द्रियात्मना प्रवेशश्रवणात्कथमेतेषां भौतिकत्वमुच्यत इति चेन्नैष दोषः। देवतानामप्याधिदैविकप्राणात्मनां भौतिकदेहविशिष्टचेतनानामेवैश्वर्ययोगादध्यात्मं वागादिरूपेण मुखादिष्ववस्थानस्येष्टत्वात्। तथा च भौतिकान्यपीन्द्रियाणि देवताशरीराणि चेति न विरुध्यन्ते। यद्वा इन्द्रियाण्युक्तलक्षणानि भौतिकान्येव देवतानां पुनस्तदधिष्ठातृत्वेन तच्छरीरतया तत्र प्रवेश एव "अग्निर्वाग्भूत्वा" इत्यादावाम्नायत इति। तथा च न्यायः—"ज्योतिराद्यधिष्ठानं तु तदामननात्" इति। लिङ्गं च "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति" इति तेजोमात्राणामिन्द्रियाणामुत्क्रान्तिसमये हृदयप्रवेशमुक्त्वा "स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति" इत्यादित्यपुरुषस्य चक्षुषोऽपक्रमणं दर्शयति। ये पुनर्मुख्यप्राणस्य वृत्तिभेदा वागादय इति वदन्ति तेऽप्यनयैव नीत्या निराकरणीयाः। "ते ह वाचमूचुस्त्वं न उद्गाय" इत्युपक्रम्यासुरपाप्मविद्धत्वेन वागादीननुद्गातॄन्निर्धार्य समाप्य च वागादिप्रकरणं "अथ हैममासन्यं प्राणमूचुः" इति पृथगेव मुख्यप्राणस्य निर्देशात्। तथा सुषुप्तावपि वागादीनामुपसंहारो मुख्यप्राणस्य सवृत्तिकस्यास्ति जागरणमिति वैषम्यलिङ्गाच्च प्राणादिन्द्रियाणां भेदः। एवमादिन्यायकलापो द्वितीयेऽध्याये चतुर्थे पादे विस्तृतः। इह पुनर्वेदान्तसारत्वाद्ग्रन्थस्य वेदान्तविहिता न्याया लेशतो दर्शिता इति। तस्माद्युक्तमिन्द्रियाणां भौतिकत्वादीति स्थितम्॥

इदानीं वायुपञ्चकं विभजते—वायव इति। प्रागमनमग्रतो निःसरणम्। यद्यपि "प्राणो हृदये" इतिश्रुतेः, "हृदि प्राण" इत्यभिधानाच्च हृदयस्थानः

---

१. *Brih.* 3. 9. 4. २. See Notes. ३. Ditto. ४. *Ait.* 2. 4. ५. *Brahmasūtra* 2. 4. 15. ६. *Brih.* 4. 4. 1. ७. *Idem.* ८. *Idem.* 1. 3. 2. ९. *Idem.* 1. 3. 7. १०. *Tait. Brāhmaṇa* 3. 10. 8. 5. ११. See Notes.

प्राणस्तथापि नासाग्रे प्रत्यक्षमुपलभ्यमानत्वान्नासाग्रस्थानवर्तीत्युक्तम् । अधो नाभेरधस्ताद्गमनवान्मलापनयनव्यापारेण । पायुर्गुदं तत्स्थानवर्तीत्यर्थः । आदिशब्दादुपस्थग्रहः । तत्रापि मूत्ररेतोविसर्गस्यापानकर्मत्वात् । विष्वक्परितः सर्वतो गमनं विद्यते यस्य स तथा । प्राणापाननियमनकर्मारण्यामश्युत्पादनादिवीर्यवत्कर्महेतुत्वादखिलशरीरवर्ती व्यान इत्यर्थः । तथा च श्रुतिः—"अथ[1] यः प्राणापानयोः सन्धिः स व्यान" इत्युपक्रम्य "यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोति" इति । यद्यपि "चक्षुषो[2] वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य" इति श्रुतेरुत्क्रमणस्य चक्षुरादिद्वारेष्वनियमस्तथापि कण्ठसम्बन्धस्य प्रायेण नियतत्वात्कण्ठस्थानवर्त्युदान इत्युक्तम् । अशितादेः समं नयनात्समान इत्यर्थः ॥

मतान्तरमुत्थापयति स्वमतपरिशुद्धये—केचित्त्विति । तेषां लक्षणान्याह—नाग इत्यादिना । उद्गिरणं छर्दिः । उन्मीलनशब्दो निमीलनस्याप्युपलक्षणपरः । पोषणं पुष्टिः । अन्यत्प्रसिद्धम् । उत्थापितं मतं प्रत्याचष्टे—एतेषामिति । केचिच्छब्द औपनिषदविषयः । एतेषां नागादीनां प्राणादिष्वन्तर्भावादित्ययमर्थः । उद्गिरणं ह्यूर्ध्वमुखस्य वायोः क्रिया । ऊर्ध्वमुखस्य वायुरुदान इत्युक्तम् । तथा चोदानेनैवोद्गिरणस्यापि सिद्धौ नागस्य तत्कर्तुरुदानेऽन्तर्भावान्न ततः पृथक्त्वम् । उन्मीलनस्याङ्गचेष्टान्तर्गतत्वात्तस्याश्च व्याननिमित्तकत्वादुन्मीलनकर्तुः कूर्मस्य व्यानेऽन्तर्भावः । समानेनाशितपीतादीनां पाकेन रसादिभावमापद्य सकलशरीरदेशेषु तत्प्रवेशने कृते सत्येव क्षुधोत्पत्तेस्तत्कर्तुः कृकलस्य समानेऽन्तर्भावः । जृम्भणस्य निद्रालस्यादिहेतुकत्वान्निद्रालस्यादेश्च वातुलाद्यन्नोपजीवननिमित्तकत्वादन्नस्त्रीकरणस्य चापानकर्मत्वादपान एव परम्परया जृम्भणहेतोर्देवदत्तस्यान्तर्भावः । अपानाख्यस्यान्तर्मुखतया शरीरान्तः प्रविशतो वायोरन्नस्त्रीकरणहेतुत्वमैतरेयके समाम्नायते—"तं[3] दपानेनाजिघृक्षत्तदावयत्" इति । रसलोहितमांसादिक्रमेण शरीरेऽन्नपरिणामे सत्येव पोषणापरपर्यायायाः पुष्टेः सम्भवाद्रसादिनयनकर्तरि समाने धनञ्जयस्यान्तर्भाव इति । तथा च प्राणादीनामेव यथायथमुद्गारादिक्रियानिमित्ततयावस्थान्तरमापद्यमानानां नागादिसंज्ञाया अप्युपपत्तौ तत्त्वान्तरकल्पनं तेषां गौरवमप्रामाणिकमिति भावः । श्रुतौ च पञ्चानामेव प्राणादीनां तत्र तत्र श्रवणात्तद्विरुद्धा चेयं कल्पना । प्राणादयोऽपि मुख्यस्यैकस्य प्राणस्य वृत्तिविशेषा एव न तत्त्वान्तरभूताः । "प्राणोऽपानो व्यान उदानः समानोऽन" इति बृहदारण्यके[4] वृत्तिमतः प्राणस्य निरुप-

---

१. *Chhā.* 1. 3. 3. २. *Idem.* 1. 3. 5. ३. *Bṛih.* 4. 4. 2. ४. *Ait.* 3. 10. ५. *Bṛih.* 1. 5. 3.

सर्गानशब्दवाच्यस्य पृथङ्निर्देशात्। तथाच न्यायः—"पञ्चवृत्तिर्मनोवद्व्यपदेशात्" इति। तथा मुख्यप्राणोऽपि वायोर्बाह्यस्य सूत्रात्मरूपस्य विकारो न शरीरमध्ये नभोवद्वृत्तिलाभमात्रेणावस्थितो बाह्यवायुरेव। नापि वागादीनां सामान्यवृत्तिरूपा वा क्रिया। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुः" इतिश्रुतौ वायोरिन्द्रियाणां च प्राणात्पृथगेव निर्दिष्टत्वात्। तथाच न्यायः—"न वायुक्रिये पृथगुपदेशात्" इति। "अणुश्च" इत्यादिन्यायेन वशादिन्द्रियवत्सूक्ष्मत्वादिकमपि प्राणस्यानुसन्धेयमिति सङ्ग्रहः।

प्राणादीनामपि पूर्ववदुपादानविशेषं सङ्कीर्तयति—एतदिति। उक्तानामेव कर्मेन्द्रियाणां प्राणादिभिर्मिलितानां पूर्ववदवान्तरविशेषमाह—इदं प्राणादीति। प्राणादिपञ्चकस्य रजोंशकार्यत्वे लिङ्गमाह—अस्येति। उक्तं कोशत्रयमनूद्य तेषां प्रतिनियतां व्यवस्थां दर्शयति—एतेषु कोशेष्वित्यादिना। "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" इतिश्रुतेर्विज्ञानस्य चैतन्यं प्रत्यतिसन्निहितत्वाज्ज्ञानशक्तिमत्त्वम्। "कामः सङ्कल्पो विचिकित्सा" इत्यादिश्रुतेः कामापरपर्यायाया इच्छाया मनोवृत्तित्वावधारणादिच्छाशक्तिमत्त्वं मनोमयकोशस्य। "सँ यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः", "कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति", "सँ प्राणमसृजत" इत्यादिश्रुतेः प्राणमयकोशस्य क्रियाशक्तिमत्त्वम्। योग्यत्वादित्यस्यायमर्थः। विज्ञानमयस्य तु कर्तृत्वमुपपादितं मनोमयस्य करणत्वं विवेकसाधनत्वात्। आत्मेन्द्रियविषयाणां सन्निकर्षे विद्यमानेऽपि यदन्वयव्यतिरेकाभ्यां ज्ञानभावाभावौ तन्मनोविवेकसाधनत्वात्करणपक्षपातीति युक्तं मनोमयस्य करणरूपत्वम्। तथाच श्रुतिः—"अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषं" इति, "तस्मादपि पृष्टत उपस्पृष्टो मनसा विजानाति" इति च। न्यायश्च भवति—"नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा" इति। तथा "तौ मिथुनं समैतां ततः प्राणोऽजायत" इतिश्रुतेः प्राणस्य वाङ्मनसयोर्मिथुनीभूतयोरुत्पत्तिश्रवणात्प्राणमयस्य कार्यरूपत्वं युक्तमिति। एवं सूक्ष्मशरीरस्यावयवान्सविशेषान्निरूप्यावयविनं निर्दिशति—एतत्कोशेति॥ १३॥

"लिङ्गं मनो यत्र निषक्तमस्य", "अनन्तं वै मनोऽनन्ता विश्वेदेवाः"

---

१. *Brahmasūtra* 2. 4. 12. २. *Muṇḍ.* 2. 1. 3. ३. *Brahmasūtra* 2. 4. 9. ४. *Idem.* 2. 4. 13. ५. *Bṛih.* 4. 3. 7. ६. *Idem.* 1. 5. 3. ७. *Chhā.* 8. 12. 3. ८. *Praśna.* 6. 3. ९. *Idem.* 6. 4. १०. *Bṛih.* 1. 5. 3. ११. *Idem.* १२. *Brahmasūtra* 2. 3. 32. १३. *Bṛih.* 1. 5. 12. १४. *Idem.* 4. 4. 6. १५. *Idem.* 3. 1. 9.

इत्यादिश्रुतिषु लिङ्गशरीरस्याप्येकत्वबहुत्वश्रवणात्तदेकत्वानेकत्वयोरप्यज्ञानवदेव व्यवस्थेत्यभिप्रेत्याह—अखिलसूक्ष्म° इति । अनयोस्तु व्यष्टिसमष्ट्योरेकत्वं स्पष्टमेव पठ्यते । "वायुरेव व्यष्टिर्वायुः समष्टिः" इति बृहदारण्यके[1] । समष्टिलिङ्गशरीराभिमानिनश्चैतन्यस्य व्यवहारसिद्धान् व्यपदेशविशेषानाह—एतत्समष्टीति । व्यपदेशत्रये निमित्तमाह—सर्वज्ञेत्यादिना । सर्वज्ञानुस्यूतत्वात्सूत्रात्मा । ज्ञानशक्तिमदन्तःकरणोपहितत्वाद्धिरण्यगर्भः[2] । क्रियाशक्तिमदधिदैवतप्राणरूपत्वात्प्राणस्तादृगध्यात्मप्राणरूपत्वाद्वा । यद्वा ज्ञानक्रियाशक्तिमत्समष्टिप्राणेन्द्रियसमुदायात्मकं समष्टिलिङ्गशरीरं तदुपहितत्वाज्ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः क्रियाशक्तिप्राधान्येन प्राण इति च व्यपदेश इति योजना । तथाच श्रुतिवचनानि—"वायुर्वै[3] गौतम तत्सूत्रं वायुना वै गौतम सूत्रेण" इति, "हिरण्यगर्भः[4] समवर्तताग्रे", "हिरण्यगर्भं[5] जनयामास पूर्वं" इति, "कतम[6] एको देव इति प्राण इति" चैवमादीनि । प्राण इति चोच्यते इति चशब्दात्कः प्रजापतिर्ब्रह्मेत्यादिव्यपदेशान्तराणि समुच्चीयन्ते । एवमुपहितस्य व्यपदेशभेदानुक्त्वोपाधेरपि तानाह—अस्यैवेत्यादिना । स्थूलप्रपञ्चो विराड्विज्ञानमयादिकोशत्रयं लिङ्गशरीरं सूक्ष्मशरीरमिति सम्बन्धः । मध्यप्रदीपन्यायेनोत्तरत्रापि जाग्रद्वासनेत्यत्र कोशत्रयपदं सम्बध्यते । वासनामयत्वं चास्य श्रुतिराह—"तँस्य[7] हैतस्य पुरुषस्य रूपं यथा माहारजतं वासो यथा पाण्डावि[8]कं" इत्यादि, "सकृद्विद्युत्तं[9]" इत्यन्तेन । स्वप्नत्वं चास्याव्याकृतविराजोः सन्ध्यस्थानत्वादुपपन्नं "सैन्ध्यं[10] तृतीयं स्वप्नस्थानं" इति श्रुतेरविशेषात् । यतो वासनामयोऽत एवेति योजना । "अस्यै[11] लोकस्य सर्वावतो मात्रामपादाय स्वयं विहृत्य" इत्याद्या, "स्वेनै[12]न शारीरमभिप्रहृत्य" इत्याद्या च श्रुतिः स्थूलशरीरस्य स्वप्ने लयं दर्शयन्ती तत्समष्टेर्महाप्रपञ्चस्यापि सन्धौ तं सूचयति । एवं समष्टिलिङ्गतदुपहितचैतन्ययोर्व्यपदेशानुक्त्वा व्यष्टिलिङ्गतदुपहितचैतन्ययोरपि तानाह—एतदिति । तैजसव्यपदेश्यत्वे हेतुमाह—तेजोमया° इति । तेजोमयत्वं वासनामयत्वं 'स्वेयं निर्माय स्वेन भासा" इति श्रुतौ भाःशब्देनान्तःकरणस्य वासनात्मनो

---

१. *Bṛih.* 3. 3. 2. २. *Idem.* 3. 7. 2. ३. *Ṛik-saṁhitā* 10. 121. 1. ४. *S'vet.* 3. 4. ५. *Bṛih.* 3. 9. 9. ६. "After the manner of a lamp placed in the middle of a door (and throwing light both inwards and outwards)". P. Occurs in Bhāshya on *Mund.* 1. 1. 3. See Notes. ७. *Bṛih.* 2. 3. 6. ८. महा° MNPQ. ९. *Bṛih.* 4. 3. 9. १०. *Idem.* ११. *Idem.* 4. 3. 11. १२. *Idem.* 4. 3. 9.

व्याख्यातत्वात्। अस्यापीति स्पष्टार्थः। "[1]यो वै प्राणः स वायुः" इति-श्रुतेः। समष्टिव्यष्टिलिङ्गयोस्तदवस्थयोरपि सन्ध्ययोरभेदं सिद्धवत्कृत्य तत्र तैजससूत्रयोर्भोगविशेषं निर्दिशति—एतावितीति। तदानीं स्वप्नावस्थायाम्। निद्रादिदोषदूषितस्याद्दष्टादिसमुद्बोधितसंस्कारविशेषसचिवस्यान्तःकरणस्य याः संस्कारानुरूपा वृत्तयस्ताद्दगन्तःकरणसंसृष्टचैतन्यस्थाविद्याशक्तिविजृम्भितविषयाकारास्ताभिः सूक्ष्मविषयान् जाग्रद्वासनामयानीषदस्फुटाननुभवत इत्यर्थः॥

न स्वप्नः स्मृतिरपरोक्षावभासितत्वात्। नापि प्रत्यक्षप्रमा सम्प्रयोगाद्यभावात्। न च सुषुप्तिः स्पष्टं विषयानुभवात्। नापि जागरितं तदुचितदेशकालनिमित्तानामसम्भवात्। तथा हि "[2]यथा केशः सहस्रधा भिन्नः" इत्यादिना केशसहस्रांशैर्नाडीरुपमीय "[3]एताभिर्वा एतदात्तवति" इति स्वप्नाय तादृशनाडीप्रवेशं दर्शयति श्रुतिः। तथा चातिसूक्ष्मासु नाडीषु स्वप्नं पश्यतो न नदीसमुद्रवनगिरिनगरीनिवेशोचितो देशोऽस्ति येन तत्र स्थितान्नद्यादीन्पश्येत्। ननु "[4]बहिः कुलायादमृतश्चरित्वा" इति श्रुतेर्बहिरेव स्वप्नान्पश्यतीति चेन्न। तत्र बहिःशब्देन स्थूलशरीरोपरागाभावमात्रस्य विवक्षितत्वात्। अन्यथा तस्मिन्नेव शरीरे नियमेन पुनर्जागरणानुपपत्तेः। तथा च श्रुत्यन्तरं—"[5]कुरुष्वहमद्य शयानो निद्राभिप्लुतः स्वप्ने पञ्चालानधिगतश्चास्मिन्प्रतिबुद्धश्च" इति स्वप्नप्राप्तदेशान्तरात्पुनरागमनरहितस्यापि स्वप्नदेशस्थशरीरे जागरणं दर्शयति। अतो न तत्र जाग्रदुचितो देशः। नापि कालस्तदुचितः सम्भवति। मुहूर्तमात्रेऽपि संवत्सरशतानामनुभवात्। नाप्युचितं निमित्तं तत्र सम्भवति। तक्षदारुमृदाद्यभावेऽप्यकस्मादेव प्रासादादेर्निष्पत्तिदर्शनात्। जाग्रदवस्थापन्नानां वस्तूनां स्वप्नेऽभावं दर्शयित्वा नूतनानां वासनात्मकानां निर्माणं दर्शयति श्रुतिः—"[6]न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान्पथः सृजते" इत्यादिना। तस्मान्मायामय एव स्वप्न इति द्रष्टव्यम्। तथाच न्यायः—"[7]मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्" इति॥

उक्तेऽर्थे प्रमाणमाह—प्रविविक्तभुगिति। आदिशब्दात् "[8]तस्मादेष प्रविविक्ताहारतर इवैव भवति" इत्यादिश्रुत्यन्तरग्रहः। अत्रापीति स्पष्टार्थः। सूक्ष्मशरीरप्रपञ्चनमुपसंहरति—एवमिति॥ १४॥

---

१. *Brih.* 3. 1. 5. (योऽयं). २. *Idem* 4. 2. 3. ३. *Idem.* ४. *Idem.* 4. 3. 12. ५. See Notes. ६. *Brih.* 4. 3. 10. ७. *Brahmasūtra* 3. 2. 3. ८. *Brih.* 4. 2. 3.

पूर्वत्र प्रतिज्ञातानि स्थूलभूतानि प्रपञ्चयति—स्थूल° इति । पूर्वोक्तानामेव भूतानां परस्परं व्यवहर्तृप्राणिनिकायव्यवहारनिर्वाहकतदीयधर्माधर्मापेक्षपरमेश्वरसान्निध्यादिनिमित्तापेक्षया विभागेन मिलितानां स्थूलतापत्तिः पञ्चीकरणमित्याह—पञ्चीकरणं त्विति । ननु कथमित्थं विभागेन पञ्चीकरणं निरूप्यते तत्र प्रमाणाभावादित्याशङ्क्याह—अस्येति । "सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" इतीक्षित्वा सा सदाख्या परमात्मदेवता सृष्टानां तिसृणां देवतानां तेजोबन्नात्मिकानां मध्य एकैकां देवतां त्रिवृतं त्रिवृतं त्रिरूपां त्रिरूपामकरोत्कृतवतीति त्रिवृत्करणश्रुतिः । सा पञ्चीकरणमप्युपलक्षयत्याक्षिपतीत्यर्थः । त्रिवृत्करणं नाम तेजोबन्नानां त्रयाणां मध्य एकैकं द्विधा समं विभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयं स्थूलभागं परित्यज्यान्यदीयस्थूलभागयोरेकैकस्य भागस्य संयोजनम् ।

अत्र केचित्प्रगल्भन्ते सम्प्रदायाध्वना पञ्चीकरणं यद्यपि स्थितं तथापि युक्तिदृष्टत्वाद्वाचस्पतिमतं शुभमित्यादिना । तत्र युक्तिं चेत्थमाचक्षते गगनपवनयोः किल पृथिव्याद्यात्मत्वे रूपवत्त्वमहत्त्वाभ्यां चाक्षुषत्वं तयोः प्रसज्येतेति । तत्र त्रिवृत्करणपक्षेऽपि तेजसः पृथिव्यात्मत्वे काठिन्यद्रवत्वाभ्यां विशिष्टतयोपलम्भप्रसङ्ग इति दोषसाम्ये शङ्कितेऽर्धभूयस्त्वान्न दोष इति परिहारस्य पञ्चीकरणपक्षेऽपि समानत्वेन दूषणोद्धारे व्यवहारमार्गप्राप्तपञ्चीकृतिर्मुधा पञ्चीकरणस्य कुत्राप्यश्रवणादिति । तत्रेदं वक्तव्यम् । किं पञ्चीकरणस्य व्यवहारमार्गसिद्धत्वादप्रामाण्यं किंवाश्रुतत्वादाहोस्विन्त्रिवृत्करणश्रुतिविरोधादिति । आद्येऽष्टकाकरणादीनां शिष्टव्यवहाराणामप्रामाणिकत्वापत्तिः । द्वितीयेऽपि किं साक्षाच्छ्रवणाभावो हेतुरुत श्रुतार्थापत्त्यभावोऽपि । नाद्यः साक्षादश्रुतस्य प्रत्याख्याने परमापूर्वादीनामपि प्रत्याख्यानप्रसङ्गात् । न द्वितीयः श्रुतार्थापत्तेर्विद्यमानत्वात् । तथाहि छान्दोग्ये तेजःप्रभृतीनां त्रयाणां सृष्टिश्रुतौ तावच्छ्रुत्यन्तरप्रसिद्धाकाशवायुसृष्टेरप्युपसंहरणीयत्वम् । विर्यदधिकरणे तेजोधिकरणे च निर्धारितमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहान्यादिभिर्हेतुभिः । तथा च श्रुत्यन्तरैकवाक्यतया पञ्चानां भूतानां सृष्टिं प्रक्रम्य तेषां सूक्ष्मतयाऽव्यवहार्याणां व्यवहारसिद्धये त्रिवृत्करणं ब्रुवन्ती श्रुतिः पञ्चीकरणाभिप्राया चेन्न स्यात्तदा वाय्वाकाशयोः सूक्ष्मत्वानिवृत्तेरव्यवहार्यतापत्तौ सृष्टानां भूतानां व्यवहाराय त्रिवृत्करणोप-

---

१. *Chhā.* 6. 3. 2. २. युक्तिदुष्ट° N. युक्तिदग्ध° M. युक्तिबुद्ध° P. ३. See Notes. ४. *Brahmasūtra* 2. 3. 1–7. ५. *Idem.* 2. 3. 10.

देशानुपपत्तिः केन वार्यते। न च वाय्वाकाशयोर्व्यवहार एव नास्तीति वाच्यम्। महान्वायुर्मेहन्नभ इति व्यवहारस्य सर्वजनीनत्वात्। ननु श्रुत्युक्तमित्येव त्रिवृत्करणं स्वीक्रियते न व्यवहारायेति चेन्न। त्रिवृत्करणवाक्ये स्वसम्बन्धिनः फलस्याभावात्फलवदात्मैक्यज्ञानार्थवादत्वे यथासृष्टिन्यायं त्रिवृत्करणं युक्तमर्धजरतीयस्यान्याय्यत्वात्॥

ननु शाखान्तरे भूतद्वयसृष्टेः श्रुतत्वात्तत्परित्यागानुपपत्तेश्छान्दोग्यतैत्तिरीयादिश्रुत्योर्विरोधपरिहारायोपसंहारः क्रियते न तथा पञ्चीकरणं क्वचिच्छ्रुतमस्ति येन तन्न्यायोऽनुसरणीयः स्यादिति चेत्सत्यम्। तथापि न्यायानुसरणं युक्तम्। यथा त्रिसर्गश्रुतौ सृष्टानां भूतानां स्फुटतरव्यवहाररूपनामरूपव्याकरणोपायतया त्रिवृत्करणं श्रुतं तद्वद्भूतपञ्चकसर्गश्रुतावपि तथा नामरूपव्याकरणोपायः कश्चिदीश्वरस्येक्षितुर्युक्तः। स चोपायविशेषस्तस्यैवेश्वरस्य भूतयोनेः शाखान्तरे त्रिवृत्करणरूपः श्रुतस्तत्परित्यागेनान्यस्य कल्पनायां प्रमाणाभावात्तस्यैव पञ्चसर्गश्रुतावप्युपसंहारे प्राप्ते तस्य पञ्चीकरणार्थत्वमन्तरेण पञ्चानां भूतानां स्फुटतरव्यवहारोपायतानुपपत्तेर्युक्तं त्रिवृत्करणवाक्यस्य पञ्चीकरणोपलक्षणत्वमित्येतेन चरमः पक्षः प्रतिक्षिप्तः। त्रिवृत्करणश्रुतेः पञ्चीकरणार्थत्वनिरूपणे कृते तेन पञ्चीकरणस्य विरोधासम्भवात्। श्रुत्यभिप्रायश्चैवं वर्णितो विद्वत्तमाचार्यैः—"आकाशस्य सर्वावकाशतया सर्वाव्यतिरेकाद्वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात्तयोस्तेजःप्रभृतिष्वन्तर्भावं सिद्धवत्कृत्य त्रिवृत्करणं प्रयोगसौकर्यार्थं श्रुतिर्वर्णयाम्बभूव" इति। तस्मादस्ति पञ्चीकरणं प्रामाणिकमित्यलमतिनिर्बन्धेन॥

ननु पृथिव्यादीनां भूतानां चेत्सर्वभूतात्मकत्वं तथा सति व्यवहारसाङ्कर्यप्रसङ्ग इत्याशङ्क्याह—पञ्चानामिति। वैशेष्याद्विशेषभावात् भागाधिक्यात्तद्वादो नभः पवनस्तेजो जलं पृथिवीत्यादिव्यपदेशो भवतीति द्वितीयाध्यायसमास्यधिकरणे न्यायेन निर्णयः कृतस्तेन न्यायेनाकाशादौ व्यवहारासाङ्कर्यं सिध्यतीत्यभिप्रायः। इदानीं भूतानां पञ्चीकृतत्वे लिङ्गं चाह—तदानीमिति। तदानीं पञ्चीकरणानन्तरमाकाशे शब्दोऽभिव्यज्यते। स्फुटतयेति सर्वत्र योजनीयम्। एतदुक्तं भवति। आकाशादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वेन स्वस्वकार्यापेक्षया व्यापकत्वात्कार्यांशसंवलितत्वेऽपि न कार्यगतगुणाश्रयतयाप्यभिव्यक्तिः किन्तु स्वस्वगुणाश्रयतयैव। तथा कार्याणां स्वकारणापेक्षयाल्पत्वात्तेषां कारणभागसम्मिश्रितानां कारणगुणाश्रयतयापि भवत्यभिव्यक्तिरिति। तथा च लोकेऽनुभवः। प्रचण्डशब्दो वायुः।

---

१. See Notes. २. Cannot trace this. ३. *Brahmasūtaa* 2. 4. 20–22.

प्रजल्पति ज्वाला । नदी संघुष्यति । स्फुट्यमानः पाषाणः क्रोशतीत्यादि । स्पर्शादीनां तेजःप्रभृतिषु सद्भावोऽविवाद एव । न चैवमनुभवो भ्रान्तिर्व्यवहारदशायां बाधादर्शनात् । तथा च प्रतिनियताश्रया अपि शब्दादयो गुणा यथायथं भूतान्तरेष्वप्युपलभ्यमाना भूतानां पञ्चीकृतत्वं गमयन्तीति ॥१५॥

एवं भूतारोपं प्रपञ्च्य भौतिकारोपमाह—एतेभ्य इति । भूरादयः प्राणिनां कर्मज्ञानफलभोगस्थानविशेषा यथापाठक्रममुपर्युपरि वर्तमानाः सप्त भूमेरधोऽधश्च पाठक्रमेण वर्तमाना अतलादयः सप्तेत्येवं चतुर्दश लोकाः । एत एव स्वावरणभूतलोकालोकपर्वततद्बाह्यपृथिवी तद्बाह्यसमुद्रैः सहिता ब्रह्माण्डमित्युच्यते । अस्य च परिमाणं श्रुतौ सङ्कीर्तितं—"[1]द्वात्रिंशतं वै देवरथाङ्घ्र्यान्यं लोकस्तं समन्तं पृथिवी द्विस्तावत्पर्येति तां समन्तं पृथिवीं द्विस्तावत्समुद्रः पर्येति" इति । शरीराणां चातुर्विध्यं स्पष्टयति—शरीराणीति । यथोद्देशक्रमं शरीराणि लक्षयति—जरायुजानीत्यादिना ॥

ननु वैशेषिकाः प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वात्पञ्चात्मकत्वं न विद्यत इति वदन्तोऽप्रत्यक्षाभ्यां वाय्वाकाशाभ्यां सह पृथिव्यादिभिरारभ्यमाणानां शरीराणामप्यप्रत्यक्षत्वप्रसङ्गान्न पाञ्चभौतिकं शरीरमित्याहुस्तत्कथं पञ्चभ्यो भूतेभ्यश्चतुर्विधभूतग्रामस्योत्पत्तिरुच्यत इति चेदत्राहुः । अस्ति हि शरीरे सर्वेषामपि भूतानां कार्यसम्प्रतिपत्तिरवकाशव्यूहनपचनक्लेदनकाठिन्यानां सर्वजनानुभवसिद्धत्वात् । अतस्तत्कारणतया पञ्चापि भूतान्येकस्मिन्देहे सन्तीति स्थिते यदि तेषां भूतानां देहावयवत्वाभावो वृत्तिलाभमात्रतैव स्यात्तदा तदपगमानपगमाभ्यां देहस्योपचयापचयौ न स्याताम् । दृश्येते च तयोः सतोरुपचयापचयावतस्तन्तुपटयोरिवावयवावयवित्वमेव पञ्चभूतदेहयोर्युक्तम् । पार्थिवे कार्येऽपार्थिवानां भूतानां वृत्तिलाभमात्रत्वे तु तदुपगमापगमाभ्यां तस्योपचयापचययोगात् । न हि वस्त्रस्यानारम्भकसलिलद्रव्यार्द्रीकृतस्य तदवस्थायामुपचयस्तदपगमे वापचयोऽस्ति तदायामविस्तारयोस्तदवस्थास्वदर्शनात् । तथाच जलद[2]त्योरपि पावकपवनोपगमापगमाभ्यां परिमाणान्यथात्वं न दृश्यते । तथा च यदि भस्त्रादाविव पार्थिवे देहे भूतान्तरस्य वृत्तिमात्रता स्यात्तर्हि भस्त्रादिदेहयोरविशेषेण व्यूहनादीनां सत्त्वमसत्त्वं वा तुल्यवत्प्रसज्येत । अदृष्टवदात्मनः संयोगतज्जन्यप्रयत्नादिकारणान्तरस्याप्युभयत्र समानत्वादयितुं शक्यत्वात् । न च प्रत्यक्षाप्रत्यक्षवृत्तेः शरीरस्याप्रत्यक्षत्वं शङ्कनीयम् । प्रत्यक्षाप्रत्यक्षावयववृत्तीनामवयविनामप्रत्यक्षत्वप्रसङ्गात् । न च स्पर्शशून्यत्वादेकद्रव्यत्वाच्चाकाशस्यारम्भकत्वानुपपत्तिरिति

---

१. *Brih.* 3. 3. 2. २. See Notes. ३. °मृदो° P.

वाच्यमारम्भवादस्यानङ्गीकारादेकस्यापि दुग्धावयविनो दध्यारम्भकत्वदर्शनात्। न च दुग्धावयवैरिव दध्यारभ्यत इति वाच्यम्। तथा सति दधिदुग्धयोर्गन्धरसादिवैषम्यं न स्याद्दुग्धस्येव सतः परिणामो दधीत्यभ्युपगमे स्याद्गन्धादिवैषम्यम्। स्पर्शशून्यमपि द्रव्यं यथा गुणारम्भकं दृष्टं तथा द्रव्यारम्भकमप्यस्तु। श्रुतिरपि शरीरस्य सङ्कीर्णद्रव्यारब्धतां श्रावयति—"अन्नमशितं त्रेधा विधीयत" इत्यादौ। याज्ञवल्क्योऽप्याह—

"पञ्च धातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुः"। इति।

वस्तुतस्तु पञ्चानां भूतानां पञ्चात्मकत्वस्य दर्शितत्वादारम्भवादस्य निराकृतत्वाच्च नात्रोदयनाद्युक्तदोषशङ्कावकाशोऽपीति गमयितव्यं तस्मात्सिद्धं शरीरं पाञ्चभौतिकमिति॥ १६॥

अत्रापीति स्पष्टार्थः। स्थूलसमष्ट्युपहितस्य चैतन्यस्य व्यपदेशभेदानाह—एतत्समष्ट्युपहितमिति। चकारात्पुरुषादिशब्दग्रहः। उच्यते। "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते", "सैषा विराडन्नादी", "पुरुष एवेदं" इत्यादिश्रुतिभिरिति शेषः। तत्र हेतूनाह—सर्वनरेति। सर्वशब्दो विश्वपदपर्यायः। विश्वनराभिमानित्वाद्वैश्वानरः। विविधं राजमानत्वाद्विराट्। चकारात्पूर्णत्वात्पुरुष इति च द्रष्टव्यम्। उपहितस्य व्यपदेशानुक्त्वोपाधेरपि तानाह—अस्येषेति। "अन्नं वै विराट्" इतिश्रुतेरन्नविकारत्वम्। स्थूलभोगोऽतिस्पष्टो भोगः। एवं समष्टिस्थूलतदुपहितचैतन्ययोर्व्यपदेशभेदं दर्शयित्वा व्यष्टिस्थूलतदुपहितयोरपि तमाह—एतद्व्यष्टीति। व्यष्टिस्थूलशरीरोपहितस्य विश्वशब्दवाच्यत्वे हेतुमाह—सूक्ष्म° इति। सूक्ष्मशरीरं कारणशरीरं तदपरित्यज्य स्थूलशरीरादौ तदपेक्षया स्थूलशरीरं लिङ्गशरीरं तदादिर्यस्य परमस्थूलशरीरस्येति तेनद्वुणसंविज्ञानो बहुव्रीहिस्तस्मिन्प्रवेष्टृत्वात्। तथा हि जीवस्य त्रय उपाधयः। सुषुप्त्यादौ बुद्ध्यादिसंस्कारोपरञ्जितमज्ञानमात्रमुपाधिः। स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः। जाग्रदवस्थायां तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिः। तथा च पूर्वपूर्वोपाधिविशिष्टस्यैवोत्तरोत्तरोपाधिप्रवेशात्सर्वशरीरप्रवेष्टृत्वेन स्थूलभोगायतनाभिमानिनो विश्व इति संज्ञेति। यद्वा सूक्ष्मशरीरं लिङ्गशरीरं तदपरित्यज्य स्थूलशरीरं विराड्व्यष्टिस्तदादिर्यासां चक्षुरादिवृत्तीनां तत्तद्विषयाकाराणां च तत्प्रवेष्टृत्वादिति हेतुयोजना। स्थूलशरीरमपरित्यज्येति क्वचि-

---

१. *Pañchadas'ī* xiii. 6, 7. See Notes. २. *Chhā.* 6. 5. 1. ३. *Yājnyavalkyasmṛiti* 3. 72. ४. Udayanāchārya, a Naiyāyika. ५. *Chhā.* 5. 18. 1. ६. *Idem.* 4. 3. 8. ७. *S'vet.* 3. 15. ८. *Tait. Brāhmaṇa* 1. 6. 3. 4. (omits वै). ९. See Notes.

त्पाठे स्थूलशरीरे वर्तमानस्यैव सूक्ष्मशरीरकारणशरीरयोरप्यनुगतत्वादिति हेत्वर्थोऽनुसन्धेयः । सर्वथा विश्वशरीरवर्तित्वाद्विश्व इत्युक्तं भवतीति भावः । अस्यापीति पूर्ववत् । एषेति व्यष्टिरुच्यते । पूर्ववद्विश्वैश्वानरयोरपि जाग्रत्स्थित्यवस्थापन्नं भोगविशेषं सप्रकारं प्रपञ्चयति—तदानीमित्यादिना । दिगादिपञ्चदेवतानियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन यथापाठक्रमं शब्दादिगन्धान्तान्स्थूलविषयाननुभवत इति प्रत्येकं योजनीयम् । अग्न्यादिदेवतापञ्चकनियन्त्रितेन वागादिपञ्चकेन वचनाद्यानन्दान्तांस्तथा चन्द्रादिदेवताचतुष्टयनियन्त्रितेन मनआदिचतुष्केण सङ्कल्पादिचैत्यान्तांश्चतुरः । सर्वानेतानिति । यथायथं यथोक्तक्रमानुरोधेन सर्वानेतान्स्थूलभोगान्विषयाननुभवत इत्यर्थः । अत्रापि प्रमाणमाह—जागरित° इति । आदिशब्दात् "स्थूलभुग्वैश्वानर" इति वाक्यशेषग्रहः ॥

इदमत्र बोद्धव्यम् । जाग्रदवस्थायां हि प्रमातृप्रमाणप्रमेयव्यवहारा भवन्ति तत्र प्रमाणैर्योऽर्थं प्रमिणोति स प्रमाता येन प्रमिणोति तत्प्रमाणं यत्प्रमीयते तत्प्रमेयमिति सर्वतन्त्रसिद्धान्तैः[1] । तत्र यः प्रमाता जीवश्चेतनः स विषयं प्रमिण्वन् कया प्रत्यासत्त्या प्रमिणोतीति विचारणीयम् । आत्ममनइन्द्रियविषयाणां क्रमेण संयोगपरम्परयेति चेन्न । विषयसंयुक्तसंयुक्तेष्वपि संयोगपरम्परया युगपत्सर्वावभासप्रसङ्गात् । यावदिन्द्रियसम्बन्धस्तावदेव हि भासत इति नातिप्रसङ्ग इति चेन्नेन्द्रियसन्निकर्षस्यापीयत्तानवधारणात् । इन्द्रियसन्निकर्षानन्तरं योऽर्थः स्फुरति तावन्मात्रं सन्निकृष्यत इति चेन्न । इन्द्रियसन्निकर्षस्येयत्तावधारणात्स्फुरणस्य विषयनियमस्तस्मिन्सतीन्द्रियसन्निकर्षेयत्तावधारणमिति परस्पराश्रयात् । किञ्चोक्तसन्निकर्षस्य ज्ञानोत्पत्तिमात्रे कृतत्वात्तदनन्तरं तस्यावस्थाने कल्पकाभावान्न ज्ञानस्य विषयेण सह सम्बन्धः स्यात् । तथा च मयेदं विदितमिति स्वात्मनि सम्बन्धानुसन्धानाभावप्रसङ्गः । न चाश्रयद्वारा सम्बन्ध इति वाच्यं; ज्ञानस्य सर्वगतात्माश्रयत्वे युगपत्सर्वविषयसम्बन्धात्सर्वावभासप्रसङ्गः । देहावच्छिन्नात्मप्रदेशाश्रितत्वे देहस्य बाह्यविषयासम्बन्धान्न बाह्यं किञ्चिदपि भायात् । ननु सम्बन्धाभावेऽपि ज्ञानज्ञेययोरुद्दिष्टे विषये ज्ञानमतिशयं जनयतीति नाव्यवस्थेति चेन्नानुद्दिष्टेष्वपि दुर्गन्धादिषु ज्ञानकृतातिशयदर्शनात् । अदृष्टवशात्किञ्चिदेव भासत इति चेन्न । तस्य दृष्टसामग्रीसम्पादकत्वेनान्यथासिद्धत्वादगतिकत्वाच्च । तस्मान्न किञ्चिदेतत् । अतो वक्तव्या जीवस्य विषयग्रहणव्यवहारे व्यवस्थेति । तदुच्यते । न तावदस्मन्मतेऽनुपपत्तिरस्ति यतो जीवस्य सर्वगतत्वासर्वगत-

---

१. So NQ; चेत्या° MR; चित्ता° P. २. *Māṇḍū.* 3. ३. See अधिकरणसिद्धान्तन्याय in *Maxims* iii.

त्वपक्षयोरप्यन्तःकरणकृता व्यवस्था सम्भवति । तथाह्यपरिच्छिन्नपक्षे तावदन्तःकरणमेव मनोबुद्ध्यादिशब्दवाच्यं प्रमातृत्वादिव्यवहारापादकम् । यतोऽविद्यावृततया सर्वत्राप्रकाशमानमप्यात्मचैतन्यमन्तःकरणसंसृष्टं सदवभासते दर्पणद्रव्यसंसृष्टरविरश्मिवत् । तच्चान्तःकरणमदृष्टादिसहायं विषयसंवेदनवेलायां तडागकुल्याक्षेत्रगतोदकप्रवाहवद्देहतद्बाह्यदेशतद्गतविषयानभिव्याप्यावतिष्ठते । तत्र च तिसृष्वप्यवस्थास्वात्मचैतन्यं तदात्मनैवाभिव्यज्यते । तत्र देहमध्यान्तःकरणभागावच्छिन्नं चैतन्यं प्रमातृसंज्ञां लभते । देहविषययोर्मध्ये दीर्घप्रभाकारेणेन्द्रियद्वारा निर्गतान्तःकरणभागावच्छिन्नं प्रमाणसंज्ञाम् । विषयमभिव्याप्य विषयाकारतयावस्थितान्तःकरणभागावच्छिन्नं प्रमेयसंज्ञाम् । इति प्रमातृप्रमाणप्रमेयव्यवस्थोपपत्तिः । एवमभ्युपगमे येन विषयेण सहेन्द्रियस्य सन्निकर्षो दूरे वान्तिके वावतिष्ठमानेन तत्रैव तदाकारमेवान्तःकरणं परिणमते नान्यत्र नान्याकारमिति च लभ्यते । तदनुरक्तचैतन्यात्मनश्चैकत्वान्मयेदं विदितमिति सम्बन्धावभासश्चोपपद्यते नान्यथा । परिच्छिन्नात्मपक्षेऽपि जीवत्वोपाध्यन्तःकरणस्य पूर्वोक्तप्रकारेणावस्थाभेदसम्भवे उपाध्यनुगामित्वादुपहितस्य स्वोपाध्यन्तःकरणं यद्यदात्मनावतिष्ठते तत्तदात्मना प्रत्यगात्मचैतन्यमप्यवभासमानं ग्राह्यग्रहणग्राहकभेदव्यवस्थामनुभवत्यग्निरिवायःपिण्डादिसमारूढ इत्यनवद्यम् । न चेयं कल्पना तार्किककल्पनावत्पुरुषबुद्ध्युत्प्रेक्षामूला किन्तु श्रुतिमूला । तथा च श्रुतयः—"[1]स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव [2]सैधीः स्वप्नो भूत्वैवं लोकमतिक्रामति", "[3]नवद्वारे पुरे देही हंसो लेलायते बहिः", "[4]आसीनो दूरं व्रजति", "[5]मनोमयो विज्ञानमय" इत्यादयः । उक्तं च भगवत्पादैः सर्वश्रुत्यर्थसङ्ग्रहे [6]दक्षिणामूर्तिस्तोत्रे—

"नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये" ॥

युक्तिरपि मनसो बाह्यविषयदेशगमनाभावे इन्द्रियसन्निकर्षपरम्परया देहान्तरे च विषयाकारतास्वीकारे बहिरेतावति दूरेयं विषयो मयोपलब्ध

---

१. See Notes. २. *Bṛih.* 4. 3. 7. ३. This is the reading of the Mādhyandina recension. The Kāṇva has स हि. ४. *Śvet.* 3. 18. ५. *Kaṭha.* 2. 21. ६. *Bṛih.* 4. 4. 5. ७. Verse 4. See बहुछिद्रघटप्रदीपन्याय in *Maxims* ii (2nd edn.).

इति प्रतिसन्धानं न स्यात्। अनेकायामविस्तीर्णदेशतन्निष्ठरथगजाद्याकारभावस्यान्तर्हृदयेऽनुपपत्तेः। न च स्वप्नवदुपपद्यत इति वाच्यं; स्वप्नस्य मायामयस्योक्तत्वात्। जाग्रदपि मायामयमेवेति चेत्सत्यं तथापि स्वप्नाद्यवहारभेदसिद्धये तयोः कियदप्यस्ति वैषम्यं सति प्रमातरि बाध्यमानत्वाबाध्यमानत्वाभिमानादिलक्षणम्। नन्वखण्डब्रह्माकारा वृत्तिरन्तरेव जायत इति चेद्दृढं सा हि देहाद्यावरणमुपमर्दयन्ती जायते बाह्यविषया तु नैवमिति वैषम्यं स्यात्। किञ्च यदि विषयेन्द्रियसम्बन्धमात्रमन्तःकरणस्य विषयाकारताहेतुस्तदा दूरवर्तिविषयगतपरिमाणरूपसंख्यादीनामपि तदाकाराकारितेऽन्तःकरणे यथावदवभासप्रसङ्गः। न च दूरलक्षणाद्दोषात्तथा नावभासत इति वाच्यम्। तस्येन्द्रियसम्बन्धमात्रे प्रतिबन्धकत्वाभावात्। ननु तवापीन्द्रियसंसृष्टाकारता मनस इति स्थिते कथं दूरस्थविषयेयत्ताद्याकारता मनसो न भवेदिति चेन्मैवं मम तु मनसो बहिर्[1]स्वातन्त्र्याद्यावद्धिरवयवैरवयविभिर्वा चक्षुःसन्निकर्षस्तावन्मात्राकारमेव मनः परिणमत इति श्लिष्यते। तव तु पदार्थसन्निकृष्टेन्द्रिये सति तद्गतभूयस्त्वाल्पत्वदृढत्वादृढत्वविशेषानादरेऽप्यन्तस्तदाकारवृत्त्युदयोपपत्तेर्विषयेयत्तादेरपि स्फुरणं प्रसज्येतेति वैषम्यात्तस्मादस्ति प्रत्यक्षव्यवहारे बाह्यमनोवृत्तिर्विषयाकारेति स्थितम्। परोक्षव्यवहारे तु विशिष्टशब्दलिङ्गादिबलनिबन्धनात्तत्तदर्थाकारा धीरन्तरेव समुन्मिषति विषयसत्तामात्रस्यैव तत्र स्फुरणात्[2]तद्गतविशेषादेरस्फुरणाच्चेति दिक्। तथा च स्वप्नावस्थायामात्मा बुद्ध्युपाधिः स्वप्नदर्शनहेतुकर्मक्षये जागरितमागच्छन्पूर्वगृहीतेषु करणेषु पुनः स्वस्वगोलकस्थानेषु तयैव बुद्ध्या प्रसारितेषु सत्सु स्वयं तद्बुद्ध्यनुगतस्तत्तद्गोलकादिदेशं गच्छन्स्वोपाध्यन्तःकरणेन्द्रियसचिवस्तत्तदिन्द्रियविषयाननुमेयांश्च स्थूलान् व्यावहारिकान्पदार्थाननुभवति। तदिदमस्य जागरितम्। तदुक्तं[3]—"इन्द्रियैरर्थोपलब्धिर्जागरितं" इति। अयमेव विश्ववैश्वानरात्मनः स्थूलभोग इति। अत्राप्यनयोः स्थूल° इत्यादि पूर्ववत्। स्थूलप्रपञ्चाध्यासं सावस्थमुपपादितमुपसंहरति—एवमिति ॥ १७ ॥

उक्तं प्रपञ्चत्रयं तदुपहितचैतन्यत्रयं च पूर्ववत्सदृष्टान्तमेकीभावमापादयति—एषामित्यारभ्य आभ्यामित्यतः प्राक्तनेन ग्रन्थेन। स्पष्टार्थोऽयं ग्रन्थः। फलितमाह—आभ्यामिति। तत्पदार्थविषयमध्यारोपमुपसंहरति—एवमिति ॥ १८ ॥

---

१. See परतन्त्रं बहिर्मनः in *Maxims* iii. So PQR; but MN. २. तद्गतविषया°. ३. S'ankara's *Pañchīkaraṇa*; See Notes.

अधुना त्वम्पदार्थविषयमध्यारोपं बहुवादिमतोपन्यासेन दर्शयति—इदानीमिति । तत्रारुन्धतीप्रदर्शनन्यायेन मुञ्जादिषीकाग्रहणन्यायेन[1] वा प्रत्यञ्चं देहादिविविक्तं चिदेकतानमात्मानं दिदर्शयिषुरतिमूढमतेर्मतं तावदाह—अतिप्राकृत इति । अतिप्राकृतस्तु पुत्र आत्मेति वदतीत्यन्वयः । कुत इत्यपेक्षायां श्रुतियुक्त्यनुभवाभासान् क्रमेण प्रमाणयति—आत्मा वेत्यादिना । स्वस्मिन्निवेति युक्तिकीर्तनं लोके हि पुत्रिण इष्टमिष्टं खाद्यादि स्वात्मवचनेनापि पुत्रेषु समर्पयन्तस्तेषु परमप्रेम कुर्वन्तस्तेषामात्मत्वमेव प्रकटयन्तीति भावः । पुत्रे नष्ट इत्याद्यनुभवोक्तिः ॥

मतान्तरमाह—चार्वाक इति । स्थूलशरीरमात्मेति वदन्तीत्यन्वयः । अत्रापि श्रुत्यादिप्रमाणं वदन्प्रागुपन्यस्तपक्षे दूषणं सूचयति—स वा एष इत्यादिना । एवमेवोत्तरेष्वपि पक्षेषु प्रमाणादिग्रन्थोत्थानं द्रष्टव्यम् । स वै य ओषधीनां रेतोरूपेण परिणतानां परिणामः प्रसिद्ध एव प्रत्यक्षपुरुषः शिरःपाण्याद्यात्मकोऽन्नरसमयोऽन्नरसविकारोऽन्नरसेनैवोपचीयमानत्वादिति श्रुतेरर्थः । इह पुरुषशब्दस्य लोक आत्मनि प्रयोगात्तस्य च श्रुतावन्नरसमये देहे प्रयुक्तत्वादेह आत्मेति गम्यत इत्यभिप्रायः । परमप्रेमगोचरत्वमात्मन्येव विश्रान्तमितरस्य सर्वस्यापि तच्छेषत्वेनैव प्रियत्वात् । "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इति श्रुतेश्च । सा च प्रीतिः पुत्रादपि देहेऽधिकतरा निरतिशया च दृष्टा । अन्यथा दह्यमाने गृहादौ हन्तृषु चोपस्थितेषु पुत्रं परित्यज्य स्वस्य पलायनानुपपत्तेरिति युक्त्यर्थः । अहम्प्रत्यय आत्मानमवगाहत इति सर्ववादिनामविवादः । स च कृशोऽहमित्यादिना देहावलम्बनोऽनुभूयतेऽतो देह एवात्मेत्यर्थः ॥

लोकायतानां चार्वाकविशेषाणां मतभेदानाह—अपरश्चार्वाक इत्यादिना बौद्धस्त्वित्यतः प्राक्तनेन ग्रन्थेन । अन्वयादि पूर्ववत् । प्राणानां वागादीनां प्रजापतिगमनं तं प्रति प्रश्नकरणं चाचेतनत्वे न सम्भवतीत्यनुपपत्त्या तेषां चैतन्यमवश्यम्भावीति श्रुतार्थापत्तिरिह मानं न श्रुतिरेवेति द्रष्टव्यम्[2]। इन्द्रियाणामभावे उपरमे स्वापादौ देहचलनस्य चैतन्यकार्यस्यादर्शनात्तदनुपरमे च तद्दर्शनादन्वयव्यतिरेकाभ्यामिन्द्रियाण्येव चेतनानि न देह इति निश्चीयते । न च तेषां करणत्वेनापि ज्ञानान्वयव्यतिरेकोपपत्तौ तदाश्रयत्वकल्पनमयुक्तमिति वाच्यमाश्रयसिद्ध्युत्तरकालीनत्वात्करणत्वकल्पनायास्तस्य चाश्रयत्वस्य देहेऽद्याप्यसिद्धेर्नान्यथोपपत्तिः । अत इन्द्रियाण्येवात्मानः

---

१. See Notes. २. Ditto. ३. *Bṛih.* 1. 4. 8.

करणत्वादेश्चाहमालम्बनत्वमबाधितम् । देहे तु ममप्रत्ययबाधितत्वान्नात्मेति भावः ॥

मुख्यप्राणात्मवादिमतमुत्थापयति—अपर इति । अन्योऽन्नमयादात्मन इति योजना । स चान्नमयादन्तरोऽभ्यन्तर इत्यर्थः । प्राणाभावे प्राणस्य स्वस्थितिनिबन्धनान्नाद्यलाभेन कृशीभावे सतीन्द्रियाणां विद्यमानानामपि स्वस्वविषये प्रवृत्त्यदर्शनात्सति च तस्मिन्पुष्टे तदर्शनात्प्राण एवात्मा न प्राणाधीनस्थितिकानीन्द्रियाणीति । इन्द्रियाणां चैतन्यान्वयव्यतिरेकः करणत्वेनाप्युपपद्यत एव । तेषामेव कर्तृत्वे करणाभावप्रसङ्गः । किञ्चैकस्मिञ्छरीरे इन्द्रियाणां सम्भूय भोक्तृत्वं प्रत्येकं वा । द्वितीयेऽपि युगपत्क्रमेण वा । नाद्यः । रूपादौ चक्षुरादिभोग्ये जिह्वादीनां भोक्तृत्वादर्शनात् । न हि सम्भूयेन्द्रियाण्येकं कार्यं निर्वर्तयन्ति । तेषां प्रतिनियतासाधारणविषयभेदस्यान्वयव्यतिरेकसिद्धत्वात् । न द्वितीयः । उक्तेन प्रकारेण योगपद्यासम्भवात् । प्रत्येकं क्रमेण भोक्तृणीन्द्रियाणीति तृतीयेऽपि पक्षे तेषां प्रत्येकं स्वातन्त्र्ये कदाचिदनैकमत्ये सति विरुद्धादिक्रियैस्तैरधिष्ठितं शरीरं विदीर्येत । अस्वातन्त्र्ये यदधीनत्वं तेषां तस्यैवात्मत्वं युक्तं स्वामिभृत्यन्यायस्य शरीरैक्येऽनुपपत्तेः । प्राण एव तु मुख्यः सर्वेषामिन्द्रियाणामाश्रय इति युक्तमतः स एवात्मा स्वापप्रबोधयोरविच्छिन्नस्वभावः । प्रत्येकमिन्द्रियाणामात्मत्वेऽन्यदृष्टेऽन्यस्मरणानुपपत्तेरिह च यश्चक्षुषा रूपमद्राक्षं स इदानीं गन्धं जिघ्रामीति प्रत्यभिज्ञा दृश्यते । तस्मान्नेन्द्रियाण्यात्मान इति भावः । अशनायापिपासयोश्च प्राणधर्मत्वं प्रसिद्धमन्नपानयोरलाभे प्राणविच्छेददर्शनात् । तादृग्धर्मकश्च प्राणोऽहम्प्रत्ययविषय इति प्राण आत्मेत्यनुभव इत्यर्थः ॥

मनआत्मवादिमतमुत्थापयति—अन्य इति । प्राणमयादन्योऽन्तर आत्मेति यावत् । मनसि सुप्ते विलीने प्राणादेरभावाद्वृतिवच्छ्वासोच्छ्वासदर्शनस्य द्रष्टृदृष्ट्यध्यारोपितत्वादिन्द्रियाभावेऽपि स्वप्नस्मृत्योर्मनसि सम्प्रतिपत्तेर्मन एवात्मेत्यर्थः । यद्वा प्राणादेरभावादिति तद्व्यापारोपरमे सुषुप्त्यादौ तस्याभावमुपचर्यैदमुच्यते । तथा चेन्द्रियेषूपसंहृतव्यापारेषु प्राणे चोपसंहृतप्राणनापाननेतरवृत्तौ मनसैव केवलेन स्वप्नादेरुपलम्भान्मन एवात्मेत्यर्थः । मनसश्च सङ्कल्पादिधर्मवत्त्वं प्रसिद्धमित्यनुभवोक्तिः स्पष्टार्था ।

योगाचारमतमुत्थापयति—बौद्ध इति । मनोमयादन्योऽन्तरोऽभ्यन्तर

---

१. कारण° N. P. २. Contrast with this *Nyāyamañjarī*, p. 556, line 8:—"संभूय कारकैः कार्यमारभ्यत इति न्यायात्". ३. See Notes. ४. See Notes.

आत्मा विज्ञानमयः क्षणिकविज्ञानमय इति बौद्धाभिप्रायः । बुद्धिः क्षणिकविज्ञानमात्मेत्यत्रानुभवमाह—अहं कर्तेति । मनस एव कर्तृत्वं स्यात्किं विज्ञानेनेत्याशङ्क्य मनसः करणपक्षपातित्वान्न कर्त्रनुभवगोचरत्वमित्यभिप्रेत्य युक्तिमाह—कर्तुरभाव इति । मनसः कर्तृत्वे सर्वेन्द्रियाणां स्वस्वविषयैर्युगपत्सम्बन्धे युगपज्ज्ञानोदयप्रसङ्गः । कर्तुर्मनसः सर्वैरिन्द्रियैरधिष्ठातृत्वेन युगपत्सन्निहितत्वादपेक्षणीयान्तरानभ्युपगमाच्च । न चैवं दृश्यते तस्मान्मनसोऽन्यः कर्ता । मनस्तु विज्ञानक्रमहेतुः साधारणं करणमेवेत्यर्थः । एवं वेदबाह्यवादानुपन्यस्य विज्ञानमयकोशपर्यन्तमात्मनः प्रत्यक्त्वमवगमितम् । न च क्षणिकविज्ञानस्यैवात्मत्वमध्यवसातुं शक्यं ज्ञानेच्छाप्रयत्नसंस्कारस्मृतीनामेकाश्रयत्वनियमात्तेषां च क्रमिकत्वात्क्षणिकविज्ञानाश्रयत्वानुपपत्तेः । ज्ञानादीनामेकाश्रयत्वाभावे तु वस्तुनि दृष्टे पूर्वदृष्टसजातीयत्वादिलिङ्गवशादिष्टसाधनताद्यनुमानपूर्वकं प्रवृत्त्याद्यभावः प्रसज्येत । अन्यदृष्टेऽन्यस्मरणानुपपत्तेः । उक्तं च न्यायकुसुमाञ्जलौ[1]—

"नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ।
वासनासंक्रमो नास्ति न च मत्यन्तरं स्थिरे" इति ।

क्षणिकपक्षे बन्धमोक्षयोरपि वैयधिकरण्यमित्यादिबहुदुष्टत्वादनादरणीयः क्षणिकविज्ञानात्मपक्ष इत्यभिप्रेत्य वेदवादिपक्षमाश्रित्य विज्ञानादप्यन्तरमात्मानं निर्दिधारयिषुस्तावत्तत्रापि स्थूलदर्शिमतभेदमाह—प्राभाकर° इत्यादिना । प्राभाकरतार्किकावज्ञानमात्मेति वदत इत्यन्वयः । अज्ञानं क्षणिकविज्ञानादन्यत्तदधिकरणं द्रव्यरूपमात्मतत्त्वमिति वदत इत्यर्थः । विज्ञानमयादप्यन्तरे आत्मनि श्रुतिं प्रमाणयति—अन्योऽन्तर आत्मेति । विज्ञानमयादानन्दमयोऽन्य इति यावत् । न चानन्दमयः परमात्मेति त्वम्पदार्थमध्ये न तस्योदाहरणं युक्तमिति वाच्यम् । अन्नमयादिविकारप्रायपठितमयट्श्रुतिविरोधात्प्रियशिरस्त्वादिवचनविरोधाच्च । एतच्च भाष्यकारैः "आनन्दमयोऽभ्यासात्" इत्यस्मिन्नधिकरणे निर्णीतम् । तस्माद्युक्तमेव त्वम्पदार्थमध्य आनन्दमयश्रुत्युदाहरणमिति द्रष्टव्यम् । सुषुप्तौ बुद्ध्यादीनां ज्ञानसुखदुःखेच्छादीनामज्ञाने ज्ञानभिन्न आत्मनि लयदर्शनादभावदर्शनान्न ज्ञानमात्मेति युक्तिमाह—बुद्ध्यादीनामिति । सर्वज्ञानाभावस्य सुषुप्तौ सम्प्रतिपन्नत्वात्सुषुप्तिजागरितयोरप्यात्मैक्यप्रत्यभिज्ञानान्न ज्ञानमात्मा किन्तु तदन्य

---

१. *Stavaka* 1. 15. *Maxims* ii (2nd edn.). २. See *Tait.* 2. 5 ("तस्य प्रियमेव शिरः"), and Bhāṣya on the sūtra quoted below. ३. *Brahmasūtra* 1. 1. 12.

एवेति भावः । अनुभवमाह—अहमज्ञ इति । अहमज्ञो ज्ञानहीनोऽहं ज्ञानी ज्ञानवानित्यनुभवोऽपि ज्ञानात्मनोर्धर्मधर्मिभावेन भेदं द्रढयतीत्यर्थः ॥

मतान्तरमाह—भाट्ट इति । भाट्टस्वज्ञानोपहितं चैतन्यमात्मेति वदतीत्यन्वयः । अज्ञानोपहितत्वमज्ञानसंवलितत्वं ज्ञानाज्ञानरूपत्वं तदपि द्रव्यबोधरूपत्वमिति यावत् । तत्र माण्डूक्यश्रुतिं प्रमाणयति—प्रज्ञानघन इति । प्रज्ञानघनः प्रज्ञानैकरसः । एवकारेण रसान्तरसम्बन्धं वारयति । आनन्दमय इत्यानन्दप्रचुरो नानन्दविकारः । प्राचुर्यार्थे मयडन्तनिर्देशादीषदानन्दस्वभावतापि द्रव्यांशकृतात्मनि गम्यत इति भावः । युक्तिमाह—सुषुप्ताविति । सुषुप्तौ प्रकाशाभावे सुषुप्तिरसाक्षिकेति सुखमहमस्वाप्समित्युत्थितस्य परामर्शो न स्यान्न तदेन्द्रियमनसां व्यापारोऽस्ति येन तज्जन्यज्ञानेनापि तत्परामर्शः स्यात् । नाप्यविद्या प्रकाशिका जडत्वात् । परिशेषादात्मैव बोधांशः प्रकाशक इति प्रकाशसद्भावसिद्धिः । न किञ्चिदवेदिषमिति परामर्शादात्मन्येव सुषुप्तावशेषविज्ञानाभाववत्त्वमपि कल्प्यतेऽतस्तत्राप्रकाशो द्रव्यांशश्चास्तीति भावः । ननु सुषुप्तावेवात्मनो ज्ञानाज्ञानरूपत्वं नावस्थान्तर इत्याशङ्क्यानुभवाभिनयेन प्रत्याचष्टे—मामहमिति । अहमित्यात्मनि कर्तरि भासमानेऽपि मां न जानामीत्यनुपसंहृतविशेषस्य तस्यैव कर्मत्वमपि तस्मिन्नेव ज्ञाने भासत इत्यवस्थान्तरेऽपि द्व्यात्मक आत्मेत्यभिप्रायः । ज्ञानस्यात्मधर्मत्वेऽपि न ततोऽत्यन्तभेदस्तादात्म्याङ्गीकारात् । समवायस्य च समवायिभ्यां सह सम्बद्धत्वासम्बद्धत्वविकल्पासहत्वेनाप्रामाणिकत्वादिति भावः ॥

माध्यमिकमतमुत्थापयति—अपरो बौद्ध इति । इदं नामरूपात्मकं जगदग्रे सृष्टेः प्राक्कालेऽसच्छून्यमेवासीदिति बौद्धाभिप्रायेण श्रुतेरर्थः । युक्तिमाह—सुषुप्ताविति । तामेव स्वानुभवोपन्यासेन द्रढयति—अहमिति । अतः शून्यमात्मा सर्वाभावरूपो न द्रव्यबोधात्मक इति भावः ॥ १९ ॥

एवं प्रत्यगात्मत्वाधिष्ठानं मतभेदेनोपन्यस्तं दूषयितुमारभते—एतेषामिति । तत्र तावत्पूर्वपूर्ववादिमतमुत्तरोत्तरवादिमतेन दूषितमिति पुत्रादिशून्यपर्यन्तस्यानात्मत्वं तैरेव वादिभिः स्फुटीकृतमित्याह—एतैरिति । ननु कथं वावदूकविवाददर्शनमात्रेण पुत्रादीनां शून्यपर्यन्तानामनात्मत्वमवधारयितुं शक्यते श्रुतियुक्त्यनुभवानां प्रत्येकमुपन्यस्तत्वादित्याशङ्क्य सत्यमुपन्यस्तास्तैः श्रुत्यादयः किन्तु ते सर्व एवाभासाः पुत्रादिशून्यपर्यन्तातिरिक्तप्रत्यगात्मस्वरूपसमर्पकप्रबलश्रुतियुक्त्यनुभवविरोधादित्याह—किञ्चेति । न केवलं परस्परविगीतत्वादेव पुत्रादीनामनात्मत्वं किन्तु प्रबलश्रुत्यादिभिः

---

1. *Pāṇini.* 5. 4. 21.

पूर्वेषां श्रुत्यादीनां बाधितत्वादपीति योजना । तत्र "आत्मा वै पुत्रनामासि" इतिश्रुतेः प्रत्यक्[1]श्रुत्या बाधः । प्रत्यक्त्वं नाम सर्वान्तरत्वम् । "स वा एष पुरुषोऽन्नरसमय" इतिश्रुतेरस्थूलश्रुत्या बाधः । "ते ह प्राणाः प्रजापतिं" इत्यादिश्रुतिसामर्थ्यसिद्धेन्द्रियात्मत्वस्याचक्षुरित्यादिना बाधः । "अन्योऽन्तर आत्मा प्राणमयः", "अन्योऽन्तर आत्मा मनोमय" इत्यनयोरप्राणोऽमना इत्याभ्यां बाधः । "अन्योऽन्तर आत्मा विज्ञानमय" इत्यस्याः श्रुतेरकर्तेत्यनेन बाधः । "अन्योऽन्तर आत्मानन्दमय" इत्यस्याश्चैतन्यमित्यनेन बाधः । "प्रज्ञानघन एवानन्दमय" इत्यस्याश्चिन्मात्रमित्यनेन बाधः । "असदेवेदं" इत्यस्याः सदित्यनेन बाध इति प्रत्येकं योजनीयम् । अत्रोदाहृतश्रुतीनामित्थमक्षरविन्यासाः क्रमेण द्रष्टव्याः । "कश्चिद्धीरः प्रत्यगात्मानमैक्षत्", "अस्थूलमनण्वह्रस्वमदीर्घम्", "अचक्षुःश्रोत्रं तदपाणिपादम्", "अप्राणो ह्यमनाः शुभ्रः", "अनन्तश्चात्मा विश्वरूपो ह्यकर्ता", "न चास्ति वेत्ता मम चित्सदाहम्", "चिन्मात्रोऽहं सदाशिवः", "सदेव सोम्येदमग्र आसीत्", "सत्यं स आत्मा" इति ॥ आदिशब्दात् "एष स आत्मा सर्वान्तरः", "अशरीरं शरीरेषु", "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः", "केन प्राणः प्रथमः प्रैति युक्तः", "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह", "न करोति न लिप्यते", "साक्षी चेता केवलो निर्गुणश्च", "कृत्स्नः प्रज्ञानघन एव", "सन्तमेनं ततो विदुः" इत्याद्याः श्रुतयः संगृह्यन्ते ॥

इदमत्रानुसन्धेयम् । पुत्रात्मश्रुतिस्तु देहावलम्बिनीति तस्या गौणार्थत्वं स्पष्टमेव । "ते ह प्राणा" इतिश्रुतिरर्थवादत्वान्न स्वार्थपरा । अन्नमयाद्यानन्दमयान्तश्रुतेर्मुञ्जादिषीकावत्सर्वान्तरब्रह्मपुच्छशब्दवाच्यात्मप्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वान्न तस्याः स्वार्थपरत्वम् । प्रत्यगादीनां सिद्धान्त्युपन्यस्तश्रुतिवचनानां तु वक्ष्यमाणोपक्रमादिलिङ्गैरात्मयाथात्म्यपरत्वमिति युक्तं प्राबल्यमिति ॥

---

१. For this and the other S'rutis here referred to, see below. २. *Kaṭha* 4. 1. ३. *Bṛih.* 3. 8. 8. ४. *Muṇḍ.* 1. 1. 6. ५. *Idem.* 2. 1. 2. ६. *S'vet.* 1. 9. ७. *Kaivalya* 21. ८. *Idem.* 18. ९. *Chhā.* 6. 2. 1. १०. *Idem.* 6. 8. 7. ११. *Bṛih.* 3. 4. 1. १२. *Kaṭha* 2. 22. १३. *Bṛih.* 4. 4. 18. १४. MNR. insert here with the Mādhyandina recension, अन्नस्यान्नं. १५. *Kena* 1. १६. *Tait.* 2. 4. 1. १७. *Gītā* xiii. 31. १८. *S'vet.* 6. 11. १९. *Bṛih.* 4. 5. 13. २०. *Tait.* 2. 6. 1. २१. प्रत्यक्त्वा° NQR.

पुत्रादिशून्यपर्यन्तं न नित्यं जडत्वाद्घटादिवत् । नित्यश्चात्मा तदनित्यत्वेऽकृताभ्यागमकृतविनाशप्रसङ्गात् । अतो न पुत्रादीनामात्मत्वमिति युक्तिमाह—अस्येति । जडत्वमुपपादयति—चैतन्यभास्यत्वेनेति । न चात्मनोऽपि चैतन्यभास्यत्वं कर्मकर्तृभावविरोधात् । कर्तृत्वं हि क्रियां प्रति गुणभावः कर्मत्वं तु प्राधान्यम् । तथा चैकस्यां क्रियायामेकस्यात्मनो युगपद्विरुद्धधर्माश्रयत्वे वैरूप्यप्रसङ्गः । नापि ज्ञानाश्रयत्वेनात्मनो भावं सम्भवति । ज्ञानभिन्नस्य ज्ञानकर्मत्वेनैवापरोक्षत्वनियमात् । नापि नित्यानुमेयोऽसन्दिग्धत्वात् । न हि कदाचिदात्मन्यहमस्मि नास्मि वेति संदेहः कस्यचिद्दृश्यते । परिशेषात्स्वयम्प्रकाश इति न तस्य चैतन्यभास्यता । श्रुतयश्च भवन्ति स्वप्रकाशसाधिकाः परप्रकाश्यतानुमानविरोधिन्यः । "[१]न विज्ञातेर्विज्ञातारं विजानीयाः", "[२]विज्ञातारमरे केन विजानीयात्", "[३]अन्यदेव तद्विदितादथो अविदितादधि", "[४]अत्रायं पुरुषः स्वयंज्योतिः", "[५]आत्मैवास्य ज्योतिः", "[६]अप्राप्य मनसा सह", "[७]यन्मनसा न मनुते" इत्येवमाद्याः ॥

ननु न चायमात्माणुपरिमाणवांस्तथा सति सकलशरीरव्यापिचैतन्यानुपलम्भप्रसङ्गात् । नापि मध्यमपरिमाणो मध्यमपरिमाणवतः सावयवत्वेनानित्यत्वप्रसङ्गात् "[८]एवं चात्माकात्स्न्यं" इतिन्यायनिरस्तत्वाच्च । नापि परममहत्परिमाण उत्क्रान्तिगत्यागतिश्रुतिविरोधात् । अतः किम्परिमाणोऽयं प्रत्यगात्मेति । उच्यते । स्वतस्तावदखण्डब्रह्मात्मस्वभावत्वात् "[९]स वा एष महानज आत्मा" इत्यादिश्रुतेश्च परममहत्परिमाण एव । ब्रह्मात्मस्वभावत्वं चास्य प्रवेशश्रुतिभ्यः । "[१०]तत्सृष्ट्वा तदेवानुप्राविशत्" "[११]स एवमेव सीमानं, विदार्यैतया द्वारा प्रापद्यत", "[१२]स एष इह प्रविष्ट आनखाग्रेभ्यः", "[१३]अनेन जीवेनात्मनानुप्रविश्य", "[१४]सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते", "[१५]एको देवो बहुधा सन्निविष्टः", "[१६]यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा", "[१७]पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्", "[१८]रूपं रूपं प्रतिरूपो बभूव", "[१९]अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव" इत्येवमादिभ्यः ।

---

१. *Brih.* 3. 4. 2. २. *Idem.* 2. 4. 14. ३. *Kena* 3. ४. *Brih.* 4. 3. 9. ५. *Idem.* 4. 3. 6. ६. *Tait.* 2. 4. 1. ७. *Kena* 5. ८. *Brahmasūtra.* 2. 3. 34. ९. *Brih.* 4. 4. 22. १०. *Tait.* 2. 6. 1. ११. *Ait.* 3. 12. १२. *Brih.* 1. 4. 7. १३. *Chhā.* 6. 3. 2. १४. *T. Ar.* 3. 12. 7. १५. *Idem.* 3. 14. 1. १६. See Notes. १७. *Brih.* 2. 5. 18. १८. *Idem.* 19. १९. *Katha.* 5. 9.

"क्षेत्रज्ञं चापि मां विद्धि..... ॥"[1],
"अहमात्मा गुडाकेश सर्वभूताशयस्थितः ॥"[2],
"ममैवांशो जीवलोके जीवभूतः सनातनः" ॥[3]

इत्यादिस्मृतिभ्यश्च। संसारित्वावस्थायामेव तस्योपाधिनिबन्धनं परिच्छिन्नपरिमाणम्। तच्च यथोपाध्यनुरूपत्वादनियतम्। तथा च दर्शयति श्रुतिः—

"अङ्गुष्ठमात्रो रवितुल्यरूपः"[4],
"आराग्रमात्रो ह्यवरोऽपि दृष्टः" ॥[5],
"बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः....." ॥[6],
"नैव स्त्री न पुमानेष नैव चायं नपुंसकः।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते" ॥[7]

इत्यादिवचनैः। "स च प्रतिशरीरमभिन्न एव"[8], "एको देवो बहुधा सन्निविष्टः"[9], "एकं सद्विप्रा बहुधा वदन्ति"[10], "एकं सन्तं बहुधा कल्पयन्ति"[11], "त्वमेकोऽसि बहुतनुप्रविष्टः"[12], "इन्द्रस्यात्मानं शतधा चरन्तम्"[13], "एकः सन्बहुधा विचारः" इत्यादिश्रुतिशतेभ्यः। तस्माद्देहेन्द्रियप्राणमनोबुद्ध्यव्याकृतविलक्षणस्तत्साक्षी चिद्धातुः सद्रूपः प्रत्यगात्मेति निश्चितोऽर्थः।

अनुभवप्राबल्यं दर्शयति—अहमिति। "तं न[14] पश्यन्त्यकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति" इत्युपक्रम्य, प्राणाद्यात्मविज्ञानमकृत्स्नविषयतादोषेण निन्दित्वान्ते तु "आत्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति"[15] इति कृत्स्नात्मस्वभावं वेदितव्यं निर्दिश्य "तदेतत्[16]पदनीयस्य सर्वस्य यदयमात्मा" इति तदतिरिक्तस्य ज्ञातव्यस्यानवशेषं दर्शयन्ती श्रुतिस्तद्विज्ञानवत एव विद्वत्तां सूचयति। तथोत्तरत्रापि "तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेत्"[17] इत्याक्षिप्य "तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्"[18] इति च विद्वदनुभवत्वं ब्रह्मात्मज्ञानस्य दर्शयति। अत इतोऽर्वाक्षु देशेषु प्रत्यगात्मत्वाभिमानो भ्रान्तिरिति भावः। प्रत्यगात्मविषयाध्यारोपमुपसंहरति—अत इति। वेदान्तविद्वदनु-

---

१. *Gītā* xiii. 2. २. *Idem.* x. 20. ३. *Idem.* xv. 7. ४. *S'wet.* 5. 8. ५. *Idem.* ६. *Idem.* 5. 9. ७. *Idem.* 5. 10. ८. Untraceable. ९. *T. Ār.* 3. 14. 1. १०. *Rik.* 1. 164. 49. ११. *Idem.* 10. 114. 5. १२. *T. Ār.* 3. 14. 3. See Notes. १३. *Id.* 3. 11. 5. १४. *Id.* 3. 11. 1. See Notes. १५, १६, १७. *Brih.* 1. 4. 7. १८. *Idem.* 1. 4. 9. १९. *Idem.* 1. 4. 10.

भव इति विशेषणेन मतान्तरेऽनुभवस्य मूलप्रमाणशैथिल्यं सूचयति । अध्यारोपप्रकरणमुपसंहरति—एवमिति ॥ २० ॥

एवमध्यारोपं सप्रपञ्चं निरूप्यापवादमिदानीं निरूपयिष्यंस्तल्लक्षणमाह—अपवादो नामेति । कार्यस्य कारणमात्रसत्तावशेषणं कारणस्वरूपव्यतिरेकेण कार्यस्यासत्तावधारणं वापवाद इत्युक्तं भवति । एवंलक्षणोऽपवादः केन क्रमेणेत्यपेक्षायां "विपर्ययेण तु क्रमोऽत उपपद्यते च" इतिन्यायमाश्रित्योत्पत्तिक्रमवैपरीत्येनापवादं क्रमेण दर्शयति—तथाहीत्यादिना ।

प्रत्यक्षसिद्धं चतुर्विधभूतग्रामं चरमकार्यमङ्गुल्या निर्दिशति—एतद्भोगायतनमिति । द्वितीय एतच्छब्दोऽन्नादिविषयः । आदिशब्दः पानादिसङ्ग्रहार्थः । भूरादिचतुर्दशभुवनानि तृतीयैतच्छब्दार्थः । एतत्सर्वमित्यत्रैतच्छब्द उक्तसमस्तसङ्ग्रहार्थः । एतेषामित्यस्यापि स एवार्थः । उत्पत्तिव्युत्क्रमेणेत्यस्यायमर्थः । पृथिवी गन्धतन्मात्रात्मिका रसतन्मात्रात्मिकाम्मात्रं भवति । आपश्च ता रूपतन्मात्रात्मकतेजोमात्रं भवन्ति । तच्च तेजः स्पर्शतन्मात्रात्मकवायुमात्रं भवति । स च वायुः शब्दतन्मात्रात्मकाकाशमात्रं भवति । स चाकाशः स्वकारणभूताज्ञानोपहितचैतन्यमात्रं भवतीति । एतदाधारेत्यत्रैतच्छब्दोऽज्ञानतदुपहितचैतन्यविषयः । एतदाधारेत्यादिब्रह्मान्तानां पदानां कर्मधारयः । तथा च स्मृतिश्रुती भवतः—

"[1]जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ।
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते" ॥ इति,
"[2]पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" ॥ इति च ॥ २१ ॥

अध्यारोपापवादनिरूपणे फलितमाह—आभ्यामिति । ब्रह्मात्मचैतन्यस्याद्वितीयप्रत्यग्रूपतानिरूपणार्थत्वादध्यारोपादिप्रपञ्चस्य पदार्थशुद्धिरवान्तरफलमिति सूचयितुं पदार्थशोधनमपीत्युक्तम् । तत्त्वम्पदयोः प्रत्येकं द्विविधोऽर्थो वाच्यो लक्ष्यश्चेति । तदुभयं विभज्य दर्शयति—तथाहीत्यादिना । समष्ट्यज्ञानं तदुपहित ईश्वरस्तदुभयाश्रयमनुपहितं स्वमहिम्नि प्रतिष्ठितमक्षरशब्दवाच्यं चिन्मात्रमित्येतत्त्रयं तत्सायःपिण्डवदविविक्तं तत्पदवाच्यार्थ इत्यर्थः । आदिपदात्समष्टिहिरण्यगर्भविराजौ गृह्येते । तत्राज्ञानादिव्यष्टि-

---

१. *Brahmasūtra* 2. 3. 14. २. *Mahābhārata* 12 (chap. 341) 12893, 12895. The 3rd line, however, differs from the Mahābhārata. See Notes. ३. *Kaṭha.* 3. 11.

रित्यत्रादिपदात्सूक्ष्मशरीरं स्थूलशरीरं च गृह्यते। एतदनुपहितं प्रत्यक्चिति-मात्रम्। शेषं पूर्ववत्। उभयत्रापि यथायोगमव्याकृतं समष्टिस्वप्नजागरौ सुषुप्तिर्व्यष्टिस्वप्नजागरौ चेत्येवमवस्थात्रययुक्तमिति योजयितव्यम्। अज्ञान-तत्कार्यसमस्तप्रपञ्चेषु सत्तास्फूर्तिप्रदत्वेनानुस्यूतं चित्सदानन्दाद्वयात्मकं वस्तु तत्पदलक्ष्यार्थः। देहेन्द्रियमनोबुद्धिप्राणाहंकृतितद्धर्मजाग्रत्स्वप्नसुषुप्त्यव-स्थाभ्यो विलक्षणस्तत्साक्षी चिद्धातुस्त्वम्पदलक्ष्यार्थ इत्याह—एतदुपाध्युप-हितेति ॥ २२ ॥

पदार्थप्रतिपत्तिपूर्वकत्वाद्वाक्यार्थप्रतिपत्तेरादावध्यारोपापवादाभ्यामवान्तर-वाक्यावष्टम्भेन पदार्थं परिशोध्येदानीं महावाक्यार्थं निरूपयितुमुपक्रमते —अथेति। वाक्याद्वाक्यार्थप्रतिपत्तिक्रममादौ सङ्गृह्णाति—इदमिति। उक्त-मेव विभजते—सम्बन्धत्रयं नामेति। उक्ते विभागे नैष्कर्म्यसिद्धिवचनं संवादयति—तदुक्तमिति। भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे तात्प-र्यसम्बन्धः सामानाधिकरण्यमिति ॥

सामानाधिकरण्यलक्षणमभिप्रेत्य तस्योदाहरणं तत्त्वम्पदयोरनुवर्तयति— सामानाधिकरण्यसम्बन्धस्तावदिति। तत्कालोऽतीतकालः। एतत्कालो वर्तमानकालः। परोक्षत्वादीत्यादिशब्दान्नियन्तृत्वादिग्रहः। अपरोक्षत्वादीत्या-दिपदान्नियम्यत्वादिग्रहः ॥

व्यवच्छेदकं विशेषणं व्यवच्छेद्यं विशेष्यं तयोर्भावो विशेषणविशेष्य-भावः। स एव सम्बन्धः सम्बन्धवदुभयनिरूपणीयत्वादित्यभिप्रेत्य विशेषण-विशेष्यभावसम्बन्धं सदृष्टान्तमाह—विशेषण° इति। सोऽयम्पदार्थयोर्मध्ये कस्य वा विशेषणता कस्य वा विशेष्यता किं तद्विशेषणकृत्यमित्यपेक्षायां द्वयोरपि पदार्थयोः परस्परापेक्षया विशेषणविशेष्यभावो भेदभ्रमापोहश्च विशेषणकृत्यमित्यभिप्रेत्याह—अन्योन्यभेदव्यावर्तकतयेति ॥

अभिधेयाविनाभूतप्रवृत्तिर्लक्षणा। सा त्रिविधा जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणा चेति। वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धिन्यर्थान्तरे वृत्तिर्जहल्लक्षणा। वाच्यार्थापरित्यागेन तत्सम्बन्धिनि वृत्तिरजहल्लक्षणा। वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तिर्जहदजहल्लक्षणा। तत्र प्रकृतवाक्ये लक्ष्य-लक्षणसम्बन्धं सोदाहरणमाह—लक्ष्यलक्षणसम्बन्ध इति। पदवाच्यार्थयोः परस्परविरुद्धत्वान्नान्योन्यं विशेषणविशेष्यभाव उपपद्यते। तथा च तत्समर्पक-योरपि पदयोः सामानाधिकरण्यवशात्प्रतीयमानस्यैकवाक्यार्थस्यानुपपत्तिरिति लक्षणायां प्रसक्तायां वक्ष्यमाणप्रकारेण जहदजहल्लक्षणयोः प्रकृतासङ्गतौ पद-वाच्यगतविरुद्धांशप्रहाणेनाविरुद्धांशलक्षणया सामानाधिकरण्ये सति वाक्या-

दखण्डार्थप्रतिपत्तिरिति भावः । अंशान्तरपरित्यागेनांशान्तरलक्षणायाः शास्त्रप्रसिद्धां संज्ञां सङ्गिरते—इयमेवेति । जहदजहल्लक्षणेदंशब्दार्थः । अयं भावः । तत्त्वम्पदयोः सामानाधिकरण्यं तावच्छ्रूयते न तत्तयोर्भिन्नार्थत्वे सम्भवति स्तम्भकुम्भपदयोस्तददर्शनात् । नाप्येकार्थाभिधायकत्वेन वैश्वदेव्यामिक्षेतिवत्तद्धितादेरेकार्थसमर्पकस्य कारणस्येहादर्शनात् । तथाहुः—

"आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम्" ॥

इति परिशेषादेकार्थलक्षकत्वेनैवेति ॥ २३ ॥

ननु तत्त्वम्पदयोः सामानाधिकरण्यं विनापि लक्षणयैकार्थ्यमुपपत्स्यते नीलमुत्पलमितिवदित्याशङ्क्याह—अस्मिन्निति । अखण्डार्थत्वस्य विवक्षितत्वादित्यभिसन्धिः । ननु नीलोत्पलवाक्येऽपि स्यादखण्डार्थता नेत्याह—तत्रेति । शौक्ल्यादिव्यावर्तकनीलगुणस्य पटादिव्यावर्तकोत्पलद्रव्यस्य च गुणगुणिभावेन विरोधाभावात्तत्संसर्गैक्यस्य वा तदन्यतरविशिष्टस्यान्यतरस्य वा वाक्यार्थत्वान्नाखण्डार्थत्वं मुख्यैक्यस्य तत्राविवक्षितत्वादित्यर्थः । प्रकृतवाक्ये नीलोत्पलवाक्याद्वैषम्यमाह—अत्रेति । यद्यपि तत्त्वम्पदार्थयोः स्वरूपतो न प्रत्यक्षत्वं तत्पदार्थस्याद्वितीयत्वात्त्वम्पदार्थस्य च द्रष्टृत्वाद्रष्टुर्दृश्यत्वानुपपत्तेस्तथा च तद्वेदस्याप्यप्रत्यक्षता तथापि तत्त्वम्पदयोः परोक्षापरोक्षार्थाधिगतसङ्गत्योः श्रवणसमयेऽपरिशोधितपदार्थस्य पुंसो भवति विरोधस्फूर्तिरिति तदपेक्षया प्रत्यक्षादिप्रमाणविरोधादित्युक्तम् । तथा च तत्त्वम्पदयोः शबलांशे व्युत्पन्नयोर्विरुद्धार्थविषयकत्वेनैक्यनिष्ठत्वाभावान्न विवक्षितं सामानाधिकरण्यमुपपद्यत इति भावः । एतदुक्तं भवति । न तावत्तत्त्वमर्थयोर्नीलोत्पलवद्गुणगुणिभाव उभयोरपि द्रव्यत्वात् । नापि कुण्डलसुवर्णवत्कार्यकारणभावो नित्यत्वादविकृतत्वाच्च । नापि भूम्यूषरादिवदंशांशिभावो निरवयवत्वात् । नापि क्रियातद्भावो बाणादिवन्निष्क्रियत्वात् । नापि गोत्वशाबलेयादिवज्जातिव्यक्तिभावो द्रव्यत्वादेव । अत एव न विशेषविशेषिभावोऽपि । वस्तुतस्तु विज्ञानघनमात्रत्वावधारणान्नेति नेतीत्यशेषविशेषप्रत्याख्यानेन निर्धर्मकत्वावधारणाच्च न केनापि प्रकारेण तत्त्वमस्यादिवाक्यानां संसृष्टार्थनिष्ठत्वशङ्कावकाशं लभते । न चेदं वाक्यं त्वमिन्द्रोऽसीतिवत्स्तुतिपरं नवकृत्वोऽभ्यासवैयर्थ्यप्रसङ्गात् । न हि स्तुतिः पुनःपुनः परिचोदनापूर्वकं क्वचिदभ्यस्यते । अत एव नार्थवादोऽनन्यशेषत्वाच्च । न ह्यस्मिन्प्रकरणेऽन्यत्किञ्चित्प्रधानवाक्यमुपलभ्यते यच्छेषत्वेनेदमर्थवादरूपं भवेत् । नापि राज-

---

१. *Tantravārtika* 2. 2. 23, page 533.

पुरुषे राजायमितिवदौपचारिकमप्रमितभेदयोरैक्यस्यौपचारिकत्वानुपपत्तेः । नापि विपर्ययः संशयो वात्र सम्भवति श्रुतेः स्वतःप्रामाण्यात् । तस्मात्तत्त्वमस्यादिवाक्यमखण्डार्थनिष्ठमकार्यकारणद्रव्यमात्रनिष्ठत्वे सति समानाधिकरणवाक्यत्वात्सोऽयं देवदत्त इति वाक्यवदिति । तदेवं पदयोरखण्डार्थनिष्ठत्वेन सामानाधिकरण्यं वाच्यार्थांशे विरोधाद्विना लक्षणां न सङ्गच्छत इत्युक्तम् ॥ २४ ॥

तत्र भागलक्षणामेव परिशेषयितुं लक्षणान्तरं व्युदस्यति—अत्रेत्यादिना । घोष आभीरनिवासः । कुत इत्यपेक्षायां गङ्गापदे जहल्लक्षणा सम्भवति वाच्यार्थस्य तत्राशेषस्यानन्वयेन परित्याज्यत्वादित्याह—तत्र गङ्गाघोषयोरिति । प्रकृते वाच्यार्थस्याशेषपरित्यागायोगान्न जहल्लक्षणा सङ्गच्छत इत्याह—अत्र त्विति । ननु विशेषणांशत्यागेऽपि विशेषणाभावे विशिष्टाभावन्यायेन विशिष्टस्यार्थपरित्यागाज्जहल्लक्षणैव तत्त्वम्पदयोरपि गङ्गापदवत्स्यादित्याशङ्क्य वैषम्येण प्रत्याचष्टे—न चेति । यथा पदादेव वाक्यार्थान्वयिपदार्थप्रतीतौ लक्षणावैयर्थ्यं तथा विशेष्यांशपरित्यागेऽपि लक्षणावैयर्थ्यं तत्त्वम्पदार्थातिरिक्तस्य तत्सम्बन्धिनो वाक्यार्थान्वयिनोऽर्थस्याप्रसिद्धेरिति भावः ॥ २५ ॥

अजहत्स्वार्थामप्यत्र व्युदस्यति—अत्र शोण इति । शोणपदे स्ववाच्यशोणगुणापरित्यागेन तदाधारलक्षणावत्तत्पदे त्वम्पदे च स्ववाच्यापरित्यागेन तत्सम्बन्धिनो यस्यकस्यचिदनिर्दिष्टविशेषस्यार्थान्तरस्य प्रतीत्यै लक्षणाङ्गीकरणेऽपि वाच्यार्थयोर्विरोधस्यापरिहाराज्जहल्लक्षणाप्यत्र युज्यत इत्यर्थः । प्रकारान्तरेणाजहल्लक्षणामुद्भट्टय निराचष्टे—न चेति । सकृच्छ्रुतस्यैकस्य पदस्य युगपदुभयलक्षकत्वासम्भवादित्यर्थः । अत्रापि पूर्वोक्तं दूषणं प्रसञ्जयति—पदान्तरेणेति ॥ २६ ॥

परिशेषाद्भागलक्षणामन्तरेण नाखण्डवाक्यार्थसिद्धिरतस्तयैव लक्षणयैकार्थपर्यवसायित्वेन पदयोः सामानाधिकरण्यमित्युपसंहरति—तस्मादिति । सोऽयमिति पदद्वयं वाक्यशब्दार्थो देवदत्तपदस्य सामानाधिकरण्यसिद्धैक्यस्पष्टीकरणार्थत्वाल्लक्षणाविचारानुपयोगात् । यद्यपि पदधर्मो लक्षणा तथाप्यभिहितान्वयैमतवत्पदार्थस्यापि लक्षकत्वमभ्युपगम्य पदार्थो वेत्युक्तम् । अन्यत्समानम् ॥

अत्र केचिदाहुः—पदद्वये लक्षणानुपपत्ता । सोऽयं देवदत्त इत्युक्ते सशब्देनातीतदेशकालपरित्यागेन लक्षिते देवदत्तस्वरूपे वर्तमानदेशकालवैशिष्ट्यमयम्पदेन प्रतिपाद्यते तथा च पूर्वोत्तरदेवदत्तस्वरूपाभेदसिद्धेरिति । तदयुक्तम् ।

---

१. See Notes. २. Ditto. ३. °सिद्धिरिति. P. only.

विशिष्टस्य केवलाद्भिन्नत्वात्[1]। यथा केवलो विशिष्टाद्भिन्नस्तथा विशिष्टोऽपि केवलाद्भिन्न एव। तथा च विशिष्टविषयस्यार्यशब्दस्यापि विना लक्षणां न तत्स्वरूपनिष्ठत्वं सम्भवति। तदभावे च सोऽयम्पदयोः सामानाधिकरण्येन देवदत्तैक्यप्रतिपादकतेत्यास्तां तावत्। अपरे पुनराहुर्न पदवाच्यार्थयोः परस्परविरोधाल्लक्षणाश्रीयते किन्तु वाच्यार्थैक्ये तात्पर्याभावादिति। तन्न। तात्पर्याभावावगमस्यापि विरोधस्फूर्त्यधीनत्वात्। अन्यथा वेदवाक्यप्रतिपादितेऽर्थे संवादिविसंवादिप्रमाणान्तराविषये तात्पर्यानवगमायोगात्। तस्मात्सुष्ठूक्तं वाक्यार्थस्यांशे विरोधादिति ॥ २७ ॥

तदेवं "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इतिन्यायेन जीवस्य नित्यशुद्धबुद्धमुक्तसत्यज्ञानानन्तानन्दपरिपूर्णब्रह्मात्मत्वोपदेशवाक्यार्थं सप्रपञ्चं निरूप्येदानीमवगतस्वरूपस्यानुभवावभासिवाक्यार्थं वर्णयितुमुपक्रमते—अथेत्यादिना। उपदेशवाक्यार्थनिरूपणानन्तर्यमथशब्दार्थः। अधिकारिणो विधिवदधीतवेदेत्यादिखण्डैलोक्तलक्षणस्यासम्भावनाविपरीतभावनाख्यचित्तदोषरहितस्याध्यारोपादिन्यायेनाचार्योपदेशसमनन्तरमेव नित्यशुद्धबुद्धत्वादिविशेषणं ब्रह्माहमस्मीत्यखण्डाकारान्तःकरणवृत्तिरुदेति साक्षात्काररूपा न पुनः परोक्षार्थाकारितेत्यर्थः। न च शब्दस्य परोक्षज्ञानजनकत्वस्वाभाव्यान्न तेनापरोक्षा चित्तवृत्तिरुदेतीति वाच्यम्। "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर" इतिश्रुतेर्नित्यापरोक्षं ब्रह्मात्मस्वरूपं तस्मिन्परोक्षज्ञानं जनयतः शब्दस्याप्रामाण्यापत्तेः। किञ्च ज्ञानस्य परोक्षत्वापरोक्षत्वे न करणनिबन्धने किन्त्वर्थनिबन्धने एकस्यैव मनसः सुखादिविषयकापरोक्षज्ञानहेतुत्वस्यातीतार्थस्मृतिहेतुत्वस्य च दर्शनात्। तत्र सहकारिभेदात्तथाभाव इति चेत्तर्हीहाप्यस्ति सहकारिभेदः शब्दप्रतिपत्तुः शब्दार्थनैकट्यानैकट्यलक्षणः। निकटं ह्यत्यन्तमात्मनः स्वरूपं ब्रह्म न त्वस्वरूपमुपाध्यन्तराविष्टमिन्द्रवरुणादिरूपम्। तस्माद्दशमस्त्वमसीत्यादिवाक्यवत्तत्त्वमस्यादिवाक्यानामपरोक्षज्ञानजनकत्वं युक्तमिति भावः ॥

एवमुत्पन्नाखण्डाकारा चित्तवृत्तिः किं करोतीति तदाह—सा त्विति। वृत्तेर्जडत्वादज्ञानबाधनासम्भवमाशङ्क्य तां विशिनष्टि—चित्प्रतिबिम्ब-

---

१. Cf. Amaradāsa's nyāya "विशिष्टं शुद्धान्नातिरिच्यते" on pp. 5 and 205 of his ṭīkā on *Śikhāmaṇi* (Venkateśvara Press, Bombay, 1901). २. *Brahmasūtra* 4. 1. 3. ३. The occurrence of this form is noteworthy. The Ms. M. has खण्डलक. ४. *Bṛih.* 3. 4. 1. ५. *Upadeśasāhasrī* xviii. 174–6; *Pañchadaśī* vii. 23–27.

सहिता सतीति। प्रत्यक्चितिव्याप्तेति यावत्। ब्रह्मणो विषयीकरणं नाम वृत्तेस्तदाभिमुख्यम्। ब्रह्मशब्दस्य कार्यब्रह्मविषयत्वं व्यावर्तयति—परमिति। तस्य प्रमेयत्वमाह—अज्ञातमिति। तस्य तात्स्थ्यं वारयति—प्रत्यगभिन्नमिति। अज्ञानमेव बाधत इत्येवकारेण ब्रह्मणः प्रकाश्यत्वं व्यावर्तते। एवंविधया चित्तवृत्त्या संसारमूलाज्ञाने बाधिते सत्यप्यस्या वृत्तेर्बाधकाभावान्मोक्षोऽपि सप्रपञ्चः स्यादित्यत आह—तदेति। वृत्तेर्बाधकाभावेऽपि दग्धेन्धनानलवत्स्वयमेव विनश्यति ततो न सप्रपञ्चो मोक्ष इत्यर्थः। तर्हि वृत्तिप्रतिबिम्बितस्य प्रत्यक्चैतन्यस्य का गतिरिति तामाह—तत्रेति। तत्र प्रतिबिम्बितं चैतन्यमप्यखण्डचित्तवृत्तेर्बाधितत्वात्प्रत्यगभिन्नपरब्रह्ममात्रं भवतीत्यन्वयः। स्वोपाधिविलये उपहितस्य स्वस्वरूपमात्रावस्थाने दृष्टान्तो दर्पणाभाव इति। उपाध्यनुगामिनो निरुपाधिप्रकाशनासामर्थ्ये दृष्टान्तमाह—यथा दीपप्रभेति। यद्वा परिच्छिन्नप्रकाशस्यापरिच्छिन्नानवभासने दृष्टान्तो यथा दीपेति ॥ २८ ॥

वाक्यजनिता ब्रह्मात्माकारा चित्तवृत्तिस्तदृताज्ञानमेव बाधते नतु तत्प्रकाशयतीति विशेषनिरूपणे फलितमाह—एवं चेति। अविरोधः सिद्ध इति शेषः। तत्रैवंशब्दसूचितमर्थं हेतुमाह—वृत्तिव्याप्यत्वा° इति। विशिष्टशब्दादिप्रमाणबलात्तत्तद्विषयाकारधीसमुन्मेषाभिव्यक्तत्वं वृत्तिव्याप्यत्वम्। बाह्येन्द्रियसन्निकृष्टार्थाकारबाह्यधीपरिणामावच्छिन्नचिदंशकृतप्राकट्याश्रयत्वं फलव्याप्यत्वमिति भेदः। उक्तेऽर्थे वृद्धसम्मतिमाह—फलव्याप्यत्वमिति। फलव्याप्यत्वाभावं सम्मत्यन्तरेण साधयति—स्वयम्प्रकाशेति। ननु ब्रह्म फलव्याप्यं साभासान्तःकरणव्यङ्ग्यत्वात्प्रत्यक्षत्वाद्वा घटादिवद्यद्वा ब्रह्माकारा वृत्तिः सकर्मिकापरोक्षवृत्तित्वाद्घटादिवृत्तिवदित्याशङ्क्य पूर्वस्मिन्ननुमाने जडत्वमुपाधिरुत्तरस्मिंस्तु जडविषयत्वमुपाधिरित्यभिप्रेत्याह—जडपदार्थेति। प्रतिज्ञातमर्थं सदृष्टान्तमुपपादयति—तथा हीत्यादिना। इतिशब्दोऽनुभववाक्यार्थनिरूपणसमाप्त्यर्थः ॥ २९ ॥

इदानीं "आवृत्तिरसकृदुपदेशात्"[2] इतिन्यायमाश्रित्यैवंविधसाक्षात्काररूपानुभवदार्ढ्यपर्यन्तमनुष्ठेयं श्रवणादिसाधनजातं निरूपयितुमारभते—एवमित्यादिना। तथा च श्रुतिः[3]—"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" इति पाण्डित्यबाल्यमुनिशब्दैः क्रमेण श्रवणमननिदिध्यासनानि विधत्ते। तथा—

---

१. *Maxims* ii., (2nd edn.). २. *Brahmasūtra* 4. 1. 1. ३. *Bṛih.* 3. 5. 1.

"तस्याभिध्यानाद्योजनात्तत्त्वभावा-
द्भूयश्चान्ते विश्वमायानिवृत्तिः" ॥

इति श्वेताश्वतरीयो[1] मन्त्रः समाधिमनुष्ठेयं सूचयति। "सहकार्यन्तरविधिः[2] पक्षेण तृतीयं तद्वतो विध्यादिवत्" इतिन्यायेनायमर्थो निर्णीतः। श्रवणादीनां लक्षणमाह—श्रवणं नामेत्यादिना। "गतिसामान्यात्[3]" इतिन्यायमाश्रित्य अशेषवेदान्तानामित्युक्तम्। "न[4] स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि" इतिन्यायमाश्रित्य अद्वितीयवस्तुनीत्युक्तम्।

लिङ्गानि कानीत्यपेक्षायां तानि विभजते—लिङ्गानि त्विति। उपक्रमोपसंहाराख्यमाद्यं लिङ्गं लक्षयित्वोदाहरति—यथा छान्दोग्य इति। पुनःपुनरित्यस्य भावः पौनःपुन्यम्। तत्रैव छान्दोग्यषष्ठे[5] मानान्तराविषयीकरणमाचार्यवान्पुरुषो वेदेति सूचितमिति शेषः। तदनुष्ठानस्य चेति[6] सगुणविद्याभिप्रायेणोक्तम्। आचार्यवान्पुरुषो वेदेति साहचर्यादिहोदाहृतं न पुनः फलवचनं तत्। तस्य तावदिति तु फलवचनमिहोदाहरणमिति द्रष्टव्यम्। उदाहरणान्तरं स्पष्टार्थम्। तथा च न्यायो वाचारम्भणश्रुतेरुपपत्तिपरत्वनिर्णयपरः "तदनन्यत्वमारम्भणशब्दादिभ्य[7]" इति ॥

एवं शाखान्तरेष्वप्युपक्रमोपसंहारादि निरूपणीयम्। तथा हि बृहदारण्यके तावत्—"आत्मेत्येवोपासीतात्र[8] ह्येते सर्व एकं भवन्ति" इत्युपक्रमः। "पूर्णमद[9]" इत्युपसंहारः। "स[10] एष नेति नेत्यात्मा" इत्यभ्यासः। "तं[11] त्वौपनिषदं पुरुषं पृच्छामि" इत्यपूर्वत्वं सूचितम्। "अभय[12] वै जनक प्राप्तोऽसि", "ब्रह्मैव[13] सन् ब्रह्माप्येति" इत्यादि फलम्। "तद्यो[14] यो देवानां" इत्याद्यर्थवादः। "स[15] यथा दुन्दुभेः" इत्याद्युपपत्तिः ॥

तथा तैत्तिरीयके—"ब्रह्मविदाप्नोति[16] परं" इत्युपक्रमः। "आनन्दो[17] ब्रह्मेति व्यजानात्" इत्युपसंहारः। "स[18] यश्चायं" इत्यभ्यासः। "यो वेद[19] निहितं गुहायां" इत्यपूर्वतासूचनम्। "अभय[20] प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति" इति फलश्रुतिः। "सोऽकामयत[21]" इत्याद्यर्थवादः। "अस-

---

१. *S'wet.* 1. 10. २. *Brahmasūtra* 3. 4. 47. ३. *Idem.* 1. 1. 10. ४. *Idem.* 3. 2. 11. ५. वेत्ति. M. ६. *Idem.* 2. 1. 14. ७. *Brih.* 1. 4. 7. ८. *Idem.* 5. 1. 1. ९. *Idem.* 3. 9. 26. १०. *Idem.* ११. *Idem.* 4. 2. 4. १२. *Idem.* 4. 4. 6. १३. *Idem.* 1. 4. 10. १४. *Idem.* 2. 4. 7. १५. *Tait.* 2. 1. 1. १६. *Idem.* 3. 6. 1. १७. *Idem.* 2. 8. 1. १८. *Idem.* 2. 1. 1. १९. *Idem.* 2. 7. 1. २०. *Idem.* 2. 6. 1. २१. *Idem.*

ब्रैव स भवति असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः" इति, "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इत्युपपत्तिः ॥

तथा मुण्डके च—"अथ परा यया तदक्षरमधिगम्यते" इत्युपक्रमः । "ब्रह्मैवेदममृतं पुरस्तात्" इत्युपसंहारः । "येनाक्षरं पुरुषं वेद सत्यं", "तदेतदक्षरं ब्रह्म", "तमेवैकं जानथ आत्मानं" इत्याद्यभ्यासः । "नं चक्षुषा गृह्यते नापि वाचा" इत्यारभ्य "वेदान्तविज्ञानसुनिश्चितार्थाः" इत्यन्तेनापूर्वतासूचनम् । "निरञ्जनः परमं साम्यमुपैति", "ब्रह्मं वेद ब्रह्मैव भवति" इति फलश्रुतिः । "यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः" इत्याद्यर्थवादः । "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञारूपा ह्युपपत्तिः । एवमैतरेयादिष्वपि शाखान्तरेषूपक्रमाद्यूहनीयम् ॥

मननं लक्षयति—मननं त्विति । केवलं पुरुषबुद्ध्युत्प्रेक्षितशुष्कतर्कव्यावृत्त्यर्थं वेदान्तानुगुण° इति विशेषणम् ।

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" ॥

इति स्मृतेः । अत्र धर्मशब्दो ब्रह्मणोऽप्युपलक्षणार्थः । अनवरतपदं मननस्यावश्यकत्वद्योतनार्थम् ॥

निदिध्यासनलक्षणमाह—विजातीय° इति । चित्तस्य ज्ञेयात्मना निश्चलावस्थानं समाधिस्तं विभज्य लक्षयति—समाधिरित्यादिना । सविकल्पकः सम्प्रज्ञातसमाधिर्निर्विकल्पकोऽसम्प्रज्ञातसमाधिरिति साम्प्रदायिकी संज्ञा द्रष्टव्या । तत्रेत्युद्दिष्टसमाधिद्वयं सप्तम्यर्थः । ज्ञाता ज्ञानं ज्ञेयं चेति यो विकल्पो विभागोल्लेखस्तस्य लयोऽभावस्तदनपेक्षया ज्ञात्रादिविकल्पोल्लेखपूर्वकमिति यावत् । अद्वितीय° इति च्छेदः । सविकल्पकसमाधिलक्षणार्थमुदाहरणेन प्रत्याययति—तदा मृदिति । यथा मृद्विकारे गजे कुम्भकारादिनिर्मिते गजोऽयमित्यस्यां बुद्धौ गजाकारोल्लेखेऽपि मृन्मात्रमेव सत्यं भासते गजाकारस्य मिथ्यात्वनिश्चयादेवं ब्रह्माकारायां वृत्तौ ज्ञात्राद्याकारे उल्लिख्यमानेऽपि ब्रह्मैव सत्यं भासते न ज्ञात्रादिविकल्प इत्यर्थः ॥

---

१. *Tait.* 2. 7. 1. २. *Mund.* 1. 1. 5. ३. *Idem.* 2. 2. 11. ४. *Idem.* 1. 2. 13. ५. *Idem.* 2. 2. 2. ६. *Idem.* 2. 2. 5. ७. *Idem.* 3. 1. 8. ८. *Idem.* 3. 2. 6. ९. *Idem.* 3. 1. 3. १०. *Idem.* 3. 2. 9. ११. *Idem.* 2. 1. 1. १२. *Idem.* 1. 1. 3. १३. *Manu.* xii. 106.

कथं तत्र ब्रह्म भासत इत्यपेक्षायां पूर्वाचार्यसम्मत्युदाहरणेन तत्स्वरूपमाह—तदुक्तमभिनीयेति । अभिनयमङ्गचेष्टाविशेषं कृत्वेत्यर्थः । दृष्टिस्वरूपं चैतन्यघनं "विज्ञानघन एव"[1] इत्यादिश्रुतेः । गगनोपमं सर्वगतं "आकाशवत्सर्वगतश्च"[2] इतिश्रुतेः । परं मायातीतं "अक्षरात्परतः पर"[3] इत्यादिश्रुतेः । सकृद्विभातमेकदैव कृत्स्नमभिव्यक्तं "सकृद्विद्युतो ह्येवासौ भवति"[4] इत्यादिश्रुतेः । तुशब्दः पादपूरणार्थः । अजं जन्मादिविकारशून्यं "न जायते म्रियते वा विपश्चित्"[5] इत्यादिश्रुतेः । एकं सजातीयविजातीयशून्यं "एको देवः"[6], "एकं सन्तं बहुधा कल्पयन्ति"[7] इतिश्रुतेः । अक्षरं कूटस्थं नित्यं "येनाक्षरं पुरुषं वेद सत्यं"[8] इतिश्रुतेः । अलेपकं "निरवद्यं निरञ्जनं"[9] इतिश्रुतेः । सर्वगतं सर्वानुस्यूतं सन्मात्रं "यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं"[10] इत्यादिश्रुतेः । यदद्वयं स्वगतभेदशून्यं "अशब्दमस्पर्शमरूपं"[11] इत्यादिश्रुतेः । तदेव चाहमस्मि "अहं ब्रह्मास्मि"[12] इतिश्रुतेः । अतोऽहं सततं सर्वदैव विमुक्तो न कदापि बद्धो "विमुक्तश्च विमुच्यत" इतिश्रुतेरिति श्लोकार्थः ॥

निर्विकल्पकसमाधिं लक्षयति—निर्विकल्पकस्त्विति । अत्राप्यद्वितीयेति च्छेदः । अतितरामेकीभावेनावस्थाने दृष्टान्तः—तदा जलेति । दृष्टान्तदर्शितमर्थं दार्ष्टान्तिके योजयति—अद्वितीयेति । ननु सुषुप्तावपि ज्ञातृज्ञेयज्ञानविभागानां लयसम्भवात्तत्र निर्विकल्पकसमाधिलक्षणमतिव्याप्तीत्यत आह—ततश्चेति । तत्र हेतुमाह—उभयत्रेति । सुषुप्तौ बुद्धिरेव नास्ति बुद्धेः कारणात्मनावस्थानस्य तल्लक्षणत्वात् । इह तु बुद्धिवृत्तेरद्वितीयवस्त्वाकाराकारितायाः प्रवस्थानाङ्गीकारात्सुषुप्तेर्भेदोपपत्तेरित्यर्थः । नापि मुक्तावतिव्याप्तिस्तत्राविद्याप्रकार्यसंस्काराणामत्यन्तमुच्छेदात् । इह पुनर्व्युत्थानादिव्यवहारदर्शनेन तेषामनुवृत्तेरिष्टत्वात् । नापि जीवन्मुक्तौ प्रसङ्गस्तस्य व्युत्थानदशायामपि बाधितानुवृत्तिमात्रप्रपञ्चावभासेऽपि स्वस्वरूप एवावस्थानात्साधकस्य बाधितानुवृत्तिमात्रप्रपञ्चावभासाभावादिति द्रष्टव्यम् ॥ ३० ॥

उक्तनिर्विकल्पकसमाधिस्वरूपोपकारकाण्यङ्गान्याह—अस्येति । तत्र यमानाह—तत्रेति । वाङ्मनः कायैः परपीडावर्जनमहिंसा । सत्यं यथार्थभाषणम् । अस्तेयमदत्तादानरूपपरस्वहरणराहित्यम् । ब्रह्मचर्यमष्टाङ्गमैथुनवर्जनम् । [illegible] चोक्तं—

---

१. *Bṛih.* 2. 4. 12. २. *Muṇḍ.* 2. 1. 2. ३. *Chhā.* 3. 11. 3. *Katha.* 2. 18. ५. *Śwet.* 6. 11. ६. *Rik-saṁhitā* 10. 114. 5. ७. *Muṇḍ.* 1. 2. 13. ८. *Śwet.* 6. 19. ९. *Muṇḍ.* 2. 2. 5. १०. *Kaṭha.* 3. 15. ११. *Bṛih.* 1. 4. 10. १२. *Kaṭha* 5. 1.

"[1]स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्" ॥ इति ।

अपरिग्रहः समाध्यनुष्ठानानुपयुक्तस्य वस्तुमात्रस्यासङ्ग्रहः ॥

नियमानाह—शौच° इति । शौचं बाह्याभ्यन्तरलक्षणम् । तदुक्तं[2]—

"शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्" ॥ इति ।

सन्तोषो यदृच्छालाभसन्तुष्टिरलाभे चाविषादः । तपः[3] कामानशनं "तपो नानशनात्परं" इतिश्रुतेः । अनशनं च कामानशनमेव । केचित्तु "मनः[4] सश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तप" इत्याद्युक्तलक्षणं तप इत्याहुः । सर्वथा तु नात्र चान्द्रायणादिः तपःशब्दार्थस्तस्य समाधिविरोधादिति द्रष्टव्यम् । स्वाध्यायः प्रणवजप उपनिषद्ग्रन्थावृत्तिश्च "ओमित्येवं ध्यायथ[5] आत्मानं", "उपनिषदमावर्तयेत्[6]" इतिश्रुतेः । ईश्वरप्रणिधानं तस्य मानसैरुपचारैरभ्यर्चनं "तं ह[7] देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इतिमन्त्रलिङ्गात् ॥

अथासनादीनि कथयति—कर इति । स्वस्तिकादीनीत्यादिपदाद्भद्रवीरासनादिग्रहः । रेचकः प्राणवायोः शनैर्वामनासापुटादक्षिणनासापुटाद्वा सव्यापसव्यन्यायेन बहिर्निःसारणम् । पूरकस्तस्य तथैवान्तःप्रवेशनम् । कुम्भकस्तु पूरितस्य वायोरन्तरेव निरोध इति भेदः । समाधेर्ध्यानस्य भेदं द्योतयितुं विच्छिद्य विच्छिद्येत्युक्तम् । सुगममन्यत् ॥ ३१ ॥

एवं साङ्गसमाधिमनुतिष्ठतो यदातिवृष्ट्यनावृष्टिराष्ट्रविप्लवव्याघ्रचौरज्वरादयुपद्रवविघ्नसम्भावना भवति तदा तन्निवृत्तिर्लोकावगतसाधनावलम्बनेन कार्या । यदा तु मनस्येव विघ्नाः प्रादुर्भविष्यन्ति तदा तन्निवारणोपायमुपदेष्टुकामस्तत्रत्यान्विघ्नान्निर्दिशति—अस्येति । लयादीन्विभज्य लक्षयति—लयस्तावदिति ॥ ३२ ॥

---

१. *Dakṣa-saṁhitā*, chap. 7. The last line, however, is not in the Bombay edition (consisting of 28 Smṛitis, styled *Dharmas'āstra-Saṅgraha.*). २. *Yājnyavalkyagītā* i. 69, and *Dakṣasaṁhitā* 5. ३. *Mahānāra.* 21. 2. ४. *Upades'asāhasrī* xvii. 24. Compare "मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं निश्चितं तपः"। *Mahābhārata* 3. 15429 (3. 260. 25 of Bombay edition). ५. *Mund.* 2. 2. 6. ६. *Āruneya.* 2. ७. *S'wet.* 6. 18.

उक्तलयादिविघ्नचतुष्टयाभावेन चित्तस्य ज्ञेये वस्तुनि यत्नैश्चल्यं तद्दृष्टान्तेन निर्विकल्पकसमाधिलक्षणमित्याह—तदेति । विघ्ननिवृत्युपायं सम्मतिप्रदर्शनेनाह—तदुक्तमित्यादिना । लये सम्बोधयेत् उत्तम्भयेत्सोत्साहं मनः कुर्यादिति यावत् । विक्षिप्तं चित्तं धैर्यावलम्बनेन पुनः शमयेत्पुनरद्वितीयवस्तुनिष्ठं कुर्यादित्येतत् । सकषायं चित्तं विजानीयात्कलुषितं मे चित्तमिति विज्ञाय च समेऽद्वितीयचैतन्यात्मनि निवेशयेत् । पुनः शमप्राप्तं तन्न चालयेत्तत्रैव प्रयत्नपूर्वकं स्थिरीकुर्यादित्यर्थः । रसं सविकल्पकानन्दं नास्वादयेत्तदानन्दमात्रेण कृतार्थतां न मन्वीत किन्तु प्रज्ञया विवेकबुद्ध्या निःसङ्गः सविकल्पकानन्देऽनासक्तो भवेदित्यर्थः । एवं विघ्नपरिहारे सति यन्निर्विकल्पकसमाध्यवस्थानं चित्तस्य तद्भगवद्वाक्योदाहरणेन दर्शयति—यथा दीप इति ॥ ३३ ॥

एवंविधसमाध्यन्तसाधनानुष्ठानपरिपाके सति पूर्वोक्तप्रकारेण ब्रह्मात्मैक्यसाक्षात्कारे दृढीभूतेऽविद्यातत्कार्यात्मकसर्वसंसारनिवृत्तौ जायमानायां काकतालीयन्यायेन यदि प्रारब्धकर्मक्षयात्तत्काल एव विदुषः शरीरपातस्तदा सद्य एव मुक्तिः स्यात् । यदा तु ज्ञानोत्पत्तिसमये प्रारब्धकर्म न क्षीयते तदा तत्क्षयपर्यन्तं शरीरस्थावस्थानाज्जीवन्नेव मुक्तसंसारो भवति । तस्य लक्षणं वक्तुं प्रतिजानीते—अथेति । अथशब्दः साधननिरूपणानन्तर्यार्थः । लक्षणमाह—जीवन्मुक्तो नाम इति । ब्रह्मनिष्ठत्वं वेदान्तवेद्यब्रह्मात्मनावस्थितत्वम् । ब्रह्मनिष्ठो जीवन्मुक्त इत्युक्ते परमार्थतो ब्रह्मनिष्ठत्वममुक्तस्याप्यस्तीत्यतो विशिनष्टि—अखिलबन्धरहित इति । परममुक्तवैधर्म्यसिद्धये प्रारब्धकर्ममात्रशेष इति विशेषणान्तरमध्याहर्तव्यम् । कथमसौ मुक्त इत्यपेक्षायामाह—अज्ञानतत्कार्य[1] इति । अज्ञानं सदसद्भ्यामनिर्वचनीयमित्याद्युक्तलक्षणम् । तत्कार्यं स्थूलसूक्ष्मप्रपञ्चद्वयम् । सञ्चितं कर्म ज्ञानोत्पत्तेः प्रागुत्पन्नमनारब्धफलम् । संशयो देहाद्यतिरिक्तो ब्रह्मस्वरूप आत्मा भवति न वेति । अथवा ब्रह्मात्मविज्ञानान्मोक्षो भवेन्न वेत्यादिविचिकित्सा । विपर्ययो देहादिष्वात्माभिमानादिलक्षणः । आदिशब्दाद्बाह्यप्रपञ्चे सत्यत्वबुद्धिः । एतेषां बाधितत्वान्मुक्त इत्यर्थः । एतत्कदा स्यादित्याकाङ्क्षायामाह—स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते सतीति । साक्षात्कारे साधनमाह—स्वस्वरूपाखण्डब्रह्मज्ञानेनेति ॥

तत्त्वसाक्षात्कारानन्तरं मुक्त एव भवतीत्यत्र प्रमाणमाह—भिद्यत इति । हृदयग्रन्थिरहङ्कारश्चिज्जडात्मकत्वाद्ग्रन्थिरिव ग्रन्थिः । सर्वसंशया दृष्टादृष्टार्थ-

---

१. So MSS. but शमयेत् P. २. *Maxims* i (2nd edn.).

ेषया विचिकित्साः । अस्यात्मनः कर्माणि जीवन्मुक्तिपक्षे प्रारब्धाति-
क्तानि सञ्चितानि क्रियमाणानि च । तथा च न्यायः—"तदधिगम उत्तर-
पूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति । परममुक्तिपक्षे प्रारब्धसहि-
तान्यपि क्षीयन्ते । कदा । तस्मिन्निष्प्रपञ्चे ब्रह्मात्मनि दृष्टे सति साक्षात्कृते
ति । कथम्भूते । परावरे सर्वात्मके । अत्र सर्वात्मकत्ववचनं तद्व्यति-
क्तस्याभावपरम् । चौरः स्थाणुरितिवद्बाधायां सामानाधिकरण्यस्य विवक्षि-
तत्वात् । यद्वा परो हिरण्यगर्भः सोऽवरो न्यूनो यस्मात्तस्मिन्परावर
त्यार्थवर्णीयश्रुत्यर्थः । आदिपदात् "यस्तु सर्वाणि भूतानि", "यस्मिन्सर्वाणि
भूतानि" इति च मन्त्रद्वयमीशावास्यगतं परिगृह्यते । श्रुतेश्चेति । चकारात्
"यथैधांसि समिद्धोऽग्निः", "यज्ज्ञात्वा न पुनर्मोहं", "ब्रह्मभूतः प्रसन्नात्मा
न शोचति न काङ्क्षति" इत्यादिस्मृतयः समुच्चीयन्ते । न च जीवन्मुक्तौ
मानाभावः । "तद्यथाहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं
शरीरं शेते", "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इत्यादि-
श्रुतेः "प्रजहाति यदा कामान्", "प्रकाशं च प्रवृत्तिं च" इत्यादिस्मृतेश्च
मानत्वादिति द्रष्टव्यम् ॥ ३४ ॥

ननु जीवन्मुक्तो देहेन्द्रियादिभिर्व्यवहरति न वा । आद्ये तस्य बद्धान्न
वैलक्षण्यता । द्वितीये देहस्यानुपयोगात्सद्यःपातप्रसङ्ग इत्याह—अयं तु
इति । आरब्धफलानि भुज्यमानानि पूर्वपूर्ववासनया क्रियमाणानि च
कर्माणि साक्षितया कर्तृत्वभोक्तृत्वाभिमानहीनोऽन्यदृष्ट्या पश्यन्निव भास-
मानोऽपि परमार्थतः स्वदृष्ट्या न पश्यति ज्ञानेन कर्तृत्वाद्यभिमानमूला-
ज्ञानस्य बाधितत्वाद्बद्धाद्विलक्षण एवायमित्यर्थः । बलवत्प्रयुक्तबाणपाषाणा-
देवत्प्रवृत्तफलस्य कर्मणो यावद्वेगक्षयं निवारकाभावात्तदधीनस्य देहस्य न
सद्यःपातप्रसङ्ग इति द्रष्टव्यम् । उक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेन्द्रजालं
इति । बाधितत्वबुद्धेरनुवृत्तेरित्यर्थः । जीवन्मुक्तो देहादिभिर्व्यवहरन्निव दृश्य-
मानोऽपि न परमार्थतो व्यवहरतीत्यत्र श्रुतिं प्रमाणयति—सच्चक्षुरच्चक्षु-
रिवेति । चक्षुरादिमानपि प्रपञ्चरूपाद्यदर्शनाच्चक्षुरादिहीन इव भवतीत्यर्थः ।
आदिपदात् "तदेजति तन्नैजति" इत्यादिश्रुत्यन्तरग्रहः । उक्तेऽर्थे पूर्वाचार्य-
सम्मतिमाह—उक्तं च सुषुप्तवदिति । जाग्रति जाग्रदवस्थायां द्वयं
पश्यन्नपि यः सुषुप्तिं गतवद्विशेषतो न पश्यति स आत्मवित् । विशेषादर्शने
हेतुः—अद्वयत्वत इति । द्वयस्य बाधितत्वादित्यर्थः । तथा कुर्वन्नपि न करोति

---

१. *Brahmasūtra* 4. 1. 13. २. Verses 6, 7. ३. *Gītā* iv. 37. ४. *Idem* iv. 35. ५. *Idem* xviii. 54. ६. *Bṛih.* 4. 4. 7. ७. *Chhā.* 6. 14. 2. ८. *Gītā* ii. 55. ९. *Idem* xiv. 22. १०. *Īś'a.* 5.

यतो निष्क्रिय इति योजना। तथा च वसिष्ठः—"सुषुप्तवच्चरति स मुक्त इति कथ्यते" इति ॥ ३५ ॥

नन्वसौ जीवन्मुक्त इति कथमन्यैर्ज्ञायत इति तदाह—अस्य ज्ञानात्पूर्वमिति। अशुभवासनानां साधकावस्थायामेव निवर्तितत्वाच्छुभवासनानामेवानुवृत्तिर्भवतीत्यर्थः। ननु शास्त्रविहितं शुभमेवाचरतो न साधकाद्भेद इत्यपरितुष्यन्निवाह—शुभाशुभयोरौदासीन्यं वा इति। औदासीन्यमुपेक्षा "हिंसानुग्रहयोरनारम्भी" इति गौतमस्मरणात्।

"निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः" ॥

इति व्यासवचनात्। "अमौनं मौनं च निर्विद्याथ ब्राह्मण" इति बृहदारण्यकश्रुतेश्च। तथा चौदासीन्यमेव मुक्तलक्षणं न विधिपरतन्त्रप्रवृत्तिमत्त्वं न वा निषेधातिक्रम इति भावः ॥

विधिनिषेधशास्त्रपरवशत्वं चेन्मुक्तस्य न भवेत्तर्हि यथेष्टाचरणं प्राप्नोतीत्याशङ्कां नैष्कर्म्यसिद्धिवाक्येन प्रत्याचष्टे—तदुक्तं बुद्ध इति। सतत्त्वं याथात्म्यम्। मुमुक्षोरपि नास्ति यथेष्टचेष्टा विदुषो मुक्तस्य कुत एव सा। तदप्युक्तम्—

"यो हि यत्र विरक्तः स्यान्नासौ तस्मिन्प्रवर्तते।
लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते ॥
क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति।
मिष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ॥
रागो लिङ्गमबोधस्य चित्तव्यायामभूमिषु।
कुतः शाङ्वलता तस्य यस्याग्निः कोटरे तरोः" ॥ इत्यादि ॥ ३६ ॥

नन्वविद्याकार्यत्वाद्यथेष्टचेष्टाया अविद्यानिवृत्त्या तन्निवृत्तिवदमानित्वादीनामद्वेष्टृत्वादीनामप्यविद्याकार्यत्वाविशेषान्निवृत्तिरेव स्यान्नानुवृत्तिरित्याशङ्क्य नियोगवशादनुवृत्त्यभावेऽपि निवृत्तिशास्त्राविरुद्धस्वभावत्वान्न निवर्तेरन्निति दर्शयति—तदानीमिति। तत्रापि नैष्कर्म्यसिद्धिमुदाहरति तदुक्तमुत्पन्ना इति ॥ ३७ ॥

---

१. *Yogavāsiṣṭha* 5. 16. 19. २. *Gautamadharmas'āstra* iii. 24. 25. See Notes. ३. *Mahābhārata* 12. 9430 (chap. 264.). It is found also on p. 1817 of Sures'vara's large Vārtika. ४. *Bṛih.* 3. 5. 1. ५. *Naiṣkarmyasiddhi* iv. 65-67. The first two verses, however, are taken from S'aṅkara's *Upades'asāhasrī* (xviii. 231, 232).

इदानीमुक्तं जीवन्मुक्तमनूद्य तस्य परममुक्तिं दर्शयति—किं बहुना इति। देहयात्रा देहस्थितिः। तन्मात्रार्थं न त्विन्द्रियप्रीत्यर्थम्। सुखदुःखलक्षणानि सुखदुःखसाधनानि। आरब्धफलानि भोग्यानि। अनुभवन्नसङ्गतया भुञ्जानः। कथं भुञ्जान इत्युच्यते अन्तःकरणाभासादीनां विषयाकारवृत्तीनां साक्षितयावभासकः सन्निति यावत्। तदवसाने प्रारब्धफलभोगावसाने जात आश्रयाभावात्प्राणे ब्रह्मणि लीने सति पूर्वसिद्धज्ञाननैव प्रारब्धकर्माक्षिप्ताज्ञानतत्कार्यतत्संस्काराणामपि विनाशात्सञ्चितकर्मणां ज्ञानेन दाह्यात्क्रियमाणैश्चासंश्लेषात्पुनर्देहान्तरहेत्वभावात्परमकैवल्येत्यादिनोक्तब्रह्मस्वरूप एवावतिष्ठते विद्वानित्यर्थः॥


निर्गुणब्रह्मसाक्षात्कारवतः प्राणा नोत्क्रामन्ति किन्तु प्रत्यग्ब्रह्मण्येव तस्यार्थःपीताम्बुवल्लीयन्त इत्यत्र प्रमाणमाह—न तस्येति। मुक्तेरसाध्यत्वे काठकश्रुतिं प्रमाणयति—विमुक्तश्च विमुच्यत इति। पूर्वमपि मुक्त एव सन्नविद्याप्रत्युपस्थापितनामरूपोपाध्यविवेकनिबन्धनस्य संसाराभासस्य नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयप्रत्यग्ब्रह्मरूपोऽहमस्मीत्यपरोक्षज्ञानाद्विलयापेक्षया विमुच्यत इत्यर्थः। वस्तुतस्तु न बन्धो न वा मोक्षः। तथा च श्रुतिः—

"[1]न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" [2]॥

इत्याद्या॥ ३८॥

विद्यासीताविरोगक्षुभितनिजसुखः शोकमोहाभिपन्न-
श्रेतःसौमित्रिमित्रो भवगहनगतः शास्त्रसुग्रीवसख्यः।
हत्वास्ते दैन्यवालिं मदनजलनिधौ धैर्यसेतुं प्रबध्य
प्रध्वस्ताबोधरक्षःपतिरधिगतचिज्जानकिः स्वात्मरामः।
वेदान्तसारविवृतिं रामतीर्थाभिधो यतिः।
चक्रे श्रीकृष्णतीर्थश्रीपदपङ्कजषट्पदः॥

इति श्रीकृष्णतीर्थपूज्यपादशिष्यश्रीरामतीर्थयतिविरचिता विद्वन्मनोरञ्जनीनाम्नी वेदान्तसारटीका समाप्ता॥



१. Cf. अतितप्तलोहक्षिप्तनीरबिन्दुवत् on p. 57, and see Note on it. २. Gauḍapāda's *Kārikās* 2. 32. Cf. *Brahmabindu* 10.

NOTES.

PAGE 1. अखण्डं 'impartite.' The commentator's definition of this word is illustrated by *Panchadas'ī* ii. 20—"वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः । वृक्षान्तरात्सजातीयो विजातीयः शिलादिभिः" ॥ See, too, a similar verse in the same author's *Anubhūtiprakās'a* iii. 32. Rāmatīrtha regards the term as synonymous with अनन्त. It should be noticed, too, that he reads अखण्डसच्चिदानन्दम्.

— The terms सत्, चित्, and आनन्द are the only *positive* definitions of pure Brahma; all others are negative. For a full explanation of them, see my *Manual of Hindu Pantheism* (*3rd* edition) pp. 3—10.

— आत्मानं 'Self. In the *Bhāṣya* on *Chhāndogya* 6. 8. 7, S'ankara says—"आत्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवन्निरूढत्वात्" । that is the word आत्मन्, when used alone, without a qualifying prefix, means the individuated self, and not pure unassociated Brahma. Yet the epithets employed in the first line of the verse are universally applied to the latter. The expression प्रत्यगात्मन् used by S'ankara occurs in *Kaṭha Upaniṣad* iv. 1:—"कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" । on which he says "प्रत्यगात्मानं स्वस्वभावमैक्षत्." In his translation of the *Kaṭha*, published in vol. xxi. of *Transactions of the American Philological Association*, Prof. Whitney renders this passage thus—"a certain wise man, seeking immortality, with eyes tured hitherward, looked upon his self." He therefore takes प्रत्यक् as an adverb qualifying आवृत्तचक्षुः and disconnects it from आत्मानं. The expression is met with in no other old Upaniṣad, but occurs twice in the *Sarvopaniṣatsāra*.

page 1. अखिलाधारं 'the substrate of all.' The *s'ruti* quoted by Rāmatīrtha in support of this definition, namely "यतो वा इमानि भूतानि जायन्ते &c", is in reality opposed to the idea of a substrate, and points rather to the actual production of all things from Brahma, without a thought of an *upādhi*.

page 2. वेदान्तो नामोपनिषत्प्रमाणं 'the Vedânta is the evidence furnished by the Upaniṣads.' For remarks on these tracts, see pages 15-17 of the 3rd edition of my *Manual of Hindu Pantheism*, and pages 114-122 of the Introduction to Dr. Thibaut's translation of the Vedāntasūtras and Commentary.

— By the *S'ārīrakasūtra* is, of course, meant that body of aphorisms as interpreted by S'ankara, which forms the basis of the *advaitavāda*. There can be little doubt, however, that S'ankara occasionally read his own ideas into an aphorism; and that Rāmānuja's interpretation, contained in the *S'rībhāṣya*, is, in some cases, to be preferred. On this question, see Dr. Thibaut's valuable Introduction as above.

— अनुबन्धः। Various renderings of this technical term have been proposed, such as 'moving considerations', 'motives', '*præcognita*' &c. A lucid explanation of it is given by Dr. Ballantyne in his article entitled *The Gist of the Vedânta as a philosophy* (Pandit for July 1867), and is as follows:—"With reference to the commencing of any scientific work, according to Hindu opinion, four questions present themselves—(1) what qualifications are required to render one competent to enter upon the study?—(2) what is the subject-matter?—(3) what connexion is there between the subject-matter and the book itself?—and (4) what inducement is there to enter upon the study at all? The answer to each of these questions is called an *anubandha*—a 'bond of connection' or 'cause'—be-

cause, unless a man knows what a given book is about, and whether he is competent to understand it, and what good the knowledge will do him, he cannot be expected to apply himself to the study of the book". The following is from the *Vāchaspatyam*, under *Anubandha*. "शास्त्रस्यादौ वक्तव्येषु अधिकारिविषयप्रयोजनसम्बन्धेषु। 'ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते। ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन' इत्युक्तेर्विषयप्रयोजनादीनामारम्भप्रयोजकत्वात्तद्धेतुत्वम्। अस्मिन्पक्षे चानुबध्यतेऽनेनेति करणे घञ्" ॥

Page 3. अस्मिञ्जन्मनि जन्मान्तरे वा. See Mr. Berriedale Keith's *Pythagoras and the doctrine of Transmigration*, in the Journal of Royal Asiatic Society for 1909.

— "स्वाध्यायोऽध्येतव्यः." This quotation is also found in *S'atapatha* 11, 5, 6, and 7. In the former *Brāhmaṇa*, स्वाध्याय is termed ब्रह्मयज्ञ, or the fifth of the *Mahāyajnas*,—whilst the latter is devoted to स्वाध्याय-प्रशंसा.

— For an account of the birth of Vidura, who was said to be "सर्वबुद्धिमतां वरः," see the closing part of chapter 106 of *Âdiparva*.

Page 4. ज्योतिष्टोम. See Haug's *Ait. Brāhmaṇa*, Vol. I., Introduction, pp. 59–63; and II. p. 240. Also Appendix A., to Mahādeo M. Kunte's *Vicissitudes of Aryan Civilization in India*.

— नित्यानि 'constant rites.' Rāmatīrtha's long discussion of the accuracy of this definition should be noted.

— सन्ध्यावन्दनादीनि. See Dr. R. G. Bhāṇḍārkar's interesting article *The Veda in India*, in the *Indian Antiquary* for 1874 (p. 132).

— जातेष्टि is defined in *Vāchaspatyam* as "पुत्रजन्मोत्तरं श्रुतिविहिते वैश्वानराख्ये इष्टिभेदे"। See the *S'rutis* quoted by Rāmatīrtha (p. 73) as bearing on this; also *Bhāṣya*

on Mīmāṁsā 1. 4. 17, and the जातेष्टिन्याय in *Maxims* iii. (2nd edn.).

Page 4. चान्द्रायण. Four varieties of this penance are detailed in *Manu.* xi. 217-220, namely *pipīlikāmadhya, yavamadhya, yatichāndrâyaṇa,* and *S'is'uchāndrāyaṇa.* The *Kṛichchhra* is described in verses 212-216.

— शाण्डिल्यविद्या. This is contained in *Chhāndogya* 3. 14. Dr. Thibaut says regarding it:—"This small *vidyā* is decidedly one of the first and most characteristic texts; it would be difficult to point out another passage setting forth with greater force and eloquence and in an equally short compass the central doctrine of the Upaniṣads." Introduction to *Translation of Vedāntasūtras,* p. cxiv. Yet, according to S'ankara's *bhāṣya* on Brahmasūtras 1. 2. 1, 2, it has reference only to *Īs'vara,* and not to pure Brahma!

— उपासनानां तु चित्तैकाग्र्यं । In S'ankara's *bhāṣya* on *Vedāntasūtra* 1. 1. 11, the objects of *upāsana* are said to be the following:—"कानिचिद्ब्रह्मण उपासनान्यभ्युदयार्थानि कानिचित्क्रममुक्त्यर्थानि कानिचित्कर्मसमृद्ध्यर्थानि तेषां गुणविशेषोपाधिभेदेन भेदः" ।

— पितृलोक and सत्यलोक are the first and last of the seven upper worlds.

— आमुष्मिकाणां &c. It must never be forgotten that abode in the heavens of Hinduism is as impermanent as mundane existence; and that, when the merit which brought it about is exhausted, the soul returns to a new birth on earth. See भाण्डानुसारिस्नेहवत् in *Maxims* iii. (2nd Edn.).

— साधनानि. The list is taken from the *Bhāṣya* on *Vedāntasūtras* 1. 1. 1 (page 23 of the Anandās'rama edition).

Page 5. श्रद्धा 'faith'. In *Gītā* xvii. 28, the absence of faith on the part of the performer of religious rites and ceremonies is said to vitiate them. In *Mahābhārata* xii.

9456 (chap. 265) too it is said—"अश्रद्धा परमं पापं श्रद्धा पापप्रमोचनी"। In the Christian scriptures, we read—"Without faith it is impossible to please him [*i. e.* God]; for he that cometh to God must believe that He is, and that He is a rewarder of them that diligently seek Him." In Christianity, श्रद्धा leads to भक्ति, or devotion to the person of its Founder, Christ; and this latter quality is much insisted on in the *Gītā* and the *Purāṇas*, though unknown to the earliest Indian scriptures. Hence, some have supposed a contact with Christianity prior to the time of those works. See Prof. Cowell's remarks on this subject in the Preface to his translation of the *Aphorisms of S'āṇḍilya*, a treatise devoted to भक्तिजिज्ञासा; also pp. 35—37 of my *Manual of Hindu Pantheism*.

Page 5. मुमुक्षुत्वं मोक्षेच्छा। This is an inexact definition, since the former word means 'the being a possessor of a desire for emancipation,' and not merely the desire itself. See Rāmatīrtha (p. 81). It is emancipation from successive births which is desired, these being necessary, according to Hindu notions, in order that each may reap the fruit of his works, as stated in *Mahābhārata*, xii. 12152—"बालो युवा वा वृद्धश्च यत्करोति शुभाशुभम्। तस्यां तस्यामवस्थायां भुंक्ते जन्मनि जन्मनि"॥ See the Nyāya य एव करोति स एव भुंक्ते in *Maxims* iii (2nd edn.).

— "शान्तो दान्तः"। The entire passage is "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति." Rāmatīrtha points out that from this come the शम, दम, उपरति, तितिक्षा and समाधान of our text. But whence comes the श्रद्धा? It is added from the *Mâdhyañdina* recension of the same Upaniṣad, which reads श्रद्धावित्तः instead of the समाहितः of the *Kāṇwa*; so our author has combined the two, in accordance with the *guṇopasaṁhāranyāya*. The six qualities, *s'ama* and the rest, are referred to in the same order in the verse quoted from the

Upades'asāhasrī. A passage of very similar import is found in *Mokṣadharma* (chap. 309 of Bombay edition, and 310 of the Calcutta), part of which is as follows:—"श्रद्धान्विताय्याथ गुणान्विताय परापवादाद्विरताय नित्यं। विशुद्धयोगाय बुधाय नित्यं क्रियावते च क्षमिणे हिताय। विविक्तशीलाय विधिप्रियाय विवादहीनाय बहुश्रुताय। विजानते चैव न चाहितक्षमे दमे च शक्ताय शमे च देयम्। ...जितेन्द्रियायैतदसंशयं ते भवेत्प्रदेयं परमं नरेन्द्र." It looks as if S'ankara had these lines in mind when writing his own. In *Naiṣkarmyasiddhi* iv. 71 we are told of these to whom instruction is *not* to be given.

Page 6. जीवब्रह्मैक्यं. This is of course, the essence of the *advaitavāda*. The *vis'iṣṭādvaitavāda*, of which Rāmānuja is the exponent, holds the separate existence of souls. See Translation of *Sarvadars'anasaṅgraha*, p. 66; and H. H. Wilson's *Essays on Religion of Hindus*, vol. i. pp. 43, 44. Also pages 68–74 of Dr. R. G. Bhāṇḍārkar's *Report on Sanskrit MSS.* for 1883–84.

Page 7. गुरुमुपसृत्य. Rāmatīrtha quotes two passages from the *Chhāndogya* which indicate the need of a teacher. S'ankara, too, insists upon it in his *Bhāṣya* on *Muṇḍaka* 1. 2. 12, where he says "शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात्"।

अध्यारोपापवादन्यायेन 'by the method of the refutation of the erroneous imputation,' so Dr. Ballantyne. In Dr. Fitzedward Hall's *Rational Refutation*, these two words are rendered 'false imputation' and 'rescission' respectively. The following passage occurs on p. 209 of that work—"When the Vedāntins speak of the origin of the world, for instance, they do not believe its origin to be true. This mode of expression they call 'false imputation.' It consists in holding for true that which is false, in accommodation to the intelligence of the uninitiated. At a further stage of instruction, when the time has arrived for propounding the esoteric view, the false

imputation is gainsaid, and this gainsaying is termed rescission;" अध्यास, which is synonymous with अध्यारोप, is defined in the opening part of *S'ārīrakabhāṣya* as, "स्मृतिरूपः परत्र पूर्वदृष्टावभासः" "the appearance, in the form of remembrance, of something seen before elsewhere," as, for example, the appearance of silver in nacre. Three other definitions of the term follow; and further on it is defined as अतस्मिंस्तद्बुद्धिः, an expression reproduced in *Vivekachūḍāmaṇi* 140. See also अध्यारोपन्याय and अपवादन्याय in *Vāchaspatyam*, under the word न्याय; and the opening part of *Bhāṣya* on *Bṛihadāraṇyaka Upaniṣad* (p. 10 of Ānandās'rama edition).

Page 8. अज्ञानं तु। Note, in the preceding line, the declared *unreality* of ignorance, although it is accepted as an indescribable '*something*,' and the material cause of the world! The following extract from Professor Venis' translation of the *Vedāntasiddhāntamuktāvalī* (pp. 14, 15) will be of interest here:—"Of the reality of Nescience [*avidyā*] there is no evidence, revealed or human... Is Nescience proved by Veda, or by perception &c., or is it assumed to account for the world of experience, which cannot otherwise be accounted for? Not by Veda...Nor by perception, inference, or human teaching. For, if by any of these Nescience were clearly proved, controversy would be at an end. And since there is no evidence for Nescience, it must needs be granted that Nescience is *assumed* to account for the otherwise inexplicable production of the unreal world...For there is no other course apart from this assumption of Nescience." The absurdity of seeking a *proof* of Ignorance is set forth in the following couplet quoted on page 125 of the foregoing work.—"अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यन्तमूढधीः। स तु नूनं तमः पश्येदीपेनोत्तमतेजसा"॥ For the origin of the idea expressed in this verse, see तमोदीपन्याय in *maxims* i (2nd edition). It may be

added that throughout the *Brahmasūtrabhāṣya* the word अविद्या is used, and not अज्ञान.

Page 8. सदसद्भ्यामनिर्वचनीयं। This expression, too, does not occur in the *Bhāṣya*. In a very important description of *māyā* in the *Bhāṣya* on 1. 4. 3, we read "अव्यक्ता हि सा माया तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्"; in 2. 1. 14 "अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये" and in 2. 1. 27 "अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन &c." but never as in the *Vedāntasāra*. For an indignant protest against this expression see Sāñkhya *Aphorisms* i. 20–26. For a defence of it see Rāmatīrtha, page 87.

— त्रिगुणात्मकं। This idea seems to have been borrowed from the Sāñkhya system since the time of S'ankara. It occurs nowhere in the *Brahmasūtrabhāṣya* as a tenet of the Vedānta.

Page 9. उपाधि. A most important word in Indian philosophy. I have rendered it "associate;" and उपहित and अनुपहित "associated," and "unassociated," respectively. This forms a convenient series. "Environment" and "limiting adjunct" have also been used by scholars as equivalents of the first. In *Vāchaspatya* it is defined as "अन्यथास्थितस्य वस्तुनोऽन्यथाप्रकाशनरूपे."

— ईश्वरः। It is most essential for the student of Vedānta to bear in mind that, according to the *advaitavādins* God is an unreal as the universe with which they identify him. There is no such thing therefore as a *personal* God; yet they imagine that there is, and ascribe attributes to him. The identity of God and the phenominal is plainly stated in *Yogavāsiṣtha* 6. 48. 23—"तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः"। Every thing, being a portion of God, may of course be worshipped, as stated distinctly in *Pañchadas'ī* vi. 206–9; though why man, himself a component part of this

deity, should worship another, and perhaps less exalted, part, is not clear.

The student of *advaitavāda* must be warned, too, against speaking of Brahman as God, which is manifestly incorrect,—God being Brahma-associated-with-ignorance. In *Brahmasūtrabhāṣya* 2. 3. 45. He is described as निरतिशयोपाधिसम्पन्नः। The learned Dr. Ballantyne, however, made this mistake again and again; and Mr. Bābā Padmanji, in his excellent *Manual of Hinduism*, says "ईश्वराविषयींच्या ज्ञानाला ब्रह्मज्ञान म्हणतात," which, though true in respect of the followers of Rāmānuja, is manifestly inaccurate as far as the more numerous *advaitavādins* are concerned. On this ground, the term Pantheism as applied to this system is clearly a misnomer, and only approximately represents the views of its adherents. A more accurate name would be Pan-Brahmanism, but it is too clumsy to be adopted. No *activity* is attributed to Īs'vara as जगत्कारणं, and the Vedānta knows of no such thing as *creation*, that is the production of something not already existing in another form.

Page 9. सकलाज्ञानावभासकत्वात्. In every edition from that of Dr. Ballantyne downwards, a full stop has been placed after व्यपदिश्यते, and the words अस्य सर्वज्ञत्वं have been added after the above compound, so as to make the sentence mean 'his omniscience is in consequence of his being the illuminator of the whole of ignorance.' I have not, however, found any manuscript authority for this, the reading being invariably as I have given it. The words अस्य सर्वज्ञत्वं seem to have been imported in order to make the passage coincide in form with that relating to प्राज्ञ.

Page 10. प्राज्ञ is here said to be 'parviscient' (प्रायेण अज्ञः as Rāmatīrtha explains it on p. 94) in opposition to the omniscient ईश्वर. This sense of the word is *directly*

opposed to that given to it in the Upaniṣads and in S'ankara's *Brahmasūtrabhāṣya*, and is an invention of the moderns. For examples of its usage in former times, see *Bṛihadāraṇyaka* 4. 3. 35, and *Māṇḍūkya* 5; also *S'ārīrakabhāṣya* 2. 3. 21; 3. 2. 25-27, where it is applied to ईश्वर in contradistinction to जीव.

Page 10. एकाज्ञानावभासकत्वात्। Here, too, in every edition but that of Dr. Böhtlingk, a full-stop comes after इत्युच्यते, and the next sentence is "एकाज्ञानावभासकत्वादस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वं," a reading opposed to that of every MS. that I have seen.

Page 12. आधारभूतानुपहिताकाशवत्. Rāmatīrtha points out (on p. 95) that either is not really the substrate of the forest or of the lake, because it is not their material cause; but as they could not exist without space, it is called their substrate.

— तुरीयं 'the forth'. The other three states are, (1) dreamless sleep. (2) dreaming, and (3) waking, with which are respectively associated Īs'vara-Prājna, Sūtrātmā-Taijasa, and Vais'vānara-Vis'va. The old Marāṭhā poet Mukundarāj, in the *pūrvārdha* of his philosophical poem *Vivekasindhu*, describes also an उन्मनी अवस्था. In iii. 31, he says—"हे गुणत्रयाची साम्यता। ईश्वराची उन्मनी अवस्था"।, and in vi. 87—90—"तुर्येची परिपक्वता। तेचि उन्मनी अवस्था। निंबोळियांस मधुरता। जैसी पक्वदशें ॥ ८७ ॥ तुर्या ते शुद्धवासना। तेथें ह्याची कडवटपणा। उन्मनी बुझ निर्वासना। म्हणूनि गोड ते ॥ ८८ ॥ जैसी साखर उदकीं विरे। परी तेथींची मधुरता उरे। तैसी तुर्या स्वरूपीं मुरे। ते उन्मनी गा ॥८९॥ अवस्था पंचमा नास्ति। ऐसी हे वेदश्रुती। ह्मणूनि तुर्येची परिणामस्थिति। ते उन्मनी कीं ॥ ९० ॥" This *avasthā* is described in the *Haṭhayogapradīpikā*. Amongst other things it is said (iv. 106):—"शंखदुन्दुभिनादं च न शृणोति कदाचन। काष्ठवज्जायते देह उन्मन्यवस्थया ध्रुवम्" ॥ As to the absence of any fifth state, see *Brahmasūtrabhaṣya* 3. 2. 10.

— "कार्योपाधिरयं जीवः &c." The first line of this quotation

occurs again in xx. 49 of Vidyāraṇya's work. Appayadīkṣita, however, in his *Siddhāntales'a* (p. 14, in Vizianagaram Series), calls it *S'ruti;* and so does the author of *Yogavārtika* (i. 24). The verse is quoted, too, in the *Mahāvākyavivaraṇa* (Jagadīs'vara Press, Bombay, 1883) folio 19*a*, and after it is added "इति शांकरभाष्यप्रामाण्यात्"। If the passage is really to be found in any *Bhāṣya* of S'ankara's, then, of course, Vidyāraṇya is not its author. With the definitions of ईश्वर and जीव here given, compare those of *Saṅkṣepas'ārīraka,* (iii. 227-8)—"उपाधिरज्ञानमनादिसिद्धमस्खिश्चिदाभासनमीश्वरत्वम्।...उपाधिरन्तःकरणं स्वमर्थे जीवत्वमाभासनमत्र तद्वत्"।

Page 13. The two powers of ignorance, 'concealment' and 'projection,' correspond with our 'want of apprehension' and 'misapprehension' respectively.

Page 16. सांख्यनैयायिकपक्षौ। The Sāṅkhyas hold that *pradhāna* evolves itself spontaneously, whilst the latter believe in the independent action of atoms as the cause of all things. Their views are stated and refuted in *Brahmasūtra* 2. 2. 1–17.

— "रचनानुपपत्तेश्च &c." The edition of the *Bibliotheca Indica* and Jīvānanda misread this *Sūtra.* For नानुमानं they read अनुमानं. The Ānandās'rama edition has the correct reading.

— "कारणगुणा हि &c." The *Tarkabhāṣā,* to which I have traced this nyāya, is believed by Dr. R. G. Bhāṇḍārkar to be "considerably older" than the latter part of 14th century in which one of its commentators lived. The ultimate source of this nyāya is probably *Vais'eṣikasūtra* 2. 1. 24. The Vedāntins and Sāṅkhyas hold that an effect exists, prior to its production, in its material cause,—a tenet denied by the Vais'eṣikas. The former are therefore termed *satkāryavādin,* and the latter

asatkāryavādin. See *S'ānkarabhāṣya* 2. 1. 10, 18: and 2. 2. 11.

— कारणगुणप्रक्रमन्यायः is explained as follows in *Vāchaspatyam* (s v. न्याय):—"कारणगुणाः सजातीयगुणान् कार्ये आरभन्ते यथा तन्तुरूपादयः स्वकार्ये पटे सजातीयरूपादीनारभन्ते न विजातीयानेवं यत्र कारणगुणानुगमस्तत्रास्य प्रवृत्तिः" ॥

Page 17. In the edition, except that of Dr. Böhtlingk, definitions of चित्त and अहङ्कार are given after the words "अनयोरेव चित्ताहङ्कारयोरन्तर्भावः" but this is not supported by my manuscripts. It looks as if they had got into the text from Rāmatīrtha's commentary where they occur *verbatim* (page 101).

Page 18. जीवः। The description of *Jīva* which is given in *Brahmasūtrabhāṣya* may prove of interest. He is not born and does not die; birth and death relate only to his body (2. 3. 16); he is not produced or absorbed, as ether is (2. 3. 17); he is the highest Brahma in contact with an *upādhi*, and is said to be ज्ञः a term which, according to S'ankara, means merely नित्यचैतन्यः and not a knowing subject (2. 3. 18); he is not of small size but omnipresent (विभुः) like Brahma (2. 3. 29); he is associated with *buddhi* so long as he continues to transmigrate (2. 3. 30); he is not really an independent agent, but his activity is due to *buddhi* (2. 3. 40); his activity is in subordination to God, *who impels him to good or evil* according as He desires to elevate or degrade him in the future (2. 3. 41); he is 'as it were' a part of God, but not really so, since God has no parts (2. 3. 43); he is described as निहीनोपाधिसंपन्नः (2. 3. 45); he is a mere reflection of God (2. 3. 50); in transmigration he is attended by the chief vital air, the organs, mind, *avidyā*, works *pūrvaprajnā*, and the subtle elements (3. 1. 1); he is non-different from God, though the fact is concealed by *avidyā* (3. 2. 5, 6); without an *upādhi* he would not be *jīva*, and in reality he never

ceases to be Brahma (3. 2. 7, 9); in sound sleep he is joined to Brahma, but returns to his own body on awaking (3. 2. 9, 31); there are only four states into which he can possibly enter, and there is no fifth; but he may be in a state of swoon which is said to be a semi-entrance into sound sleep and another state (3. 2. 10); shaking off *avidyā* by means of *vidyā*, he becomes one with the infinite *prājna* (3. 2. 26).

Page 18. मनस्तु ज्ञानेन्द्रियैः सहितं। All the editions, without exception, read here कर्मेन्द्रियैः which is opposed by most of my MSS. of the text and by all those of the commentary. My reading is confirmed by *Vivekachūḍāmaṇi* 170—"ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात्" and by *Pañchadas'ī* i. 35—"सात्त्विकैर्धीन्द्रियैः साकं विमर्षात्मा मनोमयः"।

Page 19. With the quotation from *Gorakṣās'ataka*, compare the following from Sures'vara's *Mānasollāsa* (ix. 14, 15)—"नागो हिक्काकरः कूर्मो निमेषोन्मेषकारकः। श्रुतं करोति कृकलो देवदत्तो विजृम्भणम्। स्थौल्यं धनञ्जयः कुर्यान्मृतं च न विमुञ्चति" ॥

— सूक्ष्मशरीरं। As to this enveloping Jīva during transmigration, see reference above to *Brahmasūtrabhāṣya* 3. 1. 1; also Notes to page 100.

Page 20. In line 11, the editions, contrary to my MSS., insert सूक्ष्माभिः before the word मनोवृत्तिभिः।

Page 21. पञ्चीकरणं। The following is from S'ankara's *Pañchīkaraṇa*—"पंचमहाभूतानामेकैकं द्विधा विभज्य चतुर्धा कृत्वा स्वार्धभागं विहायेतरेषु पंचधा पंचीकृतेषु पंचीकरणं भवति"। Sures'vara's *vārtika* on the above reads as follows:—"पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा। एकैकं भागमादाय चतुर्धा विभजेत्पुनः ॥ ८ ॥ एकैकं भागमेकस्मिन्भूते संवेशयेत्क्रमात्। ततश्चाकाशभूतस्य भागाः पंच भवन्ति हि ॥ ९ ॥ वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत्। पंचीकरणमेतत्स्यादित्याहुस्तत्त्ववेदिनः ॥१०॥"

Page 22. "वैशेष्यात्" So all my MSS., but most of the editions reads वैशिष्ट्यात्. Dr. Ballantyne's rendering of

this *sūtra* is—"But as they differ, the one is called this, and the other is called that." Bearing in mind, however, that the second "तद्वादः" forms no part of the aphorism but merely indicates the close of the chapter, it is clear that the above rendering of "तद्वादस्तद्वादः" will not do. And since S'ankara gives भूयस्त्वं as the equivalent of वैशेष्यं, the rest of the translation must go too. Here is a portion of the *Bhāṣya* on that aphorism:—"विशेषस्य भावो वैशेष्यं भूयस्त्वमिति यावत् । सत्यपि त्रिवृत्करणे क्वचित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलक्ष्यते अग्नेस्तेजोभूयस्त्वमुदकस्याऽभूयस्त्वं पृथिव्या अन्नभूयस्त्वं इति । ...तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेष तेजोऽबन्नविशेषवादो भूतभौतिकविषय उपपद्यते । तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति" ॥ So, too, the *Brahmasūtratātparyavivaraṇa*—"विशेषस्य भावो वैशेष्यमाधिक्यम् । अग्नेस्तेजोभूयस्त्वं ... । इत्येवं त्रिवृत्कृतेष्वपि तत्तद्भागानां बहुत्वात्तदीयत्वव्यवहाराख्यिगुणरज्जुवत् । तस्माद्वैशेष्यात्तद्वादः" ॥ Also the *Vedāntakaustubhaprabhā*, "विशेषस्य भा वैशेष्यं भागभूयस्त्वमिति यावत् । तस्य पृथिव्यादौ दर्शनात्तद्वादः स तेजोबन्नविशेषवादो भौतिकवस्तुविशेषवादश्च सूपपन्न इत्यर्थः ॥" In the third edition of my *Manual of Hindu Pantheism*, I have therefore translated thus:—"Their appellation is on account of the preponderance [of that element after which each is named]."

Page 23. Line 6. सर्वनराभिमानित्वात् । The word *abhimānin* occurs at least eight times in S'ankara's *bhāṣya*, and once in *sūtra* 2. 1. 5, and in every case it has the sense of *adhiṣṭhātṛ*. The following are examples:—"आदित्यादिशरीराभिमानिभ्यो जीवेभ्यः" 1. 1. 21; "पृथिव्याद्यभिमानी काश्चिद्देवः ॥" 1. 2. 18.

— Line 24. इन्द्रियैरर्थोपलब्धेश्च. Compare Rāmtīrtha's quotation, on p. 114, from S'ankara's *Pañchīkaraṇa*.

Page 24. The internal organ, though one, is composed of four parts—hence the expression अन्तरिन्द्रियचतुष्केण. In *Vedāntaparibhāṣā* i. (Paṇḍit, vol. iv. p. 395) it is said:—एवं वृत्तिभेदेनैकमप्यन्तःकरणं मन इति बुद्धिरित्यहंकार इति

चित्तमिति चाख्यायते। तदुक्तम्—'मनो बुद्धिरहंकारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया इमे'॥" See, too, Sures'vara's *Pañchīkaraṇavārtika*, 33. 34.

Page 26. For the doctrines of the Chārvākas, the first chapter of *Sarvadars'anasaṅgraha;* H. H. Wilson's *Works* i. 22, ii. 87; and Colebrooke's *Essays* i. 426—30. They are also called Lokāyatikas (as in *S'ānkarabhāṣya* 1. 1. 1; 2. 2. 2; 3. 3. 53, 54.), but Rāmatīrtha seems to limit this term to one subdivision of them. See page 115.

— The two Bauddhas referred to are supposed to represent the views of the *Yogyāchāras* and *Mādhyamikas*, respectively. "Some maintain that all is void, following, as it seems, a literal interpretation of Buddha's *sūtras*. To these the designation of *Mādhyamika* is assigned by several of the commentators of the Vedānta...Other disciples of Buddha except internal sensation or intelligence (*vijnāna*), and acknowledge all else to be void. They maintain the eternal existence of conscious sense alone. These are called *Yogāchāras*." Colebrooke's *Essays*, i. 415. *Brahmasūtras* 2. 2. 28—32 are supposed to be directed against these two sects of Buddhists.

Page 27. The *Prābhākaras* and *Bhāṭṭas* are the followers of the learned Mīmāṁsakas Prabhākara and Kumārila Bhaṭṭa. *Essays* i. 322, 329.

Page 28. स्थूलारुन्धतीन्याय. In *Vāchaspatyam* (s. v. न्याय) this is explained in language very similar to that of our commentary, and then is added—"एवं यत्रातिसूक्ष्मदुर्विज्ञेयवस्तुविज्ञानाय क्रमेण तत्समीपसमीपतरसमीपतमं वस्तु शास्त्रेण तत्तयोच्यते तत्र स्थूलारुन्धतीन्यायोऽवतरति। अयमेव केनचिदरुन्धतीप्रदर्शनन्यायत्वेनोदाहृियते"॥ In the same lexicon, under अरुन्धतीदर्शनन्याय (p. 360.), the following explanation is given:—"प्रथमस्थूलदर्शनेन सूक्ष्मदर्शनरूपे न्याये। 'यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां तारामुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति' शा° भा°"॥ The passage quoted in this definition is from *S'ārīraka-*

bhāṣya 1. 1. 8, and there is another of similar import in 1. 1. 12. see अरुन्धतीप्रदर्शनन्याय in *Maxims* i (2nd edn.).

Page 29. "सतत्त्वतोऽन्यथाप्रथा &c." Cf. *Vedāntakalpataru-parimala* on sūtra 1. 2. 21:—"तत्त्वतोऽन्यथाभावः परिणामः। अतत्त्वतोऽन्यथाभावो विवर्तः" ॥ विकार (or परिणाम) and विवर्त may be rendered 'modification' and 'illusory manifestation' respectively. The commentary gives one example of the former, *viz.* the transformation of milk into curds; another is that of gold into an ornament. In the former case, there is a modification of name, form, and substance; in the latter, of name and form only. The common illustration of विवर्त is that of a rope mistaken for a snake, or of nacre imagined to be silver; where, of course, there is no actual modification of any kind. On page 30, the commentator says—"अत्र वेदान्ते ब्रह्मणि प्रपञ्चभानस्य परिणामभावो नाङ्गीक्रियते," a statement which, though true of the *advaitavādin* school, is not true of some of the others. The *vis'iṣṭādvaitavādins*, for example, of whom Rāmānuja is the great representative, hold that "whatever is presented to us by ordinary experience, *viz.* matter in all its various modifications and the individual souls of different classes and degrees, are essential real constituents of Brahman's nature." And again:—"The world, with its variety of material forms of existence and individual souls, is not unreal Māyā, but a real part of Brahman's nature, the body investing the universal Self." Dr. Thibaüt's *Translation of Vedāntasūtras*, pp. xxviii and xxx. It is impossible to read the older Upaniṣads without seeing that this is their teaching also. For a concise explanation of the terms विवर्तवाद, परिणामवाद, आरम्भवाद &c., see *Pañchadas'ī* xiii. 6–10, *Saṅkṣepas'ārīraka* ii. 57–70, and Professor Venis' valuable note on p. 488, vol. viii. of *Pandit*. The following is from Appayadīkṣita's *Siddhāntales'a*, p. 10 (Vizianagaram Series):—"ब्रह्मणश्चोपादानत्वमद्वितीयकूटस्थचैतन्यरूपस्य

न परमाणूनामिवारम्भकत्वरूपं न वा प्रकृतेरिव परिणामित्वरूपं किन्तु अविद्यया वियदादिप्रपञ्चरूपेण विवर्तमानत्वलक्षणम् । वस्तुनस्तत्समसत्ताकोऽन्यथाभावः परिणामः तदसमसत्ताको विवर्त इति वा कारणलक्षणोऽन्यथाभावः परिणामः तद्विलक्षणो विवर्त इति वा कारणाभिन्नं कार्यं परिणामः तदभेदं विनैव तद्व्यतिरेकेण दुर्वचं कार्यं विवर्त इति वा विवर्तपरिणामयोर्विवेकः" ॥

Page 30. "अधिष्ठानावशेषो हि &c." The immediate context of the passage quoted, in the MS. to which I referred, is as follows:—"एकैव परमा शक्तिर्माया दुर्घटकारिणी ॥ ६ ॥ शिवस्यानन्तरूपा सा विद्यया तस्य नश्यति । या विनश्यति सा माया चिन्मात्रे परिकल्पिता ॥ ७ ॥ अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः । भावस्यैव ह्यभावत्वं नाशो भावस्य भावता ॥ ८ ॥ भावाभावस्वभावाभ्यामन्य एव हि कल्पिताः । अधिष्ठानस्य नाशो न सत्यत्वादेव सर्वदा ॥ ९ ॥"

